'मुकुटस्तु ३०८५७१४२८ वर्षाणि ६ मासाः २५ दिवसाः ४२ घट्यः ५१ पला=१ मन्वन्तरम्' इत्याह।

१ संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ २२ ॥
२ अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम्।
कलुषं वृजिनेनोऽघमंहो दुरितदुष्कृतम् ॥ २३ ॥
३ स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः।
४ मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ॥ २४ ॥
स्यादानन्दथुरानन्दः शर्मशातसुखानि च।
५ स्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ २५ ॥
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्।
शस्तं ६ चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥ २६ ॥
७ मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ।

---

१ संवर्तः, प्रलयः, कल्पः, क्षयः, कल्पान्तः (५ पु), 'प्रलय काल' के ५ नाम हैं ॥

२ पङ्कम् (न पु), पाप्मा (= पाप्मन्, पु) पापम्, किल्बिषम्, कल्मषम्, कलुषम्, वृजिनम्, एनः (= एनस्), अघम्, अंहः (= अंहस्। + अंघः, अंघस्), दुरितम्, दुष्कृतम्, (१० न), 'पाप' के १२ नाम हैं ॥

३ धर्मः (पु न। + धर्मा = धर्मन्, पु), पुण्यम्, श्रेयः (= श्रेयस्), सुकृतम् (३ न) वृषः (पु) 'धर्म' के ५ नाम हैं ॥

४ मुत् (= मुद्), प्रीतिः (२ स्त्री), प्रमदः, हर्षः, प्रमोदः, आमोदः, संमदः, आनन्दथुः, आनन्दः, (७ पु), शर्म (= शर्मन्), शातम् (+ सातम्), सुखम् (३ न), 'हर्ष' के १२ नाम हैं ॥

५ स्वःश्रेयसम् (+ स्वःश्रेयसम्), शिवम्, भद्रम् (+ भन्दम्), कल्याणम्, मङ्गलम्, शुभम्, भावुकम्, भविकम्, भव्यम्, कुशलम् (+ कुपलम्। १० न), क्षेमम्, शस्तम् (२ पु न), 'कल्याण' के १२ नाम हैं ॥

६ 'पाप, पुण्य' शब्द और 'सुख' शब्दसे 'शस्त' शब्दतक १३ शब्द द्रव्यविशेषमें प्रयुक्त होनेपर त्रिलिङ्ग होते हैं। (जैसे—'पापो मनुष्यः, पापा निधनता, पापं दैन्यम्। पुण्यः प्रतापः, पुण्या सम्पत्, पुण्यं यशः। कल्याणो बन्धुः, कल्याणी भार्या, कल्याणं वित्तम्·····') ॥

७ मतल्लिका, मचर्चिका (२ नि० स्त्री), प्रकाण्डम् (नि० न। + पु),

प्रशस्तवाचकान्यमू१न्ययः शुभावहो विधिः ॥ २७ ॥
२ दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।
३ हेतुर्ना कारणं बीजं ४ निदानं त्वादिकारणम् ॥ २८ ॥
५ क्षेत्रज्ञ आत्मा पुरुषः ६ प्रधानं प्रकृतिः स्त्रियाम् ।
७ विशेषः कालिकोऽवस्था८गुणाः सत्त्वं रजस्तमः ॥ २९ ॥
९ जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।
१० प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ ३० ॥

उद्भः, तल्लजः (२ पु), ये ५ किसी द्रव्यवाचक शब्दके साथ समस्त होकर अन्तमें रहनेसे उसकी श्रेष्ठताको प्रकट करते हैं। इनका स्वतन्त्र प्रयोग नहीं होता है। जैसे—'गोमतल्लिका, गोमचर्चिका, गोप्रकाण्डम्, गवोद्भः, गोतल्लजः,.....') ॥

१ अयः (पु) 'शुभकारक भाग्य' का १ नाम है ॥

२ दैवम्, दिष्टम्, भागधेयम्, भाग्यम् (४ न), नियतिः (स्त्री), विधिः (पु), 'भाग्य' के ६ नाम हैं ॥

३ हेतुः (पु), कारणम्, बीजम् (२ न), 'कारण' के ३ नाम हैं ॥

४ निदानम् (न), 'मूल कारण' का १ नाम है ॥

५ क्षेत्रज्ञः, आत्मा (=आत्मन्), पुरुषः (३ पु), 'शरीरको अधिष्ठात्री देवता' के ३ नाम हैं ॥

६ प्रधानम् (न), प्रकृतिः (स्त्री), 'सत्त्वगुण, रजोगुण और तमोगुणकी साम्यावस्था' के २ नाम हैं ॥

७ अवस्था (स्त्री), 'समयकृत विशेष' अर्थात् 'उम्र'का १ नाम है। (जैसे—लड़कपन, जवानी, बुढ़ापा,.....) ॥

८ सत्त्वम्, रजः (=रजस् । +रजः=रज, पु), तमः (=तमस्) +तमः,=तम, पु । ३ न), ये ३ 'प्रकृतिके धर्म' हैं। उनका क्रमशः 'सत्त्वगुण, रजोगुण और तमोगुण' यह १-१ नाम है ॥

९ जनुः (=जनुस्), जननम्, जन्म (=जन्मन् । +जन्मः=जन्म, पु । ३ न), जनिः (+पु), उत्पत्तिः (२ स्त्री), उद्भवः (पु), 'उत्पत्ति' अर्थात् 'पैदा होने या जन्म लेने' के ६ नाम हैं ॥

१० प्राणी (=प्राणिन्), चेतनः, जन्मी (=जन्मिन्) जन्तुः, जन्युः, शरीरी

१ जातिर्जातं च सामान्यं २ व्यक्तिस्तु पृथगात्मता ।
३ चित्तं तु चेतो हृदयं स्वान्तं हृन्मानस मनः ॥ २१ ॥

इति कालवर्गः ॥ ४ ॥

५. अथ धीवर्गः ।

४ बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥
५ धीर्धारणावती मेधा ६ सङ्कल्पः कर्म मानसम् ।
७ 'अवधानं समाधानं प्रणिधानं तथैव च' (४४)

(= शरीरिन् । ६ पु), 'प्राणी'के ६ नाम हैं ॥

१ जातिः (स्त्री), जातम्, सामान्यम् (२ न), 'जाति'के ३ नाम हैं । ('जैसे—गोत्व, ब्राह्मणत्व, घटत्व,·····') ॥

२ व्यक्तिः, पृथगात्मता (२ स्त्री), 'व्यक्ति'के २ नाम हैं । ('जैसे—गौ, मनुष्य, राम, श्याम,·····') ॥

३ चित्तम्, चेतः (= चेतस्), हृदयम्, स्वान्तम्, हृत् (= हृद्), मानसम्, मनः (= मनस् । ७ न), 'मन या चित्त' के ७ नाम हैं ॥

इति कालवर्गः ॥ ४ ॥

५. अथ धीवर्गः ॥

४ बुद्धिः, मनीषा, धिषणा, धीः, प्रज्ञा, शेमुषी, मतिः, प्रेक्षा, उपलब्धिः, चित् (= चिद्), संवित् (= संविद्), प्रतिपत् (= प्रतिपद्), ज्ञप्तिः, चेतना (१४ स्त्री), 'बुद्धि' के १४ नाम हैं ॥

५ मेधा (स्त्री), 'धारणा शक्तिवाली बुद्धि' का १ नाम है ॥

६ संकल्पः (पु), 'संकल्प, मानसिक कर्म' का १ नाम है ॥

७ [अवधानम्, समाधानम्, प्रणिधानम् (३ न), 'समाधान' के ३ नाम हैं] ॥

---

* 'साङ्ख्ये बुद्धिधर्मस्यैते पर्यायाः, वैशेषिकादौ तु चतुर्दशापि बुद्ध्यर्थाः' इति क्षी० स्वा० ॥

१ चित्ताभोगो मनस्कार२श्चर्चा सङ्ख्या विचारणा ॥ २ ॥
३ 'विमर्शो भावना चैव वासना च निगद्यते' (४५)
४ अध्याहारस्तर्क ऊहो ५ विचिकित्सा तु संशयः ।
सन्देहद्वापरौ ६ चाथ समौ निर्णयनिश्चयौ ॥ ३ ॥
७ मिथ्यादृष्टिर्नास्तिकता ८ व्यापादो द्रोहचिन्तनम् ।
९ समौ सिद्धान्तराद्धान्तौ १० भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ ४ ॥
११ संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।

---

१ चित्ताभोगः, मनस्कारः (२ पु), 'सुखादिमें मनके लगे रहने' के २ नाम हैं ॥

२ चर्चा, सङ्ख्या, विचारणा (३ स्त्री), 'प्रमाणोंके द्वारा किसी विषयके विचार करने' के ३ नाम हैं ॥

३ [विमर्शः (पु), भावना, वासना (२ स्त्री), 'बीती हुई बात आदिके संस्कार' के ३ नाम हैं] ॥

४ अध्याहारः, तर्कः, ऊहः (३ पु), 'तर्क' के ३ नाम हैं ॥

५ विचिकित्सा (स्त्री), संशयः, सन्देहः, द्वापरः (३ पु), 'सन्देह'के ४ नाम हैं ॥

६ निर्णयः, निश्चयः (२ पु), 'निश्चय' के २ नाम हैं ॥

७ मिथ्यादृष्टिः, नास्तिकता (२ स्त्री), 'नास्तिकपना'के २ नाम हैं। ('ईश्वर या परलोक नहीं है, ऐसे ज्ञानको 'नास्तिकपना' कहते हैं') ॥

८ व्यापादः (पु), द्रोहचिन्तनम् (न), 'किसीसे द्रोह करनेका विचार करने' के २ नाम हैं ॥

९ सिद्धान्तः, राद्धान्तः (२ पु), 'सिद्धान्त' के २ नाम हैं। ('वाद-विवादके द्वारा किसी विषयको निश्चय करने या अपने अटल मतको 'सिद्धान्त' कहते हैं') ॥

१० भ्रान्तिः, मिथ्यामतिः (२ स्त्री), भ्रमः (पु), 'भ्रम' के ३ नाम हैं। ('जैसे—शुक्तिमें रजतका, रस्सीमें सर्पका ज्ञान होना 'भ्रम' है') ॥

११ संवित् (= संविद्), आगूः (= आगुर्, 'आगूः, आगुरौ, आगुरः' ऐसे रूप होते हैं। अथवा—आगूः, = आगू, 'आगूः, आगवौ, आगवः' इत्यादि

१ अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥
२ मोक्षे धीर्ज्ञान३मन्यत्र विज्ञानं शिल्पशास्त्रयोः ।
४ मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ६ ॥
मोक्षोऽपवर्गोऽ५थाज्ञानमविद्याऽहम्मतिः स्त्रियाम् ।
६ रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ ७ ॥
गोचरा इन्द्रियार्थाश्च ७ हृषीकं विषयीन्द्रियम् ।
८ कर्मेन्द्रियं तु पाय्वादि—

'खलपू' शब्दके समान रूप होते हैं । (२ स्त्री), प्रतिज्ञानम् (न), नियमः, आश्रवः, संश्रवः (३ पु), 'प्रतिज्ञा' के ६ नाम हैं ॥

१ अङ्गीकारः (+ स्वीकारः), अभ्युपगमः, प्रतिश्रवः, समाधिः (४ पु), 'स्वीकार करने' के ४ नाम हैं ॥

२ ज्ञानम् (न), 'मोक्ष-विषयक बुद्धि' का १ नाम है ॥

३ विज्ञानम् (न), 'शिल्प (कारीगरी), अथवा शास्त्रविषयक बुद्धि' का १ नाम है । (मुकुटने 'मोक्षे' इसको निमित्त सप्तमी मानकर मोक्षनिमित्तक शिल्प-शास्त्र-विषयक बुद्धिको 'ज्ञान' तथा अन्यनिमित्तक शिल्प-शास्त्रविषयक बुद्धिको' विज्ञान' अर्थ किया है) ॥

४ मुक्तिः (स्त्री), कैवल्यम् , निर्वाणम्, श्रेयः (= श्रेयस्), निःश्रेयसम्, अमृतम् (५ न), मोक्षः, अपवर्गः (२ पु), 'मोक्ष' के ८ नाम हैं ॥

५ अज्ञानम् (न), अविद्या, अहम्मतिः (२ स्त्री), 'अज्ञान'के ३ नाम हैं ॥

६ रूपम् (न), शब्दः, गन्धः, रसः, स्पर्शः (४ पु), ये ५ 'नेत्रादि एक-एक इन्द्रिय के एक-एक विषय' के नाम हैं । ('नेत्रका विषय 'रूप' जिह्वा का विषय 'रस' नासिकाका विषय 'गन्ध' कानका विषय 'शब्द' और त्वचा अर्थात् चमड़ेका विषय 'स्पर्श' है । इन्हींके गोचरः, विषयः, इन्द्रियार्थः (३ पु), ये ३ सामान्य नाम हैं ॥

७ हृषीकम्, विषयि (= विषयिन्), इन्द्रियम् (३ न), 'इन्द्रियों' के ३ नाम हैं । ('कर्मेन्द्रिय और ज्ञानेन्द्रिय भेदसे इन्द्रिय दो प्रकारके हैं; जिनका विवरण आगे किया जा रहा है') ॥

८ कर्मेन्द्रियम् (न), 'काम करनेवाली इन्द्रियों' का १ नाम है । ('पायु अर्थात् गुदा १, उपस्थ अर्थात् भग या लिङ्ग २, हाथ ३, पैर ४ और वाक् ५ ये कर्मेन्द्रिय अर्थात् काम करनेवाली इन्द्रियां हैं । 'मलत्याग करना,

—१ मनोनेत्रादि धीन्द्रियम् ॥ ८ ॥
२ तुवरस्तु कषायोऽस्त्री ३ मधुरो लवणः कटुः।
तिक्तोऽम्लश्च रसाः पुंसि ४ तद्वत्सु षडमी त्रिषु ॥ ९ ॥
५ विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।

भोग करना, ग्रहण करना, चलना और बोलना' इनमेंसे १–१ काम क्रमशः एक–एक इन्द्रियका* है') ॥

१ धीन्द्रियम् (न । + ज्ञानेन्द्रियम्), 'ज्ञानेन्द्रिय' का १ नाम है। ('मन १, कान २, नेत्र ३, जीभ ४, त्वचा ५ और नाक ६, ये ६ ज्ञानेन्द्रिय अर्थात् ज्ञान करनेवाली इन्द्रियां† हैं। 'जानना, सुनना, देखना, स्वाद लेना, स्पर्शज्ञान करना और सूँघना' इनमें से १–१ काम क्रमशः १–१ इन्द्रियका है') ॥

२ तुवरः (+ तूवरः, कुवरः । पु) कषायः, (पु न) 'कषाय, कसाव' के २ नाम हैं। (हर्रेमें 'कषाय' रस होता है) ॥

३ मधुरः, लवणः, कटुः, तिक्तः, अम्लः (+ अंबलः, अम्लः । ५ पु), 'मीठा, खारा, कडुआ, तीता और खट्टा' ये पांच और पहिला 'कषाय' ऐसे ६ रस हैं। ('इनमें पानी आदि 'मीठा', नमक, सोरा आदि 'खारा' मिर्च आदि 'कडुआ' नीम, चिरैता आदि 'तीता' और आम, नींबू, इमली आदि 'खट्टे' होते हैं। रसः (पु) हैं') ॥

४ ये 'तुवर, मधुर' आदि ७ नाम स्वतः रसवाचक रहनेपर पुंलिङ्ग हैं; किन्तु द्रव्यवाचक अर्थात् रसवाले पदार्थके अर्थमें प्रयुक्त होनेपर त्रिलिङ्ग हैं। जैसे—मधुरं जलम्, मधुरा आपः, मधुरो गुडः,.....') ॥

५ परिमलः (पु), 'किसी पदार्थके संघर्ष अर्थात् रगड़से

---

* तथा च कामन्दकः—'पायूपस्थे पाणिपादौ वाक्चेतीन्द्रियसंग्रहः।
उत्सर्ग आनन्दादानगत्यालापाश्च तत्क्रियाः ॥ २ ॥' इति ॥

† तदुक्तम्—'मनः कर्णस्तथा नेत्रं रसना च त्वचा सह।
नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते ॥ २ ॥' इति ॥

१ आमोदः सोऽतिनिर्हारी २ वाच्यलिङ्गत्वमागुणात् ॥ १० ॥
३ समाकर्षी तु निर्हारी ४ सुरभिर्घ्राण तर्पणः ।
इष्टगन्धः सुगन्धिः स्या ५ दामोदी मुखवासनः ॥ ११ ॥
६ पूतिगन्धिस्तु दुर्गन्धो ७ विस्रं स्यादामगन्धि यत् ।
८ शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ।
हरिणः पाण्डुरः पाण्डुः—

उत्पन्न जनमनोहर गन्धविशेष या वकुलके गन्ध' का १ नाम है।

१ *आमोदः (पु), 'अत्यन्त बढ़िया गन्ध या कस्तूरीके गन्ध' का १ नाम है ॥

२ यहांसे 'गुणेशुक्लादयः पुंसि (१।५।१७)' के पूर्वतक सब शब्द त्रिलिङ्ग हैं॥

३ समाकर्षी (= समाकर्षिन्), निर्हारी (= निर्हारिन् । २ त्रि), 'दूरस्थ सुगन्धित पदार्थ' के २ नाम हैं ॥

४ † सुरभिः, घ्राणतर्पणः, इष्टगन्धः, सुगन्धिः (४ त्रि), 'सुगन्धि' के ४ नाम हैं (इनमें 'सुरभि' नाम 'चम्पकके गन्ध' का भी है) ॥

५ आमोदी (= आमोदिन्), ‡ मुखवासनः (भागुरि म० अगुरुवासनः । २ त्रि), 'मुखको सुगन्धित करनेवाले पान आदि' के २ नाम हैं। ('मुखवासनः' नाम 'कपूरके गन्ध' का भी है') ॥

६ पूतिगन्धिः, दुर्गन्धः (२ त्रि), 'दुर्गन्धि, बदबू' के २ नाम हैं ॥

७ विस्रम् (त्रि), 'विना पके हुए मांस आदिके गन्ध' का १ नाम है ॥

८ शुक्लः, शुभ्रः, शुचिः, श्वेतः, विशदः, श्येतः, पाण्डरः, अवदातः, सितः, गौरः, वलक्षः (+ अवलक्षः), धवलः, अर्जुनः, हरिणः, पाण्डुरः, पाण्डुः (१६ त्रि), 'सफेद, उजले' के १६ नाम हैं। ('मतान्तरसे 'शुक्ल' आदि १३ नाम 'सफेद' के हैं और अन्तवाले 'हरिणः' आदि ३ नाम 'पाण्डुर' अर्थात् 'कुछ पीलापन लिये हुए सफेद' के हैं') ॥

---

*†‡ 'कस्तूरिकायामामोदः कर्पूरे मुखवासनः ।
वकुले स्यात्परिमलश्चम्पके सुरभिस्तथा ॥ १ ॥' इति ॥

—१ ईषत्पाण्डुस्तु धूसरः ॥ १३ ॥
२ कृष्णे नीलासितश्यामकालश्यामलमेचकाः ।
३ पीतो गौरो हरिद्राभः ४ पालाशो हरितो हरित् ॥ १४ ॥
५ लोहितो रोहितो रक्तः ६ शोणः कोकनदच्छविः ।
७ अव्यक्तरागस्त्वरुणः ८ श्वेतरक्तस्तु पाटलः ॥ १५ ॥
९ श्यावः स्यात्कपिशो १० धूम्रधूमलौ कृष्णलोहिते ।
११ कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥
१२ चित्रं किर्मीरकल्मापशबलैताश्च कर्बुरे ।

---

१ ईषत्पाण्डुः, धूसरः (२ त्रि), 'धूसर' के २ नाम हैं ॥

२ कृष्णः, नीलः, असितः, श्यामः, कालः, श्यामलः, मेचकः (७ त्रि), 'काले' के ७ नाम हैं ॥

३ पीतः, गौरः, हरिद्राभः (३ त्रि), 'पीले' के ३ नाम हैं ॥

४ पालाशः (+ पलाशः), हरितः, हरित् (३ त्रि), 'हरे' के ३ नाम हैं ॥

५ लोहितः, रोहितः, रक्तः (३ त्रि), 'लाल' के ३ नाम हैं ॥

६ शोणः (त्रि), 'लाल कमलके समान सुर्ख लाल' का १ नाम है ॥

७ अरुणः (त्रि), 'गुलाबी' का १ नाम है ॥

८ पाटलः (त्रि), 'सफेदी लिये हुए लाल रंग' का १ नाम है ॥

९ श्यावः, कपिशः (२ त्रि), 'फीके रङ्ग' के २ नाम हैं ॥

१० धूम्रः, धूमलः, कृष्णलोहित, (३ त्रि), 'कालापनसे युक्त लाल' के ३ नाम हैं ॥

११ कडारः, कपिलः, पिङ्गः, पिशङ्गः, कद्रुः, पिङ्गलः (६ त्रि), 'भूरे' के ६ नाम हैं ॥

१२ चित्रम् (भा० दी० म० नपुं०), किर्मीरः (+ कर्मीरः), कल्मापः, शबलः, एतः, कर्बुरः (६ त्रि), 'चितकबरे' के ६ नाम हैं। ('कौन २ रंग कैसे होते हैं, यह बात टिप्पणीमें स्पष्ट है' *) ॥

---

* श्वेतादिरागाणां व्यक्तं विवरणं शब्दार्णवे प्रोक्तम्। तथथा—

*श्वेतस्तु समपीतोऽसौ रक्तेतरजपारुचिः। बलक्षस्तु सितः श्यामः कन्दलीकुसुमोपमः ॥१॥

१ गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥ १७ ॥

इति धीवर्गः ॥ ५ ॥

६. अथ शब्दादिवर्गः।

२ * ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

---

१ इनमें से 'शुक्ल' आदि सब शब्द गुणवाचक रहनेपर पुंलिङ्ग ही होते हैं और गुणिवाचक होनेपर त्रिलिङ्ग होते हैं। ('जैसे—शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम्,.....') ॥

इति धीवर्गः ॥ ५ ॥

६. अथ शब्दादिवर्गः।

२ ब्राह्मी (+ गौः, = गो), भारती, भाषा, गीः (गिर् । + गिरा), वाक् (= वाच्), वाणी (+ वाणिः), सरस्वती, व्याहारः (पु), उक्तिः (शेष ८ स्त्री), लपितम्, भाषितम्, वचनम्, वचः (= वचस् । ४ न), 'वचन' अर्थात् 'बोलने' के १३ नाम हैं। ('इनमेंसे 'ब्राह्मी' से 'सरस्वती' तक ७ शब्द 'वचनके अधिष्ठात्री देवी' के भी नाम हैं') ॥

अर्जुनस्तु सितः कृष्णलेशवान् कुमुदच्छविः। पाण्डुस्तु पीतभागार्द्धः केतकीधूलिसन्निभः ॥२॥ धूसरस्तु सितः पीतलेशवान् बकुलच्छविः। मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभः ॥३॥ सितपीतहरिद्रक्तः कडारस्तृणवद्विवत्। अयं तद्रक्तपीताङ्गः कपिलो गोविभूषणः ॥४॥ हरितांशेऽधिकेऽसौ तु पिशङ्गः पद्मधूलिवत्। पिशङ्गस्त्वासितावेशात्पिशो दीपशिखादिषु ॥५॥ पिङ्गलस्तु परिच्छायः पिङ्गे शुक्लाङ्गखण्डवत् ॥' इति ॥

* 'ब्राह्मी गौर्भारती.....' इति पाठान्तरम् ॥

१ अपभ्रंशोऽपशब्दः स्यादच्छास्त्रे शब्दस्तु वाचकः ।
२ तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ २ ॥
४ श्रुतिः स्त्री वेद आम्नायस्त्रयी ५ धर्मस्तु तद्विधिः ।

---

१ अपभ्रंशः, अपशब्दः (२ पु) 'अप श' अर्थात् 'व्याकरण शास्त्रसे नहीं सिद्ध होनेवाले गगरी, घड़ा, इत्यादि भ्रष्ट (असंस्कृत) शब्द' के २ नाम हैं ॥

२ शब्दः (पु), 'व्याकरण आदि शास्त्रोंमें जो वाचक हैं उन'का १ नाम है । ('जैसे–'ओत-प्रोत तन्तुओंका वाचक 'पट' शब्द है, कम्बुग्रीवादि-संस्थान विशिष्टका वाचक 'घट' शब्द है,·····') ॥

३ वाक्यम् (न), 'वाक्य' का १ नाम है । ('तिङन्त-समुदाय १, 'सुबन्त-समुदाय २, पद-समुदाय ३, या कारकान्वित क्रिया ४, को 'वाक्य' कहते हैं । क्रमशः उदाहरण—१ तिङन्त-समुदाय जैसे—'पचति, भवति,·····' । २ सुबन्त-समुदाय जैसे—'प्रकृतिसिद्धमिदं हि महात्मनाम्,·····' । ३ पद-समुदाय जैसे–'देवदत्तो गच्छति, ओदनं पचति,·····' । ४ कारकान्वित क्रिया जैसे—'रावणं जहि निशितेन शरेण,·····') ॥

४ श्रुतिः, वेदः, आम्नायः (२ पु), त्रयी (शेष २ स्त्री), 'वेद' के ४ नाम हैं ॥

५ धर्मः (पु । मुकुट म० *'त्रयीधर्मः', पु,) 'धर्म' अर्थात् 'वेदोक्त यज्ञादि

---

* 'ऋक्, साम, यजुः' इति प्रत्येकं वेदस्य पर्याय इत्युक्त्वा 'त्रयाधर्मः' इत्येकं 'वेद-विहितयागादिकर्मणः' पर्याय इत्युक्तम्, तत्र च त्रय्या धर्मस्त्रयीधर्मः, तया त्रय्या विधिर्विधीयमानो यागादिरिति विग्रहः प्रदर्शितस्तच्चिन्त्यम् । 'विद्या धर्मेण शोभते, धर्मक्षेत्रे कुरुक्षेत्रे (गी. १।१), धर्मान्नो वक्तुमर्हसि (मनु. १।२), ब्रूहि धर्मानशेषतः (याज्ञ. स्मृ. १।२), धर्मादनिच् केवलात् (पा. सू. ५।४।१२४), इत्यादिनियुक्तोक्तवचनेषु 'धर्म'शब्दस्यैव दर्शनात् । 'भीमः भीमसेनः, सत्या, भामा, सत्यभामा', इतिवत्पदैकदेशस्यात्रापि प्रयोग इति तु नाशङ्क्यम् । लोके भीमादीनां पृथक् पृथक् प्रयोगदर्शनेनास्य 'त्रयीधर्म'शब्दस्य क्वापि तथाऽदर्शनेन वैषम्यात् । 'त्रयी-धर्म' शब्दस्य प्रयोग उपलब्धे तु प्रतिपाद्यप्रतिपादकभावरूपं सम्बन्धं मत्वा षष्ठीतत्पुरुष-समासो बोध्यः । ब्राह्मणक्षत्रियवैश्यानां द्विजत्वेऽपि ब्राह्मणस्यापि द्विजत्वविद्हापि सामान्य-विशेषरूपेणोभयसम्भवात् '·····वेदास्त्रयस्त्रयी (१।३।६)' इत्यनेन पौनरुक्त्यं नाशङ्क्यम् । '·····धर्ममस्त्रियाम् (१।४।२४)' इत्यनेनापि न पौनरुक्त्यम् । तत्र धर्मपर्यायागामत्र च धर्मस्वरूपस्य धर्मप्रमाणस्य चाभिधानेनादोषात् । अधिकन्तु परत्र द्रष्टव्यम् ॥

१ स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥
२ शिक्षेत्यादि श्रुतेरङ्ग ३ मोङ्कारप्रणवौ समौ ।
४ इतिहासः पुरावृत्तम्५मुदात्ताद्यास्त्रयः स्वराः ॥ ४ ॥
६ आन्वीक्षिकी—

कर्म'का १ नाम है। ('स्मृतियोंके भी वेदमूलक होनेसे स्मृत्युक्त कर्म भी 'धर्म' ही हैं') ॥

१ ऋक् (= ऋच्, स्त्री), साम (= सामन्), यजुः (= यजुस् । २ न), अर्थात् 'ऋग्वेद, सामवेद और यजुर्वेद' ये ३ 'वेद' हैं, इन तीनोंका 'त्रयी' (स्त्री), यह १ नाम है ॥

२ शिक्षा (स्त्री), आदि ('आदि शब्दसे 'कल्प १, व्याकरण २, निरुक्त ३, ज्यौतिष ४ और छन्दः ५, इनका संग्रह है') को 'वेदाङ्गम्'* (न) 'वेदाङ्ग' अर्थात् 'वेदोंका अङ्ग' कहते हैं ॥

३ ओङ्कारः (+ ॐकारः), प्रणवः, (२ पु), 'वेदारम्भ' अर्थात् 'ॐकार' के २ नाम हैं ॥

४ इतिहासः (पु), पुरावृत्तम् (न), 'इतिहास' के २ नाम हैं। ('पूर्वकालमें बीती हुई कथाको 'इतिहास' कहते हैं, जैसे-'महाभारत,·····') ॥

५ उदात्तः (पु), आदि ('आदि पदसे 'अनुदात्त और स्वरित' का संग्रह है'), ३ को 'स्वरः' † (पु), अर्थात् 'स्वर' कहते हैं ॥

६ आन्वीक्षिकी‡ (स्त्री), 'गौतम आदिकी रचित तर्कविद्या' का १ नाम है ॥

---

* तदुक्तम्—'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।
छन्दोविचितिरित्येष षडङ्गो वेद उच्यते ॥ १ ॥' इति ॥

† तदुक्तम्—'उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्त्रयः ।
चतुर्थः प्रचितो नोक्तो यतोऽसौ छान्दसः स्मृतः ॥ १ ॥' इति ॥

‡ आन्वीक्षिक्यादयश्चतस्रो विद्याः कामन्दके—
'आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती ।
विद्या ह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः ॥ १ ॥' इति ॥

१ दण्डनीतिस्तर्कविद्याऽर्थशास्त्रयोः ।
२ आख्यायिकोपलब्ध्यार्था ३ पुराणं पञ्चलक्षणम् ॥ ५ ॥

---

१ दण्डनीतिः (स्त्री), 'बृहस्पति आदिके रचित अर्थशास्त्र' का १ नाम है ॥

२ आख्यायिका, उपलब्ध्यार्था (२ स्त्री), 'आख्यायिका' के २ नाम हैं । । ('अनुभूत विषयको प्रतिपादन करनेवाले ग्रन्थको 'आख्यायिका'* कहते हैं, जैसे—'कादम्बरी, वासवदत्ता·····') ॥

३ पुराणम् (न), 'पुराण' अर्थात् पांच लक्षणोंसे युक्त ग्रन्थ'का १ नाम है । ('सर्ग १, प्रतिसर्ग अर्थात् संहार २, वंश ३, मन्वन्तर ४ और वंशवर्णन ५, इन पांच लक्षणोंसे युक्त ग्रन्थको 'पुराण'‡ कहते हैं । 'पद्मपुराण १, ब्रह्मपुराण २, विष्णुपुराण ३, शिवपुराण ४, देवीभागवतपुराण ५, नारदपुराण ६, मारकण्डेयपुराण ७, अग्निपुराण ८, भविष्यपुराण ९, ब्रह्मवैवर्तपुराण १०, लिङ्गपुराण ११, वाराहपुराण १२, स्कन्दपुराण १३, वामनपुराण १४, कूर्मपुराण १५, मत्स्यपुराण १६ गरुड-पुराण १७, और ब्रह्माण्डपुराण १८, ये १८ 'पुराण'† हैं') ॥

तासां प्रतिपाद्यविषयाश्च विज्ञानादयस्तदाह—

'आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ ॥ १ ॥' इति ॥

* 'आख्यायिका कथावत्स्यात्कवेर्वंशादिकीर्तनम् ।
अस्यामन्यकवीनाञ्च वृत्तं पद्यं क्वचित्क्वचित् ॥ १ ॥
कथांशानां व्यवच्छेद आश्वास इति वध्यते ।
आर्यावक्त्रापवक्त्राणां छन्दसा येनकेनचित् ॥ २ ॥
अन्यापदेशेनाश्वासमुखे भावार्थसूचनम् ॥' इति ॥ सा० द० ६।३३४॥

† 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ १ ॥
इति अभि० चिन्ता० 'हैम' २।१६६ ॥

प्रतिसर्गः संहारोऽन्यत्स्पष्टम् । क्वचित् 'वंशानुचरितं चैवे'ति तृतीयपादस्थाने 'भूम्यादेश्चैव संस्थानम्' इति पाठभेदः ।

‡ तदुक्तं विष्णुपुराणे—

१ प्रबन्धकल्पना कथा २ प्रवह्लिका प्रहेलिका।

---

१ कथा (स्त्री), 'कथा' अर्थात् 'वाक्यविस्तारकी कल्पनावाले ग्रन्थ'का १ नाम है। ('जैसे—'रामायण, कथासरित्सागर, बृहत्कथामञ्जरी,.....') ॥

२ प्रवह्लिका (+प्रवल्हिका, प्रवल्ही, प्रश्नदूती, विपादिका),* प्रहेलिका (२ स्त्री), 'पहेली, बुझौवल' के २ नाम हैं। ('संस्कृतकी पहेली जैसे—'पानीयं पातुमिच्छामि त्वत्तः कमललोचने। यदि दास्यसि नेच्छामि न दास्यसि पिबाम्यहम्'। इस श्लोकमें दोनों 'दास्यसि' पदको दानार्थक मानकर 'दोगी' यह अर्थ करनेपर सन्देह होता है और एक 'दास्यसि' पदको उक्तार्थक तथा दूसरे 'दास्यसि' पदका 'दासी हो' यह अर्थ माननेपर संदेह दूर हो जाता है। हिन्दीकी पहेली जैसे—'सारी लुगड़ी जल गई, जला न एको तागा। घरके लड़के फँस गये, घर खिड़कीसे भागा' ॥ इस पद्यमें 'समूची लुगड़ी अर्थात् कन्थाके जलनेपर एक तागाका भी नहीं जलना, चैतन्य गृहवासियोंका फँस जाना और अचैतन्य घरका भाग जाना, ये सब सन्देह उत्पन्न होते हैं; किन्तु 'जल गया' इस शब्दका 'जलमें गया' ऐसा अर्थ करनेपर एक तागाका भी नहीं जलना असन्देहार्थक है, तथा जालमें चैतन्य मछलियोंका फँस जाना और जालके छिद्ररूपी खिड़कीसे पानीरूपी मछलियोंके घरका भाग जाना ऐसा अर्थ करनेसे कोई सन्देह नहीं होता है, इसी तरह प्रत्येक भाषामें 'पहेली' होती है') ॥

'अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। पाद्मं ब्राह्मं वैष्णवञ्च शैवं भागवतं तथा ॥१॥ तथाऽन्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्। आग्नेयमष्टमं चैव भविष्यं नवमं स्मृतम् ॥२॥ दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं तथा। वाराहं द्वादशञ्चैव स्कान्दञ्चात्र त्रयोदशम् ॥३॥ चतुर्दशं वामनकं कौर्मं पञ्चदशं स्मृतम्। मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततः परम् ॥४॥' इति ॥

प्रत्येकपुराणस्य श्लोकसङ्ख्याविषयादिज्ञानार्थं विष्णुपुराणस्य त्रिपञ्चाशत्तमोऽध्यायो द्रष्टव्य इति।

*तदुक्तम्—'व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनम्।
यत्र वाह्यार्थसम्बद्धं कथ्यते सा प्रहेलिका ॥ १ ॥' इति ॥

१ स्मृतिस्तु धर्मसंहिता २ समाहृतिस्तु संग्रहः ॥ ६ ॥
३* समस्या तु समासार्था ४ किंवदन्ती जनश्रुतिः ।
५ वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥ ७ ॥

---

१ स्मृतिः (स्त्री), 'स्मृति शास्त्र' अर्थात् 'मनु आदिके बनाये हुए धर्म-ग्रन्थ'का १ नाम है । (मनुस्मृति आदि २० या इससे भी अधिक † स्मृतियां हैं') ॥

२ समाहृतिः (स्त्री) ‡संग्रह (पु), 'संग्रह ग्रन्थ' के २ नाम हैं । ('जैसे—'हितोपदेश, पञ्चतन्त्र,·····') ॥

३ समस्या, समासार्था (+ 'असमासार्था' । २ स्त्री), 'समस्या' के २ नाम हैं । ('पद्यपूर्तिके लिये पद्यका थोड़ा अंश जो कहा जाय, उसे 'समस्या' कहते हैं, जैसे—'टटंटटंटंटटंटंटटंटः' यह थोड़ा पद्यांश कहा गया है, इसे पूरा करनेपर 'राज्याभिषेके मदविह्वलाया हस्तच्युतो हेमघटो युवत्याः । सोपान-मार्गेषु करोति शब्दं टटंटटंटंटटंटंटटंटः' यह पद्य होता है । यह भी प्रत्येक भाषामें होती है') ॥

४ किंवदन्ती, जनश्रुतिः (२ स्त्री), 'लोगोंमें बातचीतके चलने, होरा हो जाने, लोकनिन्दा, या लोकोक्ति' के २ नाम हैं ॥

५ वार्त्ता, प्रवृत्तिः (२ स्त्री), वृत्तान्तः, उदन्तः (२ पु), 'बात'के ४ नाम हैं ॥

६ आह्वयः (पु), आख्या, आह्वा (२ स्त्री), अभिधानम् , नामधेयम् ,

---

* 'समस्या त्वसमासार्था·····' इति पाठान्तरम् ॥

† मनुर्यमो वसिष्ठोऽत्रिर्दक्षो विष्णुस्तथाङ्गिराः ।
उशना वाक्पतिर्व्यास आपस्तम्बोऽथ गौतमः ॥ १ ॥
कात्यायनो नारदश्च याज्ञवल्क्यः पराशरः ।
संवर्त्तश्चैव शङ्खश्च हारीतो लिखितस्तथा ॥ २ ॥' इति ॥
एता विंशतिराख्याता **धर्मशास्त्रप्रवर्त्तकाः** ।

क्वचित् 'नारदश्च' इत्यस्य स्थाने 'शातातपश्च' इति पाठः । 'मन्वादिस्मृतयो यास्तु षट्त्रिंशत्परिकीर्त्तिताः' इति भविष्यपुराणे गुहं प्रति विष्णूक्तेस्तासां षट्त्रिंशत्सङ्ख्या वा बोध्या ॥

‡ 'विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः ॥ १ ॥' इति ॥

आख्याह्वे अभिधानं च नामधेयं च नाम च।
१ हूतिराकारणाऽऽह्वानं २ संहूतिर्बहुभिः कृता ॥ ८ ॥
३ विवादो व्यवहारः स्याऽऽदुपन्यासस्तु वाङ्मुखम्।
५ उपोद्घात उदाहारः ६ शपनं शपथः पुमान् ॥ ९ ॥
७ प्रश्नोऽनुयोगः पृच्छा च ८ प्रतिवाक्योत्तरे समे।
९ मिथ्याभियोगोऽभ्याख्यान१०मथ मिथ्याभिशंसनम् ॥ १० ॥

नाम (= नामन्। ३ न। + संज्ञा, स्त्री), 'नाम' के ६ नाम हैं ॥

१ हूतिः, आकारणा (२ स्त्री), आह्वानम् (न), 'बुलाने या पुकारने' के ३ नाम हैं।

२ संहूतिः (स्त्री), 'इकट्ठा होकर बहुत लोगोंके पुकारने'का १ नाम है ॥

३ विवादः, व्यवहारः (२ पु), 'विवाद या झगड़ा' अर्थात् 'लेन, देन इत्यादि किसी विरुद्ध विषयोंको लेकर परस्पर विरुद्ध भाषण करने या मुकदमे-बाजी' के २ नाम हैं ॥

४ उपन्यासः (पु), वाङ्मुखम् (न), 'बातको प्रारम्भ करने'के २ नाम हैं ॥

५ उपोद्घातः, उदाहारः (२ पु), 'कही जानेवाली बातकी सिद्धिके लिये भूमिका बाँधने, या दृष्टान्त आदि देने' के २ नाम हैं ॥

६ शपनम् (न), शपथः (पु) 'शपथ कसम' के २ नाम हैं ॥

७ प्रश्नः, अनुयोगः, (२ पु), पृच्छा (स्त्री), 'प्रश्न' के २ नाम हैं ॥

८ प्रतिवाक्यम्, उत्तरम् (२ न), 'उत्तर, जवाब' के २ नाम हैं ॥

९ मिथ्याभियोगः (पु), अभ्याख्यानम् (न), 'किसीपर झूठा आक्षेप करने' के २ नाम हैं ॥ (जैसे—'कुछ नहीं लिये हुए किसी आदमी-पर तुमने अमुक चीज़ ली है, इत्यादि आक्षेप करना,.....') ॥

१० मिथ्याभिशंसनम् (न), अभिशापः (पु। + शापः), 'किसीके ऊपर पापविषयक झूठा सन्देह करने' के २ नाम हैं। ('जैसे—किसीने परदारागमन या मद्यपान इत्यादि नहीं किया है; किन्तु उसपर परदारागमन या मद्यपान आदि करनेका सन्देह करना,.....') ॥

अभिशापः १ प्रणादस्तु शब्दः स्यादनुरागजः ।
२ *यशः कीर्तिः समज्ञा च ३ स्तवः स्तोत्रं नुतिः स्तुतिः ॥ ११ ॥
४ आम्रेडितं द्विस्त्रिरुक्त ५ मुच्चैर्घुष्टं तु घोषणा ।
६ काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १२ ॥
७ अवर्णक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३ ॥
८ पारुष्यमतिवादः स्याद्—

---

१ प्रणादः (पु), 'गुणक प्रेमसे कहे हुए शब्द' अर्थात् 'वाहवाही या शाबासी देने' का १ नाम है ॥

२ यशः (= यशस्, न), कीर्त्तिः, समज्ञा (+ समाज्ञा, समज्या । २ स्त्री), 'कीर्ति, यश' के ३ नाम हैं । (जीवित व्यक्तिकी ख्यातिको 'यश' तथा मृत व्यक्तिकी ख्यातिको 'कीर्त्ति' कहते हैं, ऐसा मनुस्मृतिके टीकाकार कुल्लूक भट्टने कहा है ।) ॥

३ स्तवः (पु), स्तोत्रम् (न), नुतिः, स्तुतिः (+ प्रशंसा । २ स्त्री), 'स्तुति' के ४ नाम हैं ॥

४ ‡आम्रेडितम् (न), 'एक ही शब्दको दो या तीन बार कहने' का १ नाम है । (जैसे—साँप साँप, दौड़ो दौड़ो,·····') ॥

५ उच्चैर्घुष्टम् (न), घोषणा (स्त्री), 'ऊँचे स्वरसे घोषणा करने' के २ नाम हैं ।

६ काकुः (स्त्री), 'शोक, डर या काम इत्यादिके कारण विकृत ध्वनिसे बोलने' का १ नाम है । 'जैसे-उपकृतं बहु तत्र किमुच्यते·····' अर्थात् किसी बुराई करनेवालेसे—'आपने हमारा बड़ा उपकार किया' इत्यादि वचन कहना,·····') ॥

७ अवर्णः, आक्षेपः, निर्वादः, परीवादः (+ परिवादः), अपवादः (+ अ-वद्वादः), उपक्रोशः (६ पु), जुगुप्सा, कुत्सा, निन्दा (३ स्त्री), गर्हणम् (न), 'निन्दा, शिकायत' के १० नाम हैं ॥

८ पारुष्यम् (न), अतिवादः (पु), 'कटु वचन या कड़ाईसे बोलने' के २ नाम हैं ॥

---

* 'यशः कीर्तिः समज्या च·····' इति पाठान्तरम् ।

+ एतदर्थं मनुस्मृतेर्मन्वर्थमुक्तावली (८।१२७) टीका द्रष्टव्या ।

‡ 'तस्य परमाम्रेडितम्' (पा० सू० ८।१।२) इत्यनेनेत्यवधेयम् ॥

—१ भर्त्सनं त्वपकारगीः।
२ यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥ १४ ॥
३ तत्र त्वाचारणा यः स्यादाक्रोशो मैथुनं प्रति।
४ स्यादाभाषणमालापः ५ प्रलापोऽनर्थकं वचः ॥ १५ ॥
६ अनुलापो मुहुर्भाषा ७ विलापः परिदेवनम्।
८ विप्रलापो विरोधोक्तिः ९ संलापो भाषणं मिथः ॥ १६ ॥
१० सुप्रलापः सुवचन ११ मपलापस्तु निह्नवः।

---

१ भर्त्सनम् (न), अपकारगीः (= अपकारगिर्, स्त्री), 'फटकारने' के २ नाम हैं ॥

२ परिभाषणम् (न), 'शिकायत करते हुए दोषको कहने' का १ नाम है ॥

३ आचारणा (स्त्री । + न), 'परपुरुषगमन या परस्त्री-गमन-विषयक दोष लगाने' का १ नाम है ॥

४ आभाषणम् (न), आलापः (पु), 'प्रेमसे बात करने' के २ नाम हैं ॥

५ प्रलापः (पु), 'प्रलाप करने, बड़बड़ाने' का १ नाम है ॥

६ अनुलापः (पु), मुहुर्भाषा (स्त्री), 'एक ही विषयको बार-बार कहने' के २ नाम हैं।

७ विलापः (पु । + विलपनम्, न), परिदेवनम् (न । + स्त्री), 'रोते हुए बोलने' के ३ नाम हैं ॥

८ विप्रलापः (पु), विरुद्धोक्तिः (स्त्री), 'परस्पर विरुद्ध बात कहने' के २ नाम हैं ॥

९ संलापः (पु), 'परस्परमें बात करने' का १ नाम है। ('आलाप' एक आदमी भी कर सकता है; किन्तु 'संलाप' एक आदमी नहीं कर सकता, यही आलाप और संलापमें भेद है') ॥

१० सुप्रलापः (पु), सुवचनम् (न), 'मीठे वचन' के २ नाम हैं ॥

११ अपलापः, निह्नवः (२ पु), 'असल विषयको छिपानेके लिये मुकर जाने' के २ नाम हैं ॥

१ *'चोद्यमाक्षेपाभियोगौ २ शापाक्रोशौ दुरेषणा (४६)
३ अस्त्री चाटु चटु ४ श्लाघा प्रेम्णा मिथ्याविकत्थनम् (४७)
५ सन्देशवाग्वाचिकं स्या ६ द्वाग्भेदास्तु त्रिषूत्तरे ॥ १७ ॥
७ †रुषती वागकल्याणी८ स्यात्कल्या तु शुभात्मिका ।
९ अत्यर्थमधुरं सान्त्वं—

---

१ [चोद्यम् (न), आक्षेपः, अभियोगः (२ पु), 'आक्षेप' के २ नाम हैं] ॥

२ [शापः, आक्रोशः (२ पु), दुरेषणा (स्त्री), 'शाप देने' के ३ नाम हैं] ॥

३ [चाटु, चटु (२ पु न), 'मुंहदेखी बात कहने, चापलूसी करने' के २ नाम हैं] ॥

४ [श्लाघा (स्त्री) 'प्रेमसे झूठी स्तुति करने' का १ नाम है] ॥

५ सन्देशवाक् (= सन्देशवाच्, स्त्री), वाचिकम् (न) 'संदेश कहने' के २ नाम हैं ॥

६ यहां से '·····त्रिषु तद्वति (१।६।२२) तक सब शब्द त्रिलिङ्ग हैं ॥

७ रुषती (त्रि । + रुशती, उपती मु० म० । यह 'रुषती' स्त्रीलिङ्गका रूप है, पुंल्लिङ्गमें 'रुषन्' और नपुंसकलिङ्गमें 'रुषत्' रूप होता है । इसी तरह आगे कहे जानेवाले शब्दोंके भी तीनों लिङ्गमें भिन्न २ रूप होंगे, उन्हें स्वयं समझ लेना चाहिये'), 'अशुभ वचन' का १ नाम है ॥

८ कल्या (त्रि । + काल्या), 'शुभ वचन' का १ नाम है ॥

९ सान्त्वम् (त्रि), 'अत्यन्त मधुर वचन' का १ नाम है ॥

---

* 'चोद्यमाक्षेप·····विकत्थनम्' अयमंशः क्षी० स्वा० टीकायामुपलभ्यते ॥

† 'उपती वागकल्याणी·····' इति मुकुटसम्मतं पाठान्तरम् । अत्र '(रुषती) हिंस्रेत्यर्थः, न तां वदेदुपतीं (गां) पापलोक्यान्, अत एव 'उपती'ति असभ्यः पाठः' इति क्षी० स्वा० । 'मुकुटस्तु 'उपती'ति पाठे 'उप दाहे' इत्यस्य शवन्तस्य 'उपती' इति रूपमाह, तत्र । तस्माच्छपि 'कर्तरि शप्' (पा० सू० ३।१।६८) 'तुजन्तलघु—(पा० सू० ७।३।८६) इति गुणस्य 'शप्श्यनोर्नित्यम्' (पा० सू० ७।१।८१) इति नुमश्च प्रसङ्गात्' इति भा० दी० । तन्नेति भा० दी० प्रतीकमादाय 'गुणस्य संज्ञापूर्वकत्वेन नुम आगमशासनत्वेन तेनैव वारितत्वेनाकिञ्चित्करमेतत् । पीयूषव्याख्यायामपि 'उपती' इति पाठं प्रदर्श्य 'रुशती' इत्येके—इत्युक्तम्' इति शि० द० इत्युक्तम् ॥

—१ सङ्गतं हृदयङ्गमम् ॥ १८ ॥
२ निष्ठुरं परुषं ३ ग्राम्यमश्लीलं ४ सूनृतं प्रिये।
सत्येऽथ सङ्कुलक्लिष्टे परस्परपराहते ॥ १९ ॥
६ लुप्तवर्णपदं ग्रस्तं ७ निरस्तं त्वरितोदितम्।
८ *अम्बूकृतं सनिष्ठीव ९ मवद्धं स्यादनर्थकम् ॥ २० ॥
१० अनक्षरमवाच्यं स्या११दाहतं तु मृषार्थकम्।

---

१ सङ्गतम्, हृदयङ्गमम् (२ त्रि), 'संगतियुक्त वचन, मौकेकी बात' के २ नाम हैं ॥

२ निष्ठुरम्, परुषम् (२ त्रि), 'निष्ठुर वचन' के २ नाम हैं ॥

३ ग्राम्यम्, अश्लीलम् (२ त्रि), 'भाँड़ आदिके कहे हुए सभ्यता-विरुद्ध वचन' के २ नाम हैं ॥

४ सूनृतम् (त्रि), 'सत्य और प्रिय वचन' का १ नाम है ॥

५ सङ्कुलम्, क्लिष्टम्, परस्परपराहतम् (भा० दी० म० । ३ त्रि), 'विरुद्धार्थक या बेमौकेकी बात' के ३ नाम हैं ॥

६ लुप्तवर्णपदम्, ग्रस्तम् (भा० दी० म० । २ त्रि), 'रोगी, बालक या असमर्थके कहे हुए अधूरे वचन' के २ नाम हैं।

७ निरस्तम्, त्वरितोदितम् (भा० दी० म० । २ त्रि), शीघ्रतासे कहे हुए वचन' के २ नाम हैं ॥

८ अम्बूकृतम्, सनिष्ठीवम् (भा० दी० म० सनिष्ठेवम् । २ त्रि), 'थूकका छींटा निकलते हुए कहे गये वचन' के २ नाम हैं ॥

९ अवद्धम् (+अवध्यम्), अनर्थकम् (भा० दी० म० । २ त्रि), 'अनर्थक वचन' अर्थात् 'विना मतलबकी बात' के २ नाम हैं ॥

१० अनक्षरम्, अवाच्यम् (२ त्रि), 'नहीं कहने योग्य वचन' के २ नाम हैं ॥

११ आहतम्, मृषार्थकम् (भा० दी० म० । २ त्रि), 'अत्यन्त झूठे वचन' के नाम हैं। (जैसे—बन्ध्याका वह लड़का, आकाशपुष्पका मुकुट पहने हुए, मृगतृष्णाके जलमें स्नानकर, कच्छपीदुग्धको पीनेके उपरान्त, शशशृङ्गके बाजाको

---

* 'अम्बूकृतं सनिष्ठेवमवध्यं स्यादनर्थकम्' इति पाठान्तरम् ॥

१* 'सोल्लुण्ठनं तु सोत्प्रासं २ भणितं रतिकूजितम् (४८)
३ श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम्'(४९)
४ अथ श्लिष्टमविस्पष्टं ५ वितथं त्वनृतं वचः ॥ २१ ॥
६ सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।
७ शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ॥ २२ ॥
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ।
आरवारावसंरावविरावा ८ अथ मर्मरः ॥ २३ ॥
स्वनिते वस्त्रपर्णानां ९ भूषणानां तु शिञ्जितम् ।

बजाकर अष्टम स्वरसे गान किया तो, उसे पराद्धसे अधिक रुपया पारितोषिक मिला,.....') ॥

१ [सोल्लुण्ठनम्, सोत्प्रासम् (२ त्रि), 'हँसीकी बात'के २ नाम हैं] ॥

२ [भणितम् (+ मणितम्), रतिकूजितम् (२ त्रि), 'रति-कालमें किये हुए शब्द'के २ नाम हैं] ॥

३ [श्राव्यम्, हृद्यम्, मनोहारि (= मनोहारिन्), विस्पष्टम्, प्रकटोदितम् (५ त्रि), 'स्पष्ट वचन' के ५ नाम हैं। (म० से 'श्राव्यम्' आदि ३ नाम 'मनोहर वचन' के हैं और शेष 'विस्पष्टम्' आदि २ नाम उक्तार्थक हैं')] ॥

४ श्लिष्टम्, अविस्पष्टम् (२ त्रि) 'अस्पष्ट वचन' के २ नाम हैं ॥

५ वितथम्, अनृतम् (२ त्रि), 'झूठे वचन' के २ नाम हैं ॥

६ सत्यम्, तथ्यम्, ऋतम्, सम्यक् (= सम्यञ्च्। ४ त्रि), 'सत्य वचन' के ४ नाम हैं। ये चार शब्द द्रव्यवाचक होनेपर त्रिलिङ्ग होते हैं। ('जैसे-सत्यः पुरुषः, सत्या नारी, सत्यं कुलम्,.....') ॥

७ शब्दः, निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः, स्वानः, निर्घोषः, निर्ह्रादः, नादः, निस्वानः, निस्वनः, आरवः, आरावः, संरावः, विरावः (१७ पु), 'शब्द' के १७ नाम हैं ॥

८ मर्मरः (पु), 'कपड़े या सूखे पत्तोंके शब्द' का १ नाम है ॥

९ शिञ्जितम् (न। + स्वामी म० 'शिञ्जा'), 'आभूषणके शब्द'का १ नाम है ॥

---

* 'सोल्लुण्ठनं.....प्रकटोदितम्' अयमंशः क्षी० स्वा० टीकायामुपलभ्यते। 'सोल्लुण्ठनं.....कूजितम्' इत्येतावन्मात्रोंऽशो भा० दी० व्याख्यातम् ॥

१ निक्काणो निक्कणः क्काणः क्कणः क्कणनमित्यपि ॥ २४ ॥
वीणायाः क्वणिते २ प्रादेः प्रक्काणप्रक्कणादयः ।
३ कोलाहलः कलकलश्चिरञ्चां वाशितं रुतम् ॥ २५ ॥
५ स्त्री प्रतिश्रुत्प्रतिध्वाने ६ गीतं गानमिमे समे ।
इति शब्दादिवर्गः ॥ ६ ॥

७. अथ नाट्यवर्गः ।

७ निषादर्षभगान्धारषड्जमध्यमधैवताः ।

---

१ निक्काणः, निक्कणः, क्काणः, क्कणः (४ पु), क्कणनम् (न), 'वीणा आदिके शब्द' के ५ नाम हैं ॥

२ इन 'निक्काण' आदि शब्दोंके 'प्र' आदि (आदिसे 'उप, सु' इत्यादिका संग्रह है) उपसर्ग जोड़नेसे बने हुए 'प्रक्काणः, प्रक्कणः' आदि (आदि शब्दसे 'प्रक्कणनम्, उपक्कणः, उपक्काणः, उपक्कणनम्·····'का संग्रह है) शब्द भी उसी अर्थमें होते हैं । ('भा० दी० मतमें 'शिञ्जितम्·····' आदि ६ नाम 'भूषणादिके शब्द' के हैं, 'प्रक्काण' आदि 'वीणादिके शब्द' के हैं'*) ॥

३ कोलाहलः, कलकलः (२ पु०), 'कोलाहल, शोरगुल' के २ नाम हैं ॥

४ वाशितम् (+ वासितम् । न), 'पक्षियोंके चहचहाने' अर्थात् 'शब्द करने'का १ नाम है ॥

५ प्रतिश्रुत् (स्त्री), प्रतिध्वानः (+ प्रतिध्वनिः । पु), 'प्रतिध्वनित शब्द' के २ नाम हैं । ('ऐसा शब्द पहाड़ आदिकी गुफामें या मन्दिरोंमें होता है') ॥

६ गीतम्, गानम् (२ न), 'गाना' के २ नाम हैं ॥

इति शब्दादिवर्गः ॥ ६ ॥

७. अथ नाट्यवर्गः ॥

७ निषादः, ऋषभः, गान्धारः, †षड्जः, ‡मध्यमः, धैवतः,

---

* चिन्त्यमेतत्, 'क्वणो वीणायाञ्च' (पा० सू० ३।३।६५) इति 'च'कारस्य, 'नौ अनुपसर्गे' इत्यनुकर्षणार्थकत्वात् क्षी० स्वा० महे० रा० कु० दी० कृतपूर्वव्याख्यानस्यैवौचित्यात् ॥

† 'नासां कण्ठमुरस्तालुं जिह्वां दन्तांश्च संस्पृशन् ।
षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः' ॥ १ ॥ इति ॥

‡ 'तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः ।
नाभिं प्राप्तो महानादो मध्यस्थस्तेन मध्यमः' ॥ २ ॥ इति ॥

पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥
१ काकली तु कले सूक्ष्मे २ ध्वनौ तु मधुरास्फुटे ।
कलो ३ मन्द्रस्तु गम्भीरे ४ तारोऽत्युच्चेस्त्रयस्त्रिषु ॥ २ ॥
५ *'नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः (५०)
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते' (५१)
६ समन्वितलयस्त्वेकतालो ७ वीणा तु वल्लकी ।

†पञ्चमः (७ पु), ये, ७ 'वीणा आदिके तार तथा प्राणियोंके कण्ठसे निकले हुए स्वरोंके भेद' हैं ॥

१ काकली (+ काकलिः । स्त्री), 'मधुर ध्वनि' का १ नाम है ॥

२ कलः (त्रि), 'अस्पष्ट मधुर ध्वनि' का १ नाम है ॥

३ मन्द्रः (+ मद्रः । त्रि), 'गम्भीर ध्वनि' का १ नाम है ॥

४ तारः (त्रि), 'अत्यन्त ऊँचे शब्द' का १ नाम है ॥

५ [मनुष्योंके हृदयमें बाइस प्रकारकी ध्वनियाँ रहती हैं, उनमें कण्ठके बीच वालीको 'मन्द्रः' (त्रि) 'मन्द्र' और शिरके बीचमें रहनेवालीको 'तारः' (त्रि), 'तार' कहते हैं] ॥

६ एकतालः (पु), 'गति और बाजाओंके लयको एक स्वरमें मिलाने' का १ नाम है ॥

७ वीणा, वल्लकी, विपञ्ची (३ स्त्री), ‡'वीणा' के ३ नाम हैं ॥

---

* 'नृणामुरसि'.....गीयते' इत्यंशः केवलं महेश्वरव्याख्याते पुस्तके समुपलभ्यते, किन्तु सर्वैरप्यव्याख्यातोऽयमित्यवधेयम् ॥

† 'वायुः समुद्गतो नाभेरुरोवक्त्रकण्ठमूर्द्धसु ।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते' ॥ १ ॥ इति ॥

अथ प्रसङ्गात्कुतः २ स्थानात्कस्य २ स्वरस्याविर्भाव इत्यत्र नारदोक्तिः प्रदर्श्यते—

'षड्जं रौति मयूरस्तु गावो नर्दन्ति **चर्षभम्** ।
अजाविकौ **च गान्धारं** क्रौञ्चो वदति **मध्यमम्** ॥ १ ॥
पुष्पसाधारणे काले कोकिलो रौति **पञ्चमम्** ।
अश्वस्तु **धैवतं** रौति **निषादं** रौति कुञ्जरः' ॥ २ ॥ इति ॥

पुष्पसाधारणे काले वसन्तर्त्तौ इत्यर्थः ॥

‡ कस्य २ वीणायाः कानि २ नामानीत्यत्र हैमोक्तं प्रदर्श्यते—

विपञ्ची १ सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ३ ॥
२ ततं वीणादिकं वाद्य३मानद्धं मुरजादिकम् ।
४ *वंशादिकं तु सुषिरं ५ कांस्यतालादिकं घनम् ॥ ४ ॥
६ चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।

---

१ परिवादिनी (स्त्री), 'सितार' अर्थात् 'सात तारवाली वीणा' का १ नाम है ॥

२ ततम् (न), 'वीणा आदि बाजाओं' का १ नाम है । ('आदि पदसे 'सैरन्ध्री, रावणहस्त, एकतारा, सारंगी, इसराज, बेला, तानपूरा,·····' का संग्रह है') ॥

३ आनद्धम् (+अवनद्धम् । न), 'जो चमड़ेसे मढ़े गये हों, उन मुरज आदि बाजाओं' का १ नाम है । ('जैसे—मुरज, पटह, ढोल, तबला,·····') ॥

४ सुषिरम् (+शुषिरम् । न), 'वंशी आदि बाजाओं' का १ नाम है । ('आदि पदसे 'शङ्ख, मुरली; तुतुही, सींगा, वेन·····' का संग्रह है') ॥

५ घनम् (न), 'झड़ी, घण्टा आदि बाजाओं' का १ नाम है । ('आदि पदसे 'घण्टी, झाल, जोड़ी, मंजीरा,···' का संग्रह है') ॥

६ वादित्रम्, आतोद्यम् (२ न), 'पूर्वोक्त 'तत १, आनद्ध २, सुषिर ३ और घन ४' इन चार प्रकारके बाजाओं' के २ नाम हैं ॥

'शिवस्य वीणा नालम्बी सरस्वत्यास्तु कच्छपी ॥
नारदस्याथ महती गणानान्तु प्रभावती ।
विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती ।
चाण्डालानां तु कण्डोलवीणा चाण्डालिकाऽपि सा' ॥ इति ॥
अ० चि० म० 'हैम' २ । २०२–२०४ ॥

* 'वंशादिकं तु शुषिरं·····' इति भा० दी० प्राच्यसम्मतं पाठान्तरम्, क्षी० स्वा० महे० सम्मतं तु मूलोक्तमित्यवधेयम् ॥

† तथा च भरतः—
'ततञ्चैवावनद्धं च घनं शुषिरमेव च । चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम्' ॥१॥ इति ॥

१ मृदङ्गो मुरजो २ भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकाख्ययः ॥ ५ ॥
३ स्याद्यशःपटहो ढक्का ४ *भेरी स्त्री दुन्दुभिः पुमान् ।
५ आनकः पटहोऽस्त्री स्यादुत्कोणो वीणादिवादनम् ॥ ६ ॥
७ वीणादण्डः प्रवालः स्यान्तक्कुभस्तु प्रसेवकः ।
८ कोलम्बकस्तु कायोऽस्या १० उपनाह्यो निबन्धनम् ॥ ७ ॥

---

१ मृदङ्गः, मुरजः (२ पु), 'मृदङ्ग' के नाम हैं ॥

२ अङ्क्यः, आलिङ्ग्यः, ऊर्ध्वकः (३ पु), ये ३ 'मृदङ्गके भेद' हैं । ('हरीतकीके समान आकारवाला †'अङ्क्य', यवके मध्यभागके समान आकार वाला ‡'ऊर्ध्वक' और गोपुच्छके समान आकारवाला §'आलिङ्ग्य' होता है') ॥

३ यशःपटहः (पु), ढक्का (स्त्री), 'नगाड़ा' के २ नाम हैं ॥

४ भेरी (+ भेरिः, भम्भा । स्त्री), दुन्दुभिः (पु । आनकः, दुन्दुभिः । २ पु) 'दुन्दुभि' के २ नाम हैं ॥

५ आनकः, पटहः (२ पु), 'पटह' के २ नाम हैं ॥

६ कोणः (पु), 'वीणा, बेला, सारङ्गी या इसराज आदि बजानेके लिये काठकी बनाई हुई धनुही' का १ नाम है ॥

७ वीणादण्डः (भा० दी० म०), प्रवालः (२ पु), 'वीणादण्ड' के २ नाम हैं ॥

८ कक्कुभः, प्रसेवकः (२ पु), 'वीणाके नीचेवाले, चमड़ा आदिसे ढके हुए भाण्ड' के २ नाम हैं ॥

९ कोलम्बकः (पु), 'वीणाका ढाँचा' अर्थात् 'तार रहित वीणाके दण्डादि समुदाय' का १ नाम है ॥

१० उपनाहः (पु), निबन्धनम्, (न । भा० दी० म०), 'जहाँ वीणाका तार बांधा जाता है, उस जगह' के २ नाम हैं ॥

---

* ·····'भेर्यामानकदुन्दुभौ' इति भा० दी० सम्मतः पाठः । तत्र भेर्यानकदुन्दुभिशब्दान् पृथक् २ व्याख्याय 'द्वे भेर्याः' इति तदुक्तिश्चिन्त्या 'श्रोणि भेर्य्याः' इत्युक्तेरौचित्याच्च ॥

† ‡ § तदुक्तम्—'हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः ।
आलिङ्ग्यश्चैव गोपुच्छसमानः परिकीर्तितः' ॥ १ ॥ इति ॥

१ वाद्यप्रभेदा डमरु-मड्डु-डिण्डिम-झर्झराः।
मर्दलः पणवोऽन्ये च २ नर्तकीलासिके समे ॥ ८ ॥
३ विलम्बितं द्रुतं मध्यं तत्त्रय४मोघो ५ घनं क्रमात्।
६ तालः कालक्रियामानं ७ लयः साम्यन्मथाऽस्त्रियाम् ॥ ९ ॥
ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने।
९ तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥ १० ॥

---

१ डमरुः, मड्डुः, डिण्डिमः, झर्झरः, मर्दलः, पणवः (६ पु), आदि ('आदि पदसे 'गोमुखः, दुदुकः·····' का संग्रह है') 'डमरु, मड्डु अर्थात् जलतरङ्ग, डुगडुगी, झांझ, मर्दल, ढोल आदि बाजाओं' का क्रमशः १-१ नाम है ॥

२ नर्तकी, लासिका (२ स्त्री । 'वस्तुतः ये दोनों शब्द त्रिलिङ्ग हैं, किन्तु स्त्रीलिङ्गमें रूपप्रदर्शनके लिये स्त्रीलिङ्ग कहा गया है, पु० में 'नर्तकः, लासकः' न० में 'नर्तकम्, लासकम्' ऐसे रूप होते हैं'), 'नाचनेवाले' के २ नाम हैं ॥ ('जैसे—'कत्थक, छोकड़ा, वेश्या·····') ॥

३ तत्त्रयम् (न), 'विलम्बसे नाचने, गाने और बजाने' का १ नाम है ॥

४ ओघः (पु), 'जल्दी २ नाचने, गाने और बजाने' का १ नाम है ॥

५ घनम् (न), 'सामान्य समय (मध्यम गति) से नाचने, गाने और बजाने' का १ नाम है ॥

६ तालः (पु), 'ताल' अर्थात् 'जिसमें समय और क्रियाकी कमी-बेशीका प्रमाण रहता है, उस'का १ नाम है ॥

७ लयः (पु) 'लय' अर्थात् 'जिसमें गाने बजाने और हाथ, भ्रू आदि चलाकर भाव दिखलानेके लिये समय और क्रियाकी कमी-बेशीका प्रमाण रहता है, उस'का १ नाम है ॥

८ ताण्डवम् (पु न), नटनम्, नाट्यम्, लास्यम्, नृत्यम् (+ नृत्तम्), नर्तनम् (५ न), 'नाचने' के ६ नाम हैं ॥

९ तौर्यत्रिकम्, नाट्यम् (२ न), 'नाचना, गाना और बजाना; इन तीनोंके समुदाय' के २ नाम हैं ॥

१ भ्रकुंसश्च भृकुंसश्च भ्रूकुंसश्चेति नर्तकः।
स्त्रीवेषधारी पुरुषो २ नाट्योक्तौ ३ गणिकाऽज्जुका ॥ ११ ॥
४ भगिनीपतिरावुत्तो ५ भावो विद्वान्६थावुकः।
जनको ७ युवराजस्तु कुमारो भर्तृदारकः ॥ १२ ॥
८ राजा भट्टारको देवः८स्तत्सुता भर्तृदारिका।
१० देवी कृताभिषेकाया ११ मितरासु तु भट्टिनी ॥ १३ ॥

---

१ भ्रकुंसः, भृकुंसः, भ्रूकुंसः (+ भृकुंसः। ३ पु), स्त्रीका रूप बनाकर नाचनेवाले पुरुष' के ३ नाम हैं ॥

२ 'नाट्योक्तौ' इस पदका 'अङ्कहारः' (१।७।१६) के पहलेतक अधिकार होनेसे आगे कहे जानेवाले नामोंका प्रयोग नाटकमें ही होगा, अन्यत्र नहीं ॥

३ गणिका, अज्जुका (२ स्त्री) 'वेश्या' के २ नाम हैं ॥

४ आवुत्तः (+ आवूत्तः। पु), 'बहनोई' अर्थात् 'बहनके पति' का १ नाम है ॥

५ भावः (पु), विद्वान्' का १ नाम है ॥

६ आवुकः (पु), 'पिता' का १ नाम है ॥

७ युवराजः, कुमारः (२ पु। म० कुमारः, भर्तृदारकः) 'युवराज' के २ नाम हैं ॥

८ भट्टारकः, देवः (२ पु), 'राजा' के २ नाम हैं ॥

९ भर्तृदारिका (स्त्री), 'राजकुमारी' का १ नाम है ॥

१० देवी (स्त्री), 'पटरानी' का १ नाम है ॥

११ *भट्टिनी (स्त्री), 'राजाकी दूसरी सामान्य स्त्रियों' का १ नाम है ॥

---

* अयमत्र प्रयोगक्रमः—

'गणिकानुचरैरज्जुकेति नाम्ना नृपेण सा। युवराजस्तु सर्वैश्च कुमारो भर्तृदारकः ॥ १ ॥
भट्टारको वा देवो वा वाच्यो भृत्यजनेन सः। ब्राह्मणेन तु नाम्नैव राजन्नित्यृषिभिः स च ॥ २ ॥
वयस्य राजन्निति वा विदूषक इमं वदेत्। अभिषिक्ता तु राज्ञाऽसौ देवीत्यन्या तु भोगिनी ॥ ३ ॥
भट्टिनीत्यपरैरन्या नीचैर्गोस्वामिनीति सा' ॥ इति ॥

१ अब्रह्मण्यमघध्योक्तौ २ *राजश्यालस्तु राष्ट्रियः।
३ अम्बा माताऽथ बाला स्याद्वासूश्रार्यस्तु मारिषः ॥ १४ ॥
६ अत्तिका भगिनी ज्येष्ठा ७ निष्ठानिर्वहणे समे।

---

१ अब्रह्मण्यम् (न), 'सर्वथा अवध्य ब्राह्मण इत्यादिको मारनेके दोषको कहने' का १ नाम है ॥

२ राष्ट्रियः (पु), 'राजाके शाले' का १ नाम है। ('इसे प्रायः नगरके कोतवालीका अधिकार मिलता है') ॥

३ अम्बा, माता (= मातृ। २ स्त्री), 'माता' के २ नाम हैं। ('नाट्योक्तौ' इस शब्दका अधिकार प्रायिक या विधि और नियम† है; अत एव नाटकस्थलसे भिन्न स्थलमें भी 'अम्बा, माता' इन शब्दोंका प्रयोग होता है' ॥)

४ बाला, वासूः (२ स्त्री) 'कुमारी' के २ नाम हैं ॥

५ आर्यः, मारिषः (+ मार्षकः। २ पु), 'अपनेसे श्रेष्ठ या सूत्रधारके पार्श्ववर्त्ती' के २ नाम हैं ॥

६ अत्तिका (+ अन्तिका। स्त्री), 'बड़ी बहन' का १ नाम है ॥

७ निष्ठा (स्त्री) ‡निर्वहणम् (न), 'नाटकके 'निर्वहण' नामक पांचवे सन्धि-विशेष या आरम्भ किये हुये विषयको पूरा करने' के २ नाम हैं ॥

---

* 'राजशालस्तु' इति महे० सम्मतः पाठः।

† नाट्यातिरिक्तस्थलेऽपि 'अम्बा' शब्दस्य, नाट्यस्थलेऽपि 'मातृ' शब्दस्य प्रयोगोपलब्धेर्नाट्यस्थलेऽम्बाशब्दस्य प्रचुरप्रयोगात्प्रायिकत्वम्, 'भट्टिन्यज्जुकात्तिके'त्यादीनान्तु नियमः। अत एव—

'अथैषां रूपकादीनामुक्तौर्वक्ष्याम्यशेषतः। कासुचिन्नियमस्तत्र विधिरेव तु कासुचित्' ॥ १ ॥

इति शब्दार्णवोक्तयोर्विधिनियमयोः सङ्गतिरित्यवधेयम् ॥

‡ तदुक्तं साहित्यदर्पणे—

'मुखं १ प्रतिमुखं २ गर्भो ३ विमर्शः ४ उपसंहृतिः ५।
इति पञ्चास्य भेदाः स्युः क्रमात्'। सा० द० ६। ७५-७६ ॥

उपसंहृतिर्निर्वहणमित्यर्थः। एतल्लक्षणञ्चोक्तं सुधाकरेण—

'मुखसन्ध्यादयो यत्र विकीर्णा बीजसंयुताः। महाप्रयोजनं यान्ति तन्निर्वहणमुच्यते' ॥१॥ इति

१ हण्डे २ हले ३ हलाऽऽह्वानं नीचां चेटीं सखीं प्रति ॥ १५ ॥
४ अङ्गहारोऽङ्गविक्षेपो ५ व्यञ्जकाभिनयौ समौ ।
६ निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकऽसात्त्विके ॥ १६ ॥
८ शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।

---

१ हण्डे (अ), 'नीचको बुलाने' का १ नाम है ॥
२ हले (अ), 'चेटी (दासी) को बुलाने' का १ नाम है ॥
३ हला (अ), 'सखीको बुलाने' का १ नाम है ॥

४ अङ्गहारः, अङ्गविक्षेपः (२ पु) 'नृत्य-विशेष' के २ नाम हैं। ('नाट्योक्तौ' इस पदका अधिकार यहींतक है, अतः आगे कहे जानेवाले शब्दों का प्रयोग नाटकसे भिन्न स्थलमें भी होगा') ॥

५ व्यञ्जकः, अभिनयः (२ पु) 'इशारा आदिसे मनके अभिप्रायको प्रकट करने' के २ नाम हैं ॥

६ आङ्गिकम् (त्रि), 'अङ्गके द्वारा किये गये कटाक्ष आदि' का नाम है ॥

७ सात्त्विकम् (त्रि), 'सत्त्वगुणसे उत्पन्न स्तम्भ आदि गुणों' का १ नाम है। ('स्तम्भ १, स्वेद (पसीना) २, रोमाञ्च ३, स्वरभङ्ग ४, वेपथु (कम्पन) ५, वैवर्ण्य ६, अश्रु ७ और प्रलय (मूर्च्छा) ८' ये ८ 'सात्त्विक गुण' हैं ॥

८ शृङ्गारः, वीरः, करुणः, अद्भुतः, हास्यः, भयानकः, बीभत्सः, रौद्रः

यथा वा साहित्यदर्पणे—
'बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्' ॥ १ ॥
इति सा० द० ६ । ८२—८१ ॥

* तदुक्तम्—'स्तम्भः १ स्वेदोऽथ रोमाञ्चः ३ स्वरभङ्गोऽथ वेपथुः ५ ।
वैवर्ण्यमश्रु ७प्रलय८ इत्यष्टौ सात्त्विका गुणाः ॥ १ ॥
इति सा० द० ३ । १३५-१३६ ॥

बीभत्सरौद्रौ च रसाः १ शृङ्गारः शुचिरुज्ज्वलः ॥ १७ ॥
२ उत्साहवर्धनो वीरः ३ कारुण्यं करुणा घृणा।
कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽप्यथो हसः ॥ १८ ॥
हासो हास्यं च ५ बीभत्सं विकृतं त्रिष्विदं द्वयम्।
६ विस्मयोऽद्भुतमाश्चर्यं चित्रमऽप्यथ भैरवम् ॥ १९ ॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्।

(८ पु) ये ८ 'शृङ्गार, वीर आदि' 'रसः' (पु) अर्थात् 'रस' हैं। (च शब्दसे नवम 'शान्तः' (पु) अर्थात् *'शान्त' रसका और मुनीन्द्रके मतसे दशम 'वात्सल्यम्' (न) अर्थात् †'वात्सल्य' रसका भी संग्रह है') ॥

१ शृङ्गारः, शुचिः, उज्ज्वलः, (३ पु), 'शृङ्गार रस' के ३ नाम हैं ॥

२ उत्साहवर्द्धनः, वीरः, (२ पु), 'वीर रस' के २ नाम हैं ॥

३ कारुण्यम् (न), करुणा, घृणा, कृपा, दया, अनुकम्पा (५ स्त्री), अनुक्रोशः (पु), 'करुण रस या दया' के ७ नाम हैं ॥

४ हसः, हासः (+ हासिका, स्त्री । २ पु), हास्यम् (न), 'हास्य रस' के ३ नाम हैं ॥

५ बीभत्सम्, विकृतम् (+ वैकृतः । २ त्रि), 'बीभत्स रस' के २ नाम हैं ॥

६ विस्मयः (पु), अद्भुतम्, आश्चर्यम् चित्रम् (३ त्रि), 'आश्चर्य या अद्भुत रस' के ४ नाम हैं ॥

७ भैरवम्, दारुणम्, भीषणम्, भीष्मम्, घोरम्, भीमम्, भयानकम्,

---

* साहित्यदर्पणे 'शान्त'स्यापि नवमरसत्वमङ्गीकृतम्। तद्यथा—
'शृङ्गार १ हास्य २ करुण ३ रौद्र ४ वीर ५ भयानकाः ६।
बीभत्सोऽद्भुत ८ इत्यष्टौ रसाः शान्तश्चतथा मतः' ॥ १ ॥
इति सा० द० ३। १८२ ॥

† मुनीन्द्रेण 'वात्सल्य'स्यापि दशमरसत्वमङ्गीकृतम्। तद्यथा—
'स्फुटं चमत्कारितया वत्सलं च रसं विदुः'। इति सा० द० ३ ॥ २७ ॥

भयङ्करं प्रतिभयं १ रौद्रं तूग्रमरमी त्रिषु ॥ २० ॥
चतुर्दश ३ दरत्रासो भीतिर्भीः साध्वसं भयम्।
४ विकारो मानसो भावो५ऽनुभावो भाववोधकः॥ २१ ॥
६ गर्वोऽभिमानोऽहङ्कारो ७ मानश्चित्तसमुन्नतिः।
८ 'दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः' (५२)
९ अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥
रीढाऽवमाननाऽवज्ञाऽवहेलनमसूर्त्तणम् ।

भयङ्करम्, प्रतिभयम्, (२ त्रि), 'भयानक रस' के २ नाम हैं ॥

१ रौद्रम्, उग्रम्, (२ त्रि), 'उग्र रस' के २ नाम हैं ॥

२ 'अद्भुतम्' यहाँसे लेकर 'उग्रम्' यहाँतक १४ शब्द 'रस'के अर्थमें प्रयुक्त होनेपर पुंल्लिङ्ग हैं और 'रसवाले'के अर्थमें प्रयुक्त होनेपर त्रिलिङ्ग हैं ॥

३ दरः, त्रासः (२ पु), भीतिः, भीः (+ भिया । २ स्त्री), साध्वसम्, भयम् (२ न), 'डर' के ६ नाम हैं ॥

४ भावः (पु), 'रत्यादिरूप मनके विकार-विशेष' का १ नाम है ॥

५ अनुभावः (पु), 'मनके विकारके प्रकाशक रत्यादिसूचक रोमाञ्च आदि' का १ नाम है ॥

६ गर्वः, अभिमानः, अहङ्कारः (३ पु), 'अभिमान, घमण्ड' के ३ नाम हैं ॥

७ मानः (पु), चित्तसमुन्नतिः (भा० दी० म० । स्त्री), 'मान, चित्तोन्नति' के २ नाम हैं। ('महे० आदिके मतसे १ ही नाम है। 'गर्व' आदि ५ शब्द एकार्थक हैं, यह भी किसी-किसी का मत है') ॥

८ [दर्पः, अवलेपः, अवष्टम्भः, चित्तोद्रेकः, स्मयः, मदः (६ पु), 'घमण्ड' के ६ नाम हैं] ॥

९ अनादरः, परिभवः, परीभावः (३ पु), तिरस्क्रिया, रीढा, अवमानना, अवज्ञा (४ स्त्री), अवहेलनम् (+ अवहेला, स्त्री), असूर्त्तणम् (+ मु०, वु० मनो०, महे० 'असूत्तणम्, असुत्तणम्, संसूर्त्तणम्, संसुर्त्तणम्'। २ न), 'अनादर' के ९ नाम हैं ॥

१ मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा २ साऽपत्रपाऽन्यतः ॥ २३ ॥
३ क्षान्तिस्तितिक्षाऽभिध्या तु *परस्य विषये स्पृहा।
५ अक्षान्तिरीर्ष्यादेऽसूया तु दोषारोपो गुणेष्वपि ॥ २४ ॥
७ वैरं विरोधो विद्वेषो ८ मन्युशोकौ तु शुक्स्त्रियाम्।
९ पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥

---

१ मन्दाक्षम् (+ मन्दास्यम्। न), ह्रीः, त्रपा, व्रीडा (+ व्रीडः, पु), लज्जा (४ स्त्री), 'लज्जा' के ५ नाम हैं ॥

२ अपत्रपा (स्त्री), 'पिता आदि दूसरेसे लज्जा करने' का १ नाम है॥

३ क्षान्तिः, तितिक्षा (२ स्त्री), 'दूसरेको उन्नतिको सहन करने' के २ नाम हैं ॥

४ अभिध्या (स्त्री), 'दूसरेकी सम्पत्ति आदिको चाहने' का १ नाम है ॥

५ अक्षान्तिः, ईर्ष्या (२ स्त्री), 'ईर्ष्या' अर्थात् 'दूसरे की सम्पत्तिको नहीं सहने' के २ नाम हैं ॥

६ असूया (स्त्री), 'औद्धत्यसे किसीके गुण-विषयक काममें भी दोष निकालने' का १ नाम है। ('जैसे—किसीके दयार्द्र होकर पुण्य करनेपर 'यह नामके लिये पुण्य करता है' इत्यादि दोष निकालनेको †'असूया' कहते हैं') ॥

७ वैरम् (न), विरोधः, विद्वेषः (२ पु), 'वैर करने' के ३ नाम हैं ॥

८ मन्युः, शोकः (२ पु), शुक् (= शुच्, स्त्री), 'शोक' के ३ नाम हैं ॥

९ पश्चात्तापः, अनुतापः, विप्रतीसारः (+ विप्रतिसारः। ३ पु), 'पछताने' के ३ नाम हैं ॥

---

* ".....परस्य विषये स्पृहा' इति पाठान्तरम् ॥

† तदुक्तम्—'असूयाऽन्यगुणद्धीनामौद्धत्यादसहिष्णुता।
दोषोद्घोषभ्रूविभेदाऽवज्ञाक्रोधेङ्गितादिकृत्' ॥ १ ॥ इति सा० द० ३।१६६ ॥

१ कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ।
२ शुचौ तु चरिते शीलःमुन्मादश्चित्तविभ्रमः ॥ २६ ॥
४ प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽऽथ दोहदम् ।
इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ॥ २७ ॥
कामोऽभिलाषस्तर्षश्च ६ सोऽत्यर्थं लालसा द्वयोः ।
७ उपाधिर्ना धर्मचिन्ता न पुंस्याधिर्मानसी व्यथा ॥ २८ ॥
९ स्याच्चिन्ता स्मृतिराध्यान १० मुत्कण्ठोत्कलिके समे ।
११ उत्साहोऽध्यवसायः स्यात् १२ स वीर्यमतिशक्तिभाक् ॥ २९ ॥
१३ कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।

---

१ कोपः, क्रोधः, अमर्षः, रोषः, प्रतिघः (५ पु), रुट् (= रुप् । + रुषा), क्रुध् (+ क्रुधा । २ स्त्री), 'क्रोध' के ७ नाम हैं ॥

२ शीलम् (न), 'शील' अर्थात् 'आचरण शुद्ध रखने'का १ नाम है ॥

३ उन्मादः, चित्तविभ्रमः (२ पु), 'पागलपन' के २ नाम हैं ॥

४ प्रेमा (= प्रेमन्, पु), प्रियता (स्त्री), हार्दम्, प्रेम (= प्रेमन् २ न), स्नेहः (पु) 'प्रेम' के ५ नाम हैं ॥

५ दोहदम् (न), इच्छा, काङ्क्षा, स्पृहा, ईहा, तृट् (= तृष्), वाञ्छा, लिप्सा (७ स्त्री), मनोरथः, कामः, अभिलाषः, तर्षः (४ पु), 'इच्छा, चाहना' के १२ नाम हैं । ('म० से 'दोहदम्' यह १ नाम 'गर्भिणीकी इच्छा' का है और शेष १२ नाम उक्तार्थक हैं') ॥

६ लालसा (पु स्त्री), 'लालसा' अर्थात् 'अधिक चाहना' का १ नाम है ॥

७ उपाधिः (पु), धर्मचिन्ता (स्त्री) 'धर्मविषयक चिन्ता' के २ नाम हैं ॥

८ आधिः (पु), 'मानसिक दुःख' का १ नाम है ॥

९ चिन्ता, स्मृतिः (२ स्त्री), आध्यानम् (न), 'याद करने' के ३ नाम हैं॥

१० उत्कण्ठा, उत्कलिका (२ स्त्री), 'उत्कण्ठा' के २ नाम हैं ॥

११ उत्साहः, अध्यवसायः (२ पु), 'उत्साह' के २ नाम हैं ॥

१२ वीर्यम् (न), 'सामर्थ्ययुक्त उत्साह' का १ नाम है ॥

१३ कपटः (पु न), व्याजः, दम्भः, उपधिः (३ पु), छद्म (= छद्मन्),

कुसृतिर्निकृतिः शाठ्यं १ प्रमादोऽनवधानता ॥ ३० ॥
२ कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।
३ स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा ॥ ३१ ॥
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ।

कैतवम्, कुसृतिः, निकृतिः, (२ स्त्री), शाठ्यम् (+ शठनम् । शेष ३ न), 'धूर्तता, कपट, दगाबाज़ी' के ९ नाम हैं ॥

१ प्रमादः (पु), अनवधानता (स्त्री), 'असावधानी' के २ नाम हैं ॥

२ कौतूहलम्, कौतुकम्, कुतुकम्, कुतूहलम् (४ न), 'कौतहल' अर्थात् 'खेल, तमाशा, जादू, ·····' के ४ नाम हैं ॥

३ विलासः, विब्बोकः, विभ्रमः (३ पु), ललितम् (न), हेला, लीला (२ स्त्री), ये ६ 'स्त्रियोंके शृङ्गार, भाव अर्थात् रत्यादि और मनोविकारसे उत्पन्न क्रियाविशेष' हैं, इनका 'हावः' (पु) 'हाव' यह १ नाम है। ('नाटकरत्नकोष' में—'लीला १, विलास २, विच्छित्ति ३, विभ्रम ४, किलकिञ्चित ५, मोट्टायित ६, कुट्टमित ७, विब्बोक ८, ललित ९ और विहृत १०, ये १० स्त्रियोंकी स्वभावज क्रियाएँ हैं, यह कहा है*। 'साहित्यदर्पण' में—'भाव १, हाव २, हेला ३, शोभा ४, कान्ति ५, दीप्ति ६, माधुर्य ७, प्रगल्भता ८, औदार्य ९, धैर्य १०, लीला ११, विलास १२, विच्छित्ति १३, विब्बोक १४, किलकिञ्चित १५, मोट्टायित १६, कुट्टमित १७, विभ्रम १८, ललित १९, मद २०, विहृत २१, तपन २२, मौग्ध्य २३, विक्षेप २४, कुतूहल २५, हसित २६, चकित २७ और केलि २८, ये २८ जवानीमें स्त्रियोंके सात्त्विक भावसे उत्पन्न अलङ्कार होते हैं, ऐसा कहा है; उनमें 'भाव' आदि ३ 'आङ्गिक अलङ्कार' हैं, 'शोभा' आदि ७ 'विना यत्नके उत्पन्न अलङ्कार, हैं और 'लीला' आदि १८ 'स्वभावज अलङ्कार' हैं। पूर्वोक्त २८ अलङ्कारों में 'भाव' आदि १० अलङ्कार पुरुषोंके भी हो सकते हैं, किन्तु स्त्रियोंमें ही इनकी

---

* तदुक्तं नाटकरत्नकोषे—

'लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ॥ १ ॥
विहृतं चेति मन्तव्या दश स्त्रीणां स्वभावजाः' ॥ इति ॥

१ द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ॥ ३२ ॥
२ व्याजोऽपदेशो लक्ष्यं च ३ क्रीडा खेला च कूर्दनम् ।
४ घर्मो निदाघः स्वेदः स्याऽत्प्रलयो नष्टचेष्टता ॥ ३३ ॥

अधिक शोभा होती है, ऐसा भी कहा है'*) ॥

१ द्रवः, केलिः (+केली, स्त्री,), परीहासः (+परिहासः । ३ पु), क्रीडा, लीला (+खेला । २ स्त्री), नर्म (=नर्मन्, न), 'क्रीडामात्र' के ६ नाम हैं ॥

२ व्याजः, अपदेशः (२ पु), लक्ष्यम् (+लक्ष्म । न), 'बहाना करने' के ३ नाम हैं ॥

३ क्रीडा, खेला (२ स्त्री), कूर्दनम् (न), 'लड़कपनके खेल' के ३ नाम हैं । (म० प्रथम दो नाम उक्तार्थक और तीसरा नाम 'कूदने' का है ।

४ घर्मः, निदाघः, स्वेदः (३ पु), भा० दी० म० 'घाम' के और मु० म० 'पसीने' के ३ नाम हैं ॥

५ प्रलयः (पु), नष्टचेष्टता (+मूर्च्छा । स्त्री), 'बेहोशी' के २ नाम हैं ॥

---

* तदुक्तम्—

'यौवने सत्त्वजास्तासामष्टाविंशतिसङ्ख्यकाः ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥ १ ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येते **सप्तैव** स्युरयत्नजाः ॥ २ ॥
लीला विलासो विच्छित्तिर्विब्बोकः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥ ३ ॥
विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ॥ ४ ॥
स्वभावजाश्च, भावाद्या दश पुंसां भवन्त्यपि ॥'

(इति सा० द० ३।८९-९३॥)

एतेषां लक्षणोदाहरणान्यत्र ग्रन्थविस्तरभिया नोक्तानीत्यतस्तानि सा० द० ३।९३-११० तमे श्लोके द्रष्टव्यानि ॥

१ अवहित्थाऽऽकारगुप्तिः २ समौ संवेगसंभ्रमौ।
३ स्यादाच्छुरितकं हासः सोत्प्रासः ४ स मनाक्स्मितम् ॥३४॥
मध्यमः स्याद्विहसितं ६ रोमाञ्चो *रोमहर्षणम्।
७ क्रन्दितं रुदितं क्रुष्टं ८ जम्भस्तु त्रिषु जृम्भणम् ॥ ३५ ॥
९ विप्रलम्भो विसंवादो १० रिङ्गणं स्खलनं समे।
११ स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥ ३६ ॥

---

१ अवहित्था (+न), आकारगुप्तिः (२ स्त्री), 'अपने आकारको छिपाने' के २ नाम हैं ॥

२ संवेगः, सम्भ्रमः (२ पु), 'हर्ष आदिके कारण शीघ्रता करने' के २ नाम हैं ॥

३ आच्छुरितकम् (न। काव्य म० 'अवच्छुरितम्'), 'साभिप्राय हँसने' का १ नाम है ॥

४ † स्मितम् (न), 'साभिप्राय मुस्कुराने' का १ नाम है ॥

५ ‡ विहसितम् (न), 'साधारण हँसने' का १ नाम है ॥

६ रोमाञ्चः (पु), रोमहर्षणम् (+लोमहर्षणम्, रोमोद्गमः, उद्धर्षणम्, उल्लासनकम्। न), 'रोमाञ्च होने' के २ नाम हैं ॥

७ क्रन्दितम्, रुदितम्, क्रुष्टम् (३ न), 'रोने' के ३ नाम हैं ॥

८ जृम्भः (त्रि), जृम्भणम् (न), 'जम्हाई' के २ नाम हैं ॥

९ विप्रलम्भः, विसंवादः (२ पु), 'ठगपनेसे बात करने' के २ नाम हैं ॥

१० रिङ्गणम् (+रिङ्खणम्), स्खलनम् (२ न), 'धर्ममार्गसे प्रतिकूल चलने, रेंगने, जगहके चिकनी होनेसे या अन्य किसी कारणसे पैर फिसल जाने' के २ नाम हैं ॥

११ निद्रा (स्त्री), शयनम् (न), स्वापः, स्वप्नः, संवेशः (३ पु), 'नींद' के ५ नाम हैं ॥

---

* '.....लोमहर्षणम्' इति पाठान्तरम् ॥

† तदुक्तम्—'ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितम्।
अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत्' ॥ १ ॥ इति ॥

‡ तदुक्तम्—'आकुञ्चितकपोलाक्षं सस्वनं निःस्वनं तथा।
प्रस्तावोत्थं सानुरागमाहुर्विहसितं बुधाः' ॥ १ ॥ इति ॥

१ तन्द्री प्रमीला २ भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।
३ अदृष्टिः स्यादसौम्येऽदिण ४ संसिद्धिप्रकृतौ त्विमे ॥ ३७ ॥
स्वरूपं च स्वभावश्च निसर्गश्चाऽथ वेपथुः ।
कम्पोऽ६थ क्षण उद्धर्षो महः उद्भव उत्सवः ॥ ३८ ॥

इति नाट्यवर्गः ॥ ७ ॥

८. अथ पातालभोगिवर्गः ।

७ अधोभुवनपातालं बलिसद्म रसातलम् ।
नागलोकोऽऽथ कुहरं *शुषिरं विवरं बिलम् ॥ १ ॥

---

१ तन्द्री (+ तन्द्रिः, तन्द्रा), प्रमीला (२ स्त्री), 'तन्द्रा होने' अर्थात् 'अधिक थकावट आदिके कारण शरीरेन्द्रियोंके शिथिल होने या नींद के आदि और अन्तमें आलस्य होने' के २ नाम हैं ॥

२ भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिः (+ भृकुटिः । ३ स्त्री), 'क्रोध आदिसे भौंहको टेढ़ा करने' के ३ नाम हैं ॥

३ अदृष्टिः (स्त्री), 'क्रूरतापूर्वक देखने' का १ नाम है ॥

४ संसिद्धिः, प्रकृतिः (२ स्त्री), स्वरूपम् (न), स्वभावः, निसर्गः (२ पु), 'स्वभाव' के ५ नाम हैं ॥

५ वेपथुः, कम्पः (२ पु), 'काँपने' के २ नाम हैं ॥

६ क्षणः, उद्धर्षः, महः, उद्भवः, उत्सवः (५ पु), 'उत्सव' के ५ नाम हैं ॥

इति नाट्यवर्गः ॥ ७ ॥

८. अथ पातालभोगिवर्गः ।

७ अधोभुवनम् (+ अधः, अ०), पातालम्, बलिसद्म (= बलिसद्मन्), रसातलम् (४ न), नागलोकः (पु । + अधोलोकः), 'पाताल' के ५ नाम हैं ॥

८ कुहरम्, शुषिरम् (+ सुषिरम्), विवरम्, बिलम् (+ बिलम्),

---

*.....'सुषिरं विवरं बिलम्' इति पाठान्तरम् ।

छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं *वपा शुषिः।
१ गर्तावटौ भुवि श्वभ्रे २ सरन्ध्रे शुषिरं त्रिषु ॥ २ ॥
३ अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः।
४ ध्वान्ते गाढेऽन्धतमसं ५ क्षीणेऽवतमसं तमः ॥ ३ ॥
६ विष्वक्संतमसं ७ नागाः काद्रवेयाश्च तद्वीश्वराः।
शेषोऽनन्तो ८ वासुकिस्तु सर्पराजो १०ऽथ गोनसे ॥ ४ ॥
तिलित्सः स्या११दजगरे शयुर्वाहस इत्युभौ।

छिद्रम्, निर्व्यथनम्, रोकम्, रन्ध्रम्, श्वभ्रम् (+ स्वभ्रम् । ९ न), वपा, शुषिः (+ सुषिः । २ स्त्री), 'बिल' के ११ नाम हैं ॥

१ गर्तः (+ गर्ता, स्त्री), अवटः (+ अवटिः, स्त्री । २ पु), 'गढे' के २ नाम हैं ॥

२ शुषिरम् (त्रि । + सुषिरम्), 'छेदवाली चीज़' का १ नाम है ॥

३ अन्धकारः (पु न), ध्वान्तम्, तमिस्रम्, तिमिरम्, तमः (= तमस् । + तमसम् । ४ न), 'अन्धकार' के ५ नाम हैं ॥

४ अन्धतमसम् (न), 'बहुत अधिक अन्धकार' का १ नाम है ॥

५ अवतमसम् (न), 'थोड़ा अन्धकार' का १ नाम है ॥

६ संतमसम् (न), 'सर्वत्र फैले हुए अन्धकार' का १ नाम है ॥

७ नागः, काद्रवेयः (२ पु), महे० मतसे 'नाग' के और भा० दी० मतसे 'फणा और पूँछके सहित मनुष्याकार देवयोनि-विशेष' के २ नाम हैं ॥

८ शेषः, अनन्तः (२ पु), 'शेष' अर्थात् 'नागोंके राजा' के २ नाम हैं ॥

९ वासुकिः, सर्पराजः (२ पु), 'वासुकि' अर्थात् 'साँपोंके राजा' के २ नाम हैं ॥

१० गोनसः (+ गोनासः), तिलित्सः (२ पु), 'पनस जातिके साँप या छोटे जातिके सर्प-सामान्य' के २ नाम हैं ॥

११ अजगरः, शयुः, वाहसः (३ पु), 'अजगर साँप' के ३ नाम हैं ॥

---

* '.....वपा सुषिः' इति पाठान्तरम्।

१ *अलगर्दो जलव्यालः २ समौ राजिलडुण्डुभौ ॥ ५ ॥
३ मालुधानो मातुलाहि४र्निर्मुक्तो मुक्तकञ्चुकः ।
५ सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ॥ ६ ॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ ८ ॥
६ 'लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा (५३)
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा (५४)

---

१ अलगर्दः (+ अलगर्द्धः), जलव्यालः (२ पु), 'डोंड़ साँप, या पानीमें रहनेवाले सब साँप' के २ नाम हैं ॥

२ राजिलः (+ राजीलः), डुण्डुभः (मु० म० दुण्डुभः, स्वा० म० दण्डुभः । २ पु), 'दोनों तरफ मुखवाले साँप' के २ नाम हैं । (इसे विष नहीं होता है) ॥

३ मालुधानः, मातुलाहिः (२ पु), 'खट्वाकार चितकबरे साँप' के २ नाम हैं ॥

४ निर्मुक्तः, मुक्तकञ्चुकः (२ पु), जिसने कँचुल छोड़ दिया हो उस साँप' के २ नाम हैं ॥

५ सर्पः, पृदाकुः, भुजगः, भुजङ्गः, अहिः, भुजङ्गमः, आशीविषः (+ आशीर्विषः), विषधरः, चक्री (= चक्रिन्), व्यालः (+ व्याडः), सरीसृपः, कुण्डली (= कुण्डलिन्), गूढपात् (गूढपाद्), चक्षुःश्रवाः (= चक्षुःश्रवस्), काकोदरः, फणी (= फणिन्), दर्वीकरः, दीर्घपृष्ठः, दन्दशूकः, बिलेशयः (+ बिलेशयः), उरगः, पन्नगः, भोगी (= भोगिन्), जिह्मगः, पवनाशनः, (२५ पु । ये २५ पुंल्लिङ्ग हैं, किन्तु स्त्रीलिङ्ग होनेपर इनमें अकारान्तके 'सर्पिणी' भुजगी, इत्यादि रूप बदल जायेंगे'), 'साँप' के २५ नाम हैं ॥

६ [लेलिहानः, द्विरसनः (+ द्विजिह्वः), गोकर्णः, कञ्चुकी (= कञ्चुकिन्), कुम्भीनसः, फणधरः, हरिः, भोगधरः (८ पु), 'साँप' के ८ नाम ये भी हैं] ॥

---

* 'अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ' इति पाठान्तरम् ।

१ अहेः शरीरं भोगः स्यादाशीरस्यहिदंष्ट्रिका' (५५)
३ त्रिष्वाहेयं विषास्थ्यादि ४ स्फटायां तु फणा द्वयोः।
५ समौ कञ्चुकनिर्मोकौ ६ श्वेडस्तु गरलं विषम् ॥ ६ ॥
७ पुंसि क्लीबे च काकोलकालकूटहलाहलाः।
*सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥
दारदो वत्सनाभश्च विषभेदा अमी नव।

---

१ [भोगः (पु), 'साँपके शरीर' का १ नाम है] ॥

२ [आशीः (= आशी । + आशीः, = आशिस् , स्त्री), अहिदंष्ट्रिका (२ स्त्री) 'साँपके दाँत' के २ नाम हैं] ॥

३ आहेयम् (त्रि), 'साँपके विष, हड्डी, शरीर, केंचुल, दाँत, आदि, साँपसे उत्पन्न पदार्थमात्र' का १ नाम है ॥

४ स्फटा (स्त्री । + फटा), फणा (स्त्री पु । + २ स्त्री पु), 'साँपके फणा' के २ नाम हैं ॥

५ कञ्चुकः, निर्मोकः (२ पु), 'साँपके केंचुल' के २ नाम हैं ॥

६ श्वेडः (पु), गरलम्, विषम् (२ न । + २ पु न), 'विष, ज़हर' के ३ नाम हैं ॥

७ काकोलः, कालकूटः, हलाहलः (+ हालाहलम्, हालहलम् । ३ पु न) सौराष्ट्रिकः, (+ सारोष्ट्रिकः), शौक्लिकेयः, ब्रह्मपुत्रः, प्रदीपनः, दारदः, वत्सनाभः (६ पु) 'काकोल, कालकूट आदि स्थावर विष' का १-१ नाम है। ('विषके दो भेद होते हैं—'स्थावर १ और जङ्गम २ †। पहले स्थावर-

---

* 'सारोष्ट्रिकः.....' इति मु० पाठः ॥

† तदुक्तं श्रीमद्भगवद्धन्वन्तर्य्युपदिष्टसुश्रुतेन सुश्रुतसंहितायाः कल्पस्थानस्य द्वितीयाध्याये—
'स्थावरं जङ्गमं चैव द्विविधं विषमुच्यते। दशाधिष्ठानमाद्यन्तु द्वितीयं षोडशाश्रयम्' ॥ १ ॥
सुश्रु० क० स्था० २

अन्यच्च माधवनिदानस्य विषरोगनिदानप्रकरणे—
'स्थावरं जङ्गमं चैव द्विविधं विषमुच्यते। मूलाद्यात्मकमाद्यं स्यात्परं सर्पादिसम्भवम्' ॥ १ ॥
मा० नि० विषरोगनिदानप्रकरण

विषके १० भेद होते हैं—मूल १, पत्र २, फल ३, पुष्प ४, त्वक् (छाल) ५, क्षीर (दूध) ६, सार ७, निर्यास (लासा) ८, धातु ९ और कन्द १०*। उनमें मूलविषके ८, पत्रविषके ५, फलविषके १२, पुष्पविषके ५, त्वग्विष–निर्यासविष–सारविषके ७, क्षीरविषके ३, धातुविषके २ और कन्दविषके १३ भेद होते हैं। इन ५५ भेदोंके नाम टिप्पणीमें स्पष्ट हैं †। ये विष पहाड़, पेड़, पौधा आदि स्थावर पदार्थोंमें होते हैं। **जङ्गमविष** १६ तरहका होता है—इन भेदोंके नाम टिप्पणीमें स्पष्ट हैं ‡। **जङ्गमविष** बाघ, सिंह, भेड़िया, स्यार, साँप, बिच्छू, बर्रे, भौंरा, मधुमक्खी, मेंढक, छिपकिली, चूहा आदि जङ्गम जन्तुओंमें पाये

---

* सुश्रुते 'दशाधिष्ठानमाधन्तु' इत्यनेनाद्यस्य स्थावरविषस्य दशाधिष्ठानान्युक्त्वा तानि नामतो निर्दिशति—

'मूलं १ पत्रं २ फलं ३ पुष्पं ४ त्वक् ५ क्षीरं ६ सार ७ एव च।
निर्यासो ८ धातव ९ श्चैव कन्दश्च १० दशमः स्मृतः' ॥ १ ॥
इति सुश्रु० क० स्था० २।२॥

† तदुक्तं सुश्रुतस्य कल्पस्थानीयतृतीयाध्याये—

'तत्र कलीतकाश्वमारगुञ्जासुगन्धगर्गरककरघाटविषुच्छिखाविजयानील्यष्टौ **मूलविषाणि**। विषपत्रिकालम्बावरदारुककरम्भमहाकरम्भाणि पञ्च **पत्रविषाणि**। कुमुद्वतीवेणुकारकरम्भमहाकरम्भकर्कोटकरेणुकखद्योतकचमरीभगन्धासर्षपातिनन्दनसारपाकानीति द्वादश **फलविषाणि**। वेत्रकादम्बवल्लिजकरम्भमहाकरम्भाणि पञ्च **पुष्पविषाणि**। अन्त्रपाचककर्त्तरीसौरीयककरघाटकरम्भनन्दनवराटकानि सप्त **त्वक्सारनिर्यासविषाणि**। कुमुदघनीस्नुहीजालक्षीर्याणि त्रीणि **क्षीरविषाणि**। फेणाश्मभस्म हरितालञ्च द्वे **धातुविषे**। कालकूटवत्सनाभसर्षपपालककर्दमकवैराटकमुस्तकशृङ्गीविषप्रपुण्डरीकमूलकदालाहलमहाविषकर्कटकानीति त्रयोदश **कन्दविषाणि**। इत्येवं **पञ्चपञ्चाशत्स्थावरविषाणि** भवन्ति' ॥
इति सुश्रु० क० स्था० २। ३—१० ॥

‡ तदुक्तं सुश्रुते कल्पस्थानीयतृतीयाध्याये—
'जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोडश। समासेन मया यानि विस्तरस्तेषु वक्ष्यते' ॥ १ ॥

तत्र दृष्टिनिःश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्तवमुखसन्दंशविशर्दिनपुदास्थिपित्तशुक्रशवानीति' ॥ २ ॥ इति सुश्रु० क० स्था० ३। १-२।

१ विषवैद्यो जाङ्गुलिको २ * व्यालग्राह्यहितुण्डिकः ॥ ११ ॥

इति पातालभोगिवर्गः ॥ ८ ॥

९. अथ नरकवर्गः।

३ स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्।
४ तद्भेदास्तपनावीचिमहारौरवरौरवाः ॥ १ ॥

जाते हैं। किन २ जन्तुओंमें कौन २ विष रहते हैं यह भी टिप्पणीमें स्पष्ट है' †) ॥

१ विषवैद्यः, जाङ्गुलिकः (२ पु), 'विषको दूर करनेवाले वैद्य' के २ नाम हैं ॥

२ व्यालग्राही (= व्यालग्राहिन् । + व्यालग्राहः), अहितुण्डिकः, (+ आहितुण्डिकः । २ पु), 'साँप पकड़नेवाले या सँपेरा' के २ नाम हैं ॥

इति पातालभोगिवर्गः ॥ ८ ॥

९. अथ नरकवर्गः ॥

३ नारकः, नरकः, निरयः (३ पु), दुर्गतिः (स्त्री), 'नरक'के ४ नाम हैं ॥
४ तपनः, अवीचिः (+ स्त्री), महारौरवः, रौरवः, संघातः

---

* '.....व्यालग्राह्याहितुण्डिकः' इति पाठान्तरम् ॥

† 'तत्र दृष्टिनिःश्वासविषास्तु दिव्याः सर्पाः, भौमास्तु दंष्ट्राविषाः। मार्जारश्वानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाकगृहगोधिकाचतुष्पादकीटास्तथान्ये दंष्ट्रानखविषाः ॥ चिपिटपिच्चटककषायवासिकसर्पवासिकतोटकवर्चःकीटकौण्डिल्यकाः शकृन्मूत्रविषाः ॥ मूषिकाः शुक्रविषाः। लूताश्च लालामूत्रपुरीषमुखसन्दंशनखशुक्रार्त्तवविषाः ॥ वृश्चिकविश्वम्भरराजीवमत्स्योच्चिटिङ्गाः समुद्रवृश्चिकाश्चालविषाः ॥ चित्रशिरस्सरावकुर्दिशतदारुकारिमेदकशारिकामुखा मुखसन्दंशविशर्द्धितमूत्रपुरीषविषाः। मक्षिकाकणभजलायुका मुखसन्दंशविषाः ॥ विषहतास्थिसर्पकण्टकवरटीमत्स्यास्थि चेल्यस्थिविषाणि। शकुलीमत्स्यरक्तराजीवरकीमत्स्याश्च पित्तविषाः ॥ सूक्ष्मतुण्डोच्चिटिङ्गवरटीशतपदीशूकवलभिकाशृङ्गीभ्रमराः शूकतुण्डविषाः ॥ कीटसर्पदेहाः गतासवः शवविषाः। शेषास्त्वनुक्ता मुखसन्दंशविषेष्वेव गणयितव्याः' ॥ इति सुश्रु० क० स्था० ३। ३—१० ॥

*संघातः कालसूत्रं चेत्याद्याः १ सत्त्वास्तु नारकाः ।
प्रेता २ वैतरणी सिन्धुः ३ स्यादलक्ष्मीस्तु निर्ऋतिः ॥ २ ॥
४ विष्टिराजूः ५ कारणा तु यातना तीव्रवेदना ।
६ पीडा बाधा व्यथा †दुःखमामनस्यं प्रसूतिजम् ॥ ३ ॥

(+संहारः । ५ पु), कालसूत्रम् (न), आदि ('आदि शब्दसे 'तामिस्रम्, अन्धतामिस्रम्, संजीवनम्, महावीचिः (स्त्री), सम्प्रतापनम् (शेष ४ न), इत्यादिका संग्रह है'), 'भिन्न भिन्न नरक-विशेष' का १—१ नाम है । ('नरक २१ होते हैं, उनके नाम टिप्पणीमें स्पष्ट हैं' ‡) ॥

१ नारकः (भा० दी० म०), प्रेतः (+परेतः । २ पु), 'नरकके प्राणियों' के २ नाम हैं ॥

२ वैतरणी (स्त्री), 'यमलोकके समीप बहनेवाली वैतरणी नामकी नदी' का १ नाम है ॥

३ अलक्ष्मीः (भा० दी० म०), निर्ऋतिः (२ स्त्री), 'नरककी अशोभा' के २ नाम हैं ॥

४ विष्टिः, आजूः (२ स्त्री), 'बलात्कारसे नरकमें ढकेलने' के २ नाम हैं ॥

५ कारणा, यातना, तीव्रवेदना (३ स्त्री), स्वा० म० 'नरकके दुःख' के और भा० दी० म० 'कठोर दुःख' के ३ नाम हैं ॥

६ पीडा, बाधा (+आबाधा), व्यथा (३ स्त्री), दुःखम्, आमनस्यम्

---

* 'संहारः काल·····' इति पाठान्तरम् ॥

† '·····दुःखमानस्यं·····' इति पाठान्तरम् ॥

‡ उच्छ्वासवर्त्तिनो लुब्धस्य राज्ञः प्रतिग्रहस्वीकारे पर्यायेणैकविंशतिं नरकान् यातीत्युपक्रम्य तेषामेकविंशतिनरकाणां नामान्युक्तानि मनुना । तथथा—

'तामिस्रमन्धतामिस्रं महारौरवरौरवौ । नरकं कालसूत्रं च महानरकमेव च ॥ १ ॥
सञ्जीवनं महावीचिं तपनं संप्रतापनम् । संघातं च सकाकोलं कुड्मलं प्रतिमूर्तकम् ॥ २ ॥
लोहशंकुमृजीषं च पन्थानं शाल्मलीं नदीम् । असिपत्रवनं चैव लोहदारकमेव च' ॥ ३ ॥
इति मनुः ४ । ८८—९० ॥

स्यात्कष्टं कृच्छ्रमाभीलं १ त्रिष्वेषां मेद्यगामि यत् ।

इति नरकवर्गः ॥ ९ ॥

१०. अथ वारिवर्गः ।

२ समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ॥ १ ॥
रत्नाकरो जलनिधिर्यादःपतिरपाम्पतिः ।
३ तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥ २ ॥

(+ अमानस्यम्), प्रसूतिजम्, कष्टम्; कृच्छ्रम्, आभीलम् (६ न), 'दुःख' के ९ नाम हैं । ('वस्तुतस्तु 'पीडा·····' ४ 'मानसिक दुःख' के, 'आमनस्यम्,·····' २ 'मनोविकार' अर्थात् 'उदासी' के और 'कष्टम्,·····' ३ 'शारीरिक दुःख' के नाम हैं') ॥

१ इनमें 'दुःख' इत्यादि शब्द किसीके विशेषण होनेपर त्रिलिङ्ग होते हैं । ('जैसे—'दुःखा दुर्नृपसेवा, दुःखः पुत्रो ह्यपण्डितः, दारिद्र्यमखिलं दुःखम्,·····') ॥

इति नरकवर्गः ॥ ९ ॥

१०. अथ वारिवर्गः ।

२ समुद्रः, अब्धिः, अकूपारः, पारावारः (+ पारापारः), सरित्पतिः, उदन्वान् (= उदन्वत्), उदधिः, सिन्धुः, सरस्वान् (= सरस्वत्), सागरः, अर्णवः, रत्नाकरः जलनिधिः, यादःपतिः (+ पाथःपतिः), अपांपतिः (१५ पु), 'समुद्र' के १५ नाम हैं ॥

३ क्षीरोदः, लवणोदः (२ पु), आदि ('आदि शब्दसे 'दध्यूदः १, घृतोदः२, सुरोदः ३, इक्षूदः ४, स्वादूदः ५ (५ पु)' इन पाँचोंका संग्रह है') 'क्षीर-समुद्र १, खारा समुद्र २, आदि ('आदि' शब्दसे 'दधि-समुद्र १, घृत-समुद्र २, मद्य-समुद्र ३, रस-समुद्र ४, मीठे जलका समुद्र ५, इन पाँचोंका

१ आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
* कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशंवरम् ॥ ४ ॥
मेघपुष्पं घनरसरस्त्रिषु द्वे आप्यमम्मयम् ।
२ भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिश्च रथोमिषु ॥ ५ ॥
महत्सल्लोलकल्लोलौ ५स्यादावर्तोऽम्भसां भ्रमः।

संग्रह है, इस तरह सब † सात 'समुद्र' हैं) का १—१ नाम है ॥

१ आपः (=अप्, नित्य स्त्री० ब० व० । +आपः, =आपस्, न), वाः (=वार्), वारि (+वारम्), सलिलम् (+सरिलम्, सलिरम्), कमलम्, जलम्, पयः (=पयस्), कीलालम्, अमृतम्, जीवनम्, भुवनम्, वनम्, कबन्धम् (+कमन्धम्, कम्, अन्धम्), उदकम् (+दकम्), पाथः (=पाथस्), पुष्करम्, सर्वतोमुखम्, अम्भः (=अम्भस्), अर्णः (=अर्णस्), तोयम्, पानीयम्, नीरम् (+नारम्, न पु), क्षीरम्, अम्बु, शंवरम् (संवरम्), मेघपुष्पम् (२५ न), घनरसः (पु । + न), 'पानी' के २७ नाम हैं॥

२ आप्यम्, अम्मयम् (२ त्रि), 'पानीके विकार' अर्थात् 'पानीसे बने पदार्थ-बर्फ, शर्बत आदि' के २ नाम हैं ॥

३ भङ्गः, तरङ्गः (२ पु), ऊर्मिः, वीचिः (स्वा० म० नि० स्त्री । २ पु स्त्री), 'पानीकी तरङ्ग, लहर' के ४ नाम हैं ।

४ उल्लोलः, कल्लोलः (२ पु), 'बड़ी तरङ्ग' के २ नाम हैं ॥

५ आवर्तः (पु), 'चकोह' भँवर अर्थात् 'पानीके गोलाकार घूमने' का १ नाम है ॥

---

* केचित्तु 'कमन्धमुदकं·····' इति पठित्वा 'कमन्धम्' इत्येकं नाम 'कम्, अन्धम्' इति नामद्वयं वेत्याहुः । अत्र 'कबन्धञ्च दकम्·····' इति च पाठान्तरम् ॥

† तदुक्तमभिधानचिन्तामणौ हेमचन्द्राचार्येण—
'लवणक्षीरदध्याज्यसुरेक्षुस्वादुवारयः' ।
इति अभि० चि० म० 'हैम' ४ । १४१ ॥
यथा वा—'लवणेक्षुसुरासर्पिर्दधिक्षीरजलाः समाः' ॥ इत्यन्यत्र ॥

१ पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥ ६ ॥
२ *चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः।
३ कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥
४ पाराऽवारे परावारे तीरे ६ पात्रं तदन्तरम्।
७ द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥ ८ ॥
८ तोयोत्थितं तत्पुलिनं ९ सैकतं सिकतामयम्।
१० निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ॥ ९ ॥

---

१ पृषत् (न। + पृषन्तिः, पु), बिन्दुः, पृषतः (२ पु), विप्रुट् (= विप्रुष्, स्त्री। + विप्लुट् = विप्लुष्), 'बूँद, ठोप' के ४ नाम हैं ॥

२ चक्रम् (न। + वक्रम्), पुटभेदः, भ्रमः, जलनिर्गमः (३ पु), महे० स्वा० म० 'गोलाकार होकर जलके नीचे जाने' के ४ नाम हैं। ('भा० दी० म० पहलेवाले दो नाम उक्तार्थक और अन्तवाले दो नाम 'जल निकलनेके समुदाय' के और अन्यके म० पहलेवाले दो नाम उक्तार्थक तथा अन्तवाले दो नाम 'नीचेसे ऊपरकी तरफ जलके निकलने' अर्थात् 'जमीन फटकर भव फूटने या फौव्वारा छूटने' के हैं') ॥

३ कूलम्, रोधः (= रोधस्। + रोधः = रोध, पु), तीरम्, प्रतीरम् (४ न), तटम् (त्रि), 'नदीके किनारे' के ५ नाम हैं ॥

४ पारम् (न) 'नदीके उधरवाले किनारे' का १ नाम है ॥

५ अवारम् (न), 'नदीके इधरवाले किनारे' का १ नाम है ॥

६ पात्रम् (न), 'दोनों किनारोंके मध्य भाग' का १ नाम है ॥

७ द्वीपम्, अन्तरीपम् (२ पु न) 'टापू' के २ नाम हैं ॥

८ पुलिनम् (न), 'पानीसे शीघ्र निकले हुए किनारे' का १ नाम है ॥

९ सैकतम्, सिकतामयम् (२ न), 'रेतीले स्थान या किनारे' के २ नाम हैं ॥

१० निषद्वरः, जम्बालः, पङ्कः (पु न), शादः, कर्दमः (शेष ४ पु), कीचड़, पङ्क' के ५ नाम हैं ॥

---

* 'वक्राणि पुटभेदा·····' इति भा० दी० पाठान्तरम्।

१ जलोच्छ्वासाः परीवाहाः २ कूपकास्तु विदारकाः ।
३ नाव्यं त्रिलिङ्गं नौतार्ये ४ स्त्रियां नौस्तरणिस्तरिः ॥ १० ॥
५ उडुपं तु प्लवः कोलः ६ स्रोतोऽम्बुसरणं स्वतः ।
७ आतरस्तरपण्यं स्याद् ८ द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥
९ सांयात्रिकः पोतवणिक् १० कर्णधारस्तु नाविकः ।

---

१ जलोच्छ्वासः, परीवाहः (+ परिवाहः । २ पु), 'बढ़े हुए पानीके निकलनेके मार्ग' अर्थात् 'कनवाह' के २ नाम हैं ॥

२ कूपकः, विदारकः, 'सूखीसी नदियोंमें थोड़ी देरमें कुछ पानी इकट्ठा होनेके लिये किये गये गढे' के २ नाम हैं । ('शोणभद्र, फल्गु आदि पहाड़ी या बालूदार नदियोंमें गढा करनेसे १०–५ मिनटमें थोड़ा पानी जमा हो जाता है') ॥

३ नाव्यम् (त्रि), 'नावसे पार होने योग्य नदी आदि' का १ नाम है ॥

४ नौः, तरणिः (+ तरणी), तरिः (+ तरीः, तरी । ३ स्त्री), 'नाव' के ३ नाम हैं ॥

५ उडुपम् (पु न), प्लवः, कोलः (२ पु), मेदि० म० 'छोटी नाव' के और भा० दी० म० 'तैरनेके लिये घड़ा, कनस्तर, तुम्बी आदिसे बनाये गये साधन–विशेष' के २ नाम हैं ॥

६ स्रोतः (= स्रोतस्, न । + स्रोतः, = स्रोत, पु; श्रोतः, = श्रोतस्, न), 'सोता' अर्थात् 'पानीके प्राकृतिक बहाव' का १ नाम है ॥

७ आतरः (पु । + आतापः), तरपण्यम् (न), 'खेवाई' अर्थात् 'नावके भाड़े या उतराई' के २ नाम हैं ॥

८ द्रोणी (+ द्रोणिः, द्रुणिः), काष्ठाम्बुवाहिनी (भा० दी० म० । २ स्त्री), 'काठकी बनाई गई छोटी नाव' अर्थात् 'डोंगी' के २ नाम हैं ॥

९ सांयात्रिकः, पोतवणिक् (= पोतवणिज् । २ पु), 'नाव या जहाजके व्यापारी' के २ नाम हैं ॥

१० कर्णधारः, नाविकः (२ पु), 'पतवार पकड़नेवाले' के २ नाम हैं ॥

१ नियामकाः पोतवाहाः २ कूपको गुणवृक्षकः ॥ १२ ॥
३ नौकादण्डः क्षेपणी स्याᵗदरित्रं केनिपातकः ।
५ अभ्रिः स्त्री काष्ठकुदालः ६ सेकपात्रं तु सेचनम् ॥ १३ ॥
७ * 'यानपात्रं तु पोतोऽब्धिभवे त्रिषु समुद्रियम् (५६)
९ सामुद्रिको मनुष्यो१०ऽब्धिजाता सामुद्रिका च नौः' (५७)

---

१ नियामकः, पोतवाहः (२ पु), 'मगर, मछली आदि दुष्ट जल-जन्तुओंसे जहाजकी रक्षाके लिये जहाजके ऊँचे हिस्सेपर बैठनेवाले' के २ नाम हैं। ('समुद्रगामी बड़े-बड़े जहाजोंमें ऐसे लोग रहते हैं, जिन्हें 'जहाजका कप्तान' कहते हैं') ॥

२ कूपकः, गुणवृक्षकः (२ पु), 'मस्तूल' के २ नाम हैं। ('पाल या गोंद बाँधनेके लिये जहाज या नावके बीचमें खड़े किये हुए खम्भेको 'मस्तूल' कहते हैं। किसी-किसीके मतसे 'नावको बाँधनेवाले खूँटे' के ये २ नाम हैं') ॥

३ नौकादण्डः (पु), क्षेपणी (स्त्री। + क्षेपणिः, क्षिपणिः, क्षिपा), 'डाँड़े' के २ नाम हैं ॥

४ अरित्रम्, केनिपातकः (२ पु), 'पतवार' के २ नाम हैं ॥

५ अभ्रिः (स्त्री। + अभ्री), काष्ठकुदालः (पु। + काष्ठकूदालः), 'जहाज आदिके कतवार आदिको हटानेके लिये काष्ठके बनाये कुदाल' के २ नाम हैं ॥

६ सेकपात्रम्, सेचनम् (२ न), 'नाव, जहाज इत्यादिमें एकत्रित हुए पानीको फेंकनेके लिये चमड़ा आदिके थैले या मशक' के २ नाम हैं। उपलक्षणतया 'पानी भरनेवाले मशकमात्र' के भी ये २ नाम हैं ॥

७ [पोतः (पु), 'जहाज' का १ नाम है] ॥

८ [समुद्रियम् (त्रि), 'समुद्रमें होनेवाले पदार्थ' का १ नाम है] ॥

९ [सामुद्रिकः (पु), 'समुद्रके मनुष्य' का १ नाम है] ॥

१० [सामुद्रिका (स्त्री। + समुद्रिका), 'समुद्रमें जानेवाली नाव' का १ नाम है] ॥

---

* यानपात्रं·····च नौः' इत्येषोऽशः क्षी० स्वा० व्याख्यानुरोधेनात्र मूले एवोपन्यस्तः। तत्र '·····मनुष्योऽब्धिजातादौ नौः समुद्रिका' इति पाठान्तरम् ॥

१ क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ।
३ त्रिष्वागाधाऽत्प्रसन्नोऽच्छः ५ कलुषोऽनच्छ आविलः ॥ १४ ॥
६ निम्नं गभीरं गम्भीरऽमुत्तानं तद्विपर्यये ।
८ अगाधमतलस्पर्शं ९ कैवते दाशधीवरौ ॥ १५ ॥
१० आनायः पुंसि जालं स्या११च्छणसूत्रं पवित्रकम् ।
१२ मत्स्याधानी कुवेणी स्या१३द्बडिशं मत्स्यवेधनम् ॥ १६ ॥

---

१ अर्धनावम् (न), 'नावके आधे हिस्से' का १ नाम है ॥

२ अतिनु (त्रि), 'नावकी अपेक्षा अधिक वेगसे चलनेवाले मनुष्य या पानीके वहाव आदि' का १ नाम है ॥

३ यहाँसे लेकर 'अगाधमतलस्पर्शं·····(१।१०।१५)' के पहलेतक 'त्रिषु' शब्दका अधिकार होनेसे सब शब्द त्रिलिङ्ग हैं ॥

४ प्रसन्नः, अच्छः (+ स्वच्छः । २ त्रि), 'साफ, निर्मल पानी आदि' के २ नाम हैं ॥

५ कलुषः, अनच्छः, आविलः (३ त्रि), 'गन्दे पानी आदि' के ३ नाम हैं ॥

६ निम्नम्, गभीरम्, गम्भीरम् (३ त्रि), 'गम्भीर गहरे'के ३ नाम हैं ॥

७ उत्तानम् (त्रि), 'थाह, उथला या छिछिल' का १ नाम है ॥

८ अगाधम्, अतलस्पर्शम् (२ त्रि), 'अथाह बहुत गहरे'के २ नाम हैं॥

९ कैवर्तः, दाशः (+ दासः), धीवरः (३ पु), 'मल्लाह' के ३ नाम हैं ॥

१० आनायः (पु), जालम् (न), 'जाल' के २ नाम हैं ॥

११ शणसूत्रम्, पवित्रकम् (२ न), 'सुतलीके बने हुए जाल'के २ नाम हैं ॥

१२ मत्स्याधानी, कुवेणी (२ स्त्री), 'मछलियोंको पकड़कर रखने-वाले बर्तन' के २ नाम हैं ॥

१३ बडिशम् (+ बलिशम्), मत्स्यवेधनम् (२ न), 'बंशी' अर्थात् लोहेके बने हुए मछली फँसानेके साधन-विशेष'के २ नाम हैं । '('जिसमें आटा

१ पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः।
* विसारः शकली चाथ २ गडकः शकुलार्भकः ॥ १७ ॥
३ सहस्रदंष्ट्रः पाठीन ४ उलूपी शिशुकः समौ।
५ नलमीनश्चिलिचिमः ६ प्रोष्ठी तु शफरी द्वयोः ॥ १८ ॥
७ क्षुद्राण्डमत्स्यसंघातः पोताधानऽमथो झषाः।
९ रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥ १९ ॥

या कीड़ा आदि लपेटकर पानीमें फेंककर मछलियाँ फँसाई जाती हैं, उसे 'वंसी' कहते हैं') ॥

१ पृथुरोमा (= पृथुरोमन्), झषः, मत्स्यः, मीनः, वैसारिणः, अण्डजः, विसारः, शकली (= शकलिन् । + शकुली, = शकुलिन्, सकली, = सकलिन् । ८ पु), 'मछली' के ८ नाम हैं ॥

२ गडकः, शकुलार्भकः (२ पु), 'गडक मछली' के २ नाम हैं ॥

३ सहस्रदंष्ट्रः, पाठीनः (२ पु,), 'पहिना मछली' अर्थात् 'बहुत दाँत वाली पहिनानामक एक प्रकारकी मछली या पोठिया मछलीके २ नाम हैं ॥

४ उलूपी (= उलूपिन्), शिशुकः (२ पु), 'सूंस' के २ नाम हैं ॥

५ नलमीनः (+ नडमीनः, तलमीनः), चिलिचिमः (चिलचिमिः । २ पु), 'नरकटमें रहनेवाली एक प्रकारकी मछली-विशेष' के २ नाम हैं ॥

६ प्रोष्ठी (स्त्री), शफरी (पु स्त्री । + पु स्त्री), 'सहरी या पोठिया मछली' के २ नाम हैं ॥

७ पोताधानम् (न), 'अण्डेसे निकले हुए मछलियोंके छोटे-छोटे बच्चोंके समुदाय' का १ नाम है।

८ अब मछलियोंके 'भेद'को कहते हैं अर्थात् वक्ष्यमाण शब्द पर्याय नहीं हैं ॥

९ रोहितः, मद्गुरः, शालः (+ सालः), राजीवः, शकुलः, तिमिः, तिमिङ्गिलः (७ पु), आदि ('आदि पदसे 'तिमिङ्गिलगिलः, नन्दीवर्त्तः (२ पु), आदिका संग्रह है') 'रोहू, मोंगरा, शाल, बरारी, शकुल, तिमि,

---

* 'विसारः शकुली चाथ' इति भा० दी० सम्मतः पाठः, मूलोक्तश्च महे० क्षी० स्वा० सम्मतः पाठ इत्यवधेयम् ॥

तिमिङ्गिलादयश्च१थ यादांसि जलजन्तवः।
२ तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः॥ २०॥
३ स्यात्कुलीरः कर्कटकः ४ कूर्मे कमठकच्छपौ।
५ ग्राहोऽवहारो ५ नक्रस्तु कुम्भीरोऽथ महीलता॥ २१॥
गण्डूपदः * किञ्चुलको ८ निहाका गोधिका समे।
९ रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः॥ २२॥

तिमिङ्गिल आदि ('आदि पदसे 'तिमिङ्गिलगिल और नन्दीवर्त' आदिका संग्रह है') 'मछलियोंके भेद' हैं॥

१ यादः (=यादस्, न) जलजन्तुः (पु), 'जलमें रहनेवाले जीव' के २ नाम हैं॥

२ शिशुमारः, उद्रः, शङ्कुः, मकरः (४ पु), आदि ('आदि पदसे 'जलहस्ती (=जलहस्तिन्), जलकुक्कुटः, कर्कः, कच्छपः' (४ पु), का संग्रह है') 'सूँस, ऊद, शङ्कु, मगर, आदि ('आदि शब्दसे 'जलहाथी, जलमुर्गा, केकड़ा, कछुआ' आदिका संग्रह है') जलमें रहनेवाले जीव' हैं॥

३ कुलीरः (+कुलिरः), कर्कटकः (ककटः, कर्कः, करटकः, करडकः। (२ पु), 'केकड़े' के २ नाम हैं॥

४ कूर्मः, कमठः, कच्छपः, (३ पु), 'कछुए' के ३ नाम हैं॥

५ ग्राहः, अवहारः (+अवराहः। २ पु), 'ग्राह' अर्थात् 'घड़ियाल' के २ नाम हैं॥

६ नक्रः, कुम्भीरः (२ पु) 'नाक' अर्थात् 'ग्राहके भेद, एक तरहके जलचर-विशेष' के २ नाम हैं॥

७ महीलता (स्त्री), गण्डूपदः, किञ्चुलकः (+किञ्चुलुकः, किञ्चिलिकः। २ पु), 'केंचुआ' के ३ नाम हैं॥

८ निहाका, गोधिका (२ स्त्री), 'गोह' के २ नाम हैं॥

९ रक्तपा, जलौका, जलौकसः (=जलौकस्, †प्रायः ब० व०। +जलोका, जलूका, जलजन्तुका, जलोरगी। ३ स्त्री), 'जोंक' के ३ नाम हैं॥

---

* "·····किञ्चुलकः·····" इति मा० दी०, क्षी० स्वा० पाठः॥

† 'जलोरगौ जलोका तु जलौका च जलौकसि'
इति संसारार्णवोक्तेरत्र बहुवचनस्य प्रायिकत्वम्।

१ मुक्तास्फोटः स्त्रियां शुक्तिः २ शङ्खः स्यात्कम्बुरस्त्रियौ ।
३ क्षुद्रशङ्खा * शङ्खनखाः ४ शम्बूका जलशुक्तयः ॥ २३ ॥
५ भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।
६ शिली गण्डूपदी ७ भेकी वर्षाभ्वी ८ कमठी †डुलिः ॥ २४ ॥
९ मद्गुरस्य प्रिया शृङ्गी—

---

१ मुक्तास्फोटः (पु), शुक्तिः (स्त्री), 'सितुही, सीप' के २ नाम हैं। ('गजराज, मेघ, सूकर, शंख, मछली, साँप, सीप और बाँस' इनसे मोती निकलती है, किन्तु ‡ अधिकतर सीप से ही निकलती है') ॥

२ शंखः, कम्बुः (२ पु न), 'शंख' के २ नाम हैं ॥

३ क्षुद्रशङ्खः, शङ्खनखः (+ शङ्खनकः । २ पु) 'छोटे शङ्ख' के २ नाम हैं ॥

४ शम्बूकः (पु । + शम्बुकः, शाम्बुकः,), जलशुक्तिः (स्त्री । भा० दी० म०), 'घोंघा, दोहना या पानीमें होनेवाली हर तरहकी सीप' के २ नाम हैं ॥

५ भेकः, मण्डूकः, वर्षाभूः, शालूरः (+ साल्लूरः), प्लवः, दर्दुरः (६ पु), 'मेंढक' के ६ नाम हैं ॥

६ शिली, गण्डूपदी (२ स्त्री) 'केंचुएकी स्त्री या केंचुएके भेदकी छोटी जाति-विशेष' के २ नाम हैं ॥

७ भेकी, वर्षाभ्वी (२ स्त्री) 'घेंगुची, मेंढककी स्त्री या मेंढकके भेदकी छोटी जाति-विशेष' के २ नाम हैं ॥

८ कमठी, डुलिः (+ दुलिः । २ स्त्री) 'कछुई' के २ नाम हैं ॥

९ शृङ्गी (स्त्री । + मद्गुरी), 'मगरकी स्त्री' का १ नाम है ॥

---

* "·····शङ्खनकाः·····" इति पाठान्तरम् ॥

† "·····दुलिः" इति पाठान्तरम् ॥

‡ तदुक्तम्—'करीन्द्रजीमूतवराहशंखमत्स्याहिशुक्त्युद्भवेणुजानि ।
मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि' ॥ १ ॥ इति ॥

—१ दुर्नामा दीर्घकोशिका।
२ जलाशयो जलाधार३स्तत्रागाधजलो ह्रदः ॥ २५ ॥
४ आहावस्तु निपानं स्यादुपकूपजलाशये।
५ पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥ २६ ॥
६ नेमिस्त्रिका ऽस्य ७ वीनाहो मुखबन्धनमस्य यत्।
८ पुष्करिण्यां तु खातं स्याद्दखातं देवखातकम् ॥ २७ ॥
१० पद्माकरस्तडागो ऽस्त्री ११ कासारः सरसी सरः।

---

१ दुर्नामा (=दुर्नामन्, पु। +दुर्नाम्नी, स्त्री), दीर्घकोशिका (स्त्री। +दीर्घकोशिका), 'जोंकके समान एक प्रकारके जलचर-विशेष' के २ नाम हैं ॥

२ जलाशयः, जलाधारः (२ पु), 'तालाब, पोखरा, बावली आदि' के २ नाम हैं ॥

३ ह्रदः (पु), 'अथाह जलवाले तालाब आदि' का १ नाम है ॥

४ आहावः (पु), निपानम् (न), 'सुखपूर्वक गौ आदिके जल पीनेके लिये कूँएके पास बनाये हुए हौज' के नाम हैं ॥

५ अन्धुः, प्रहिः, कूपः (३ पु), उदपानम् (न पु), 'कूआँ, इनारा' के ४ नाम हैं ॥

६ नेमिः (भा० दी० म०) त्रिका (२ स्त्री), 'घुरई, गड़ारी' के २ नाम हैं ॥

७ वीनाहः (पु। +त्रिनाहः), 'कूँएके जगत' का १ नाम है ॥

८ पुष्करिणी (स्त्री), खातम् (न), 'पोखरा, छोटी तलैया' के २ नाम हैं ॥

९ अखातम्, देवखातकम् (२ न), 'अकृत्रिम या देवमन्दिरके आगे-वाले पोखरा, तालाब आदि' के २ नाम हैं ॥

१० पद्माकरः, तडागः (+तडाकः, तटाकः, तटागः। २ पु), 'कमल उत्पन्न होनेवाले अथाह तालाब आदि' के २ नाम हैं ॥

११ कासारः (पु), सरसी (स्त्री), सरः (=सरस्, न), 'कृत्रिम (किसी-

१ वेशन्तः पल्वलं चाल्पसरो २ वापी तु दीर्घिका ॥ २८ ॥
३ खेयं तु परिखा४ऽऽधारस्त्वम्भसां यत्र धारणम् ।
५ स्यादालवालमावालमावापोद्ऽथ नदी सरित् ॥ २९ ॥
तरङ्गिणी शैवलिनी तटिनी *ह्रादिनी धुनी ।
† स्रोतस्वती द्वीपवती स्रवन्ती निम्नगाऽऽपगा ॥ ३० ॥
७ 'कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती' (५८)
८ गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥ ३१ ॥

के खुदवाये हुए कमल उत्पन्न होनेवाले तालाब आदि' के भा० दी० मतसे ३ नाम हैं । ('पद्माकरः·····सरः' 'कमल उत्पन्न होनेवाले जलाशय मात्र' के ५ नाम हैं, यह महे० का मत है') ॥

१ वेशन्तः (पु), पल्वलम्, अल्पसरः (= अल्पसरस् । २ न), 'पानीके छोटे-छोटे गढे' के ३ नाम हैं ॥

२ वापी (+ वापिः), दीर्घिका (२ स्त्री), 'बावली' के २ नाम हैं ॥

३ खेयम् (न), परिखा (स्त्री), 'किले आदिके चारो ओरकी खाई' के २ नाम हैं ॥

४ आधारः (पु), 'पानीके बाँध' का १ नाम है ॥

५ आलवालम् (+ अलवालम्), आवालम् (२ न), आवापः (पु), 'थाला' अर्थात् 'गांछी या पौधेको सींचनेके लिये उनके जड़में मिट्टी आदिसे बनाये हुए घेरे' के ३ नाम हैं ॥

६ नदी, सरित्, तरङ्गिणी, शैवलिनी, तटिनी, ह्रादिनी (+ हृदिनी), धुनी, स्रोतस्वती (+ स्रोतस्विनी), द्वीपवती, स्रवन्ती, निम्नगा, आपगा (+ अपगा । १२ स्त्री), 'नदी' के १२ नाम हैं ॥

७ [कूलङ्कषा, निर्झरिणी, रोधोवक्रा, सरस्वती (४ स्त्री), 'नदी' के ४ नाम हैं] ॥

८ गङ्गा, विष्णुपदी, जह्नुतनया (+ जाह्नवी), सुरनिम्नगा, भागीरथी,

---

* '·····हृदिनी·····' इति पाठान्तरम् ॥ † 'स्रोतस्विनी·····' इति पाठान्तरम् ॥

१ कालिन्दी सूर्यतनया यमुना शमनस्वसा ।
२ रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥ ३२ ॥
३ करतोया सदानीरा ४ बाहुदा सैतवाहिनी ।
५ *शुतद्रुस्तु शुतुद्रिः स्याद्विपाशा तु विपाट् स्त्रियाम् ॥ ३३ ॥
७ शोणो † हिरण्यवाहः स्यात्—

त्रिपथगा, त्रिस्रोताः (= त्रिस्रोतस्), भीष्मसूः (८ स्त्री), 'गङ्गा नदी' के ८ नाम हैं ॥

१ कालिन्दी, सूर्यतनया, यमुना, शमनस्वसा (= शमनस्वस् । + यमस्वसा, = यमस्वस् । ४ स्त्री), 'यमुना नदी' के ४ नाम हैं ॥

२ रेवा, नर्मदा, सोमोद्भवा, मेकलकन्यका (४ स्त्री), 'नर्मदा नदी' के ४ नाम हैं ॥

३ ‡ करतोया, सदानीरा (२ स्त्री), पार्वतीके विवाह-कालमें कन्यादानके जलसे निकली हुई नदी-विशेष' के २ नाम हैं ॥

४ बाहुदा, सैतवाहिनी (२ स्त्री), 'कार्तवीर्यद्वारा निकाली हुई एक नदी-विशेष' के २ नाम हैं ॥

५ § शतद्रुः (+ शितद्रुः), शुतुद्रिः (२ स्त्री) 'सतलज नदी' के २ नाम हैं ॥

६ विपाशा, विपाट् (= विपाश् । २ स्त्री), 'विपाशा नदी' के २ नाम हैं॥

७ शोणः (+ शोणभद्रः), हिरण्यवाहः (+ हिरण्यबाहुः । २ पु), 'सोन नामक नद' के २ नाम हैं ॥

---

* 'शुतुद्रिस्तु शतद्रुः स्यात्''' इति क्षी० स्वा० सम्मते पाठभेदेऽपि मूलोक्त भा० दी०, नहे० संमतपाठान्न नात्रि भेदः' उभयथापि 'शतद्रुः, शुतुद्रिः' इत्यनयोरेवाभिधानयोर्लोमादित्यवधेयम् ॥

+ '''''हिरण्यबाहुः''' इति पाठान्तरम् ॥

‡ इयं 'करतोया' नदी पूर्वदेशस्था ब्रह्मपुत्रेण सङ्गता पुलस्त्यतीर्थयात्रायां तथैवोक्तेः ।
'प्रथमं कर्कटे देवी त्वहं गङ्गा रजस्वला । तदा रक्तवहा नद्यः करतोयाऽम्बुवाहिनी' ॥ १ ॥
इति याज्ञवल्क्यस्मृतीयबालम्भट्टीयटीकायां करतोयाऽम्बुवाहिनीत्युक्त्या 'सदानीरा' इत्यन्वर्थं नानेत्यवधेयम् ॥

§ वसिष्ठशापादियं शतधा द्रुतेति पौराणिकीकथाऽनुसन्धानादस्याः 'शतद्रुः' इति नाम जातमिति ज्ञेयम् ॥

—१ कुल्याऽल्पा कृत्रिमा सरित् ।
२ शरावती वेत्रवती चन्द्रभागा सरस्वती ॥ ३४ ॥
कावेरी सरितोऽन्याश्च ३ संभेदः सिन्धुसंगमः ।
४ द्वयोः प्रणाली पयसः पदव्यां ५ त्रिषु तत्तयौ ॥ ३५ ॥
देविकायां सरय्वां च भवे दाविकसारवौ ।
६ सौगन्धिकं तु कह्लारं ७ हल्लकं रक्तसंध्यकम् ॥ ३६ ॥
८ स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म त्त ।
इन्दीवरं च नीलेऽस्मिन् १० सिते कुमुदकैरवे ॥ ३७ ॥

---

१ कुल्या (स्त्री), 'नहर' का १ नाम है ॥

२ शरावती, वेत्रवती, चन्द्रभागा (+ चान्द्रभागी, चन्द्रभागी, चान्द्रभागा, चन्द्रिका), सरस्वती, कावेरी (५ स्त्री), 'शरावती आदि प्रत्येक नदियों' का १–१ नाम है। अन्य भी 'कौशिकी, गण्डकी, गोदा, वेणी, चर्मण्वती, सिन्धु' आदि नदियाँ हैं ॥

३ संभेदः, सिन्धुसंगमः (२ पु), 'नदियोंके संगम' के २ नाम हैं ॥

४ प्रणाली (पु स्त्री । अन्यमतमें स्त्री न), 'पनारे या नाले' का १ नाम है ॥

५ दाविकः, सारवः (२ त्रि), 'देविका और सरयू नदीमें होनेवाले पदार्थ' का क्रमशः १–१ नाम है ॥

६ सौगन्धिकम्, कह्लारम् (न), 'सायंकालमें फूलनेवाले श्वेतकमल' के २ नाम हैं ॥

७ हल्लकम्, रक्तसन्ध्यकम् (२ न), 'लाल कह्लार या त्रिकालमें फूलनेवाले रक्तपुष्प–विशेष' के २ नाम हैं ॥

८ उत्पलम्, कुवलयम् (+ कुवम्, कुवलम् । २ न), 'श्वेत कमल या सामान्यतः कमल और कुमुदमात्र' के २ नाम हैं ॥

९ नीलाम्बुजन्म (= नीलाम्बुजन्मन् । + नीलाम्बुजम्), इन्दीवरम् (+ इन्दीवारम् । २ न), 'नील कमल' के २ नाम हैं ॥

१० कुमुदम्, कैरवम् (२ न), 'श्वेत कमल, कुमुद या कोंई' के २ नाम हैं ॥

---

* "...चान्द्रभागी..." इति "...चन्द्रभागी..." इति च पाठान्तरम् ॥

१ शालूकमेषां कन्दः स्याद्वारिपर्णी तु कुम्भिका ।
२ जलनीलो तु *शेवालं शैवलोऽथ कुमुद्वती ॥ ३८ ॥
कुमुदिन्यां ५ नलिन्यां तु बिसिनीपद्मिनीमुखाः ।
६ वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ॥ ३९ ॥
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥ ४० ॥
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ।
७ पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ॥ ४१ ॥
रक्तोत्पलं कोकनदं ९ नालो नालम्—

---

१ शालूकम् (न), 'कमलमात्रके कन्द (जड़)' का १ नाम है ॥

२ वारिपर्णी, कुम्भिका (२ स्त्री । + ‡ वारिपर्णः, कुम्भिकः, २ पु), 'पुरइन, या जलकुम्भी' के २ नाम हैं ॥

३ जलनीली (स्त्री), शेवालम् (न । + शेवालः, पु), शैवालः (पु । शेवलः, शैवलः), 'सेवार' के ३ नाम हैं ॥

४ कुमुद्वती, कुमुदिनी (२ स्त्री) 'कोंई' के २ नाम हैं ॥

५ नलिनी (+ नडिनी), बिसिनी, पद्मिनी (३ स्त्री), आदि ('आदिसे 'सरोजिनी, कमलिनी उत्पलिनी (३ स्त्री),·····' का संग्रह है'), 'कमलिनी या कमल-समूह' के ३ नाम हैं ॥

६ पद्मम्, नलिनम्, अरविन्दम्, महोत्पलम्, सहस्रपद्मम्, कमलम्, शतपद्मम्, कुशेशयम्, पङ्केरुहम्, तामरसम्, सारसम्, सरसीरुहम्, बिसप्रसूनम्, राजीवम्, पुष्करम्, अम्भोरुहम् (१६ पु न), 'कमल' के १६ नाम हैं ॥

७ पुण्डरीकम्, सिताम्भोजम् (२ न), 'श्वेत कमल' के २ नाम हैं ॥

८ रक्तोत्पलम्, कोकनदम् (२ न), 'लाल कमल' के २ नाम हैं ॥

९ नालः (पु), नालम् (न । + नाली, नाला, २ स्त्री), 'कमलके डण्ठल' के २ नाम हैं ॥

---

* ·····शेवलं शेवालोऽथ···' इति पाठान्तरम् ॥

+ ·····नाला नालमथाख्रियाम्' इति पाठान्तरम् ।

‡ 'कुम्भको वारिपर्णः स्यादित्येके' इति क्षी० स्वा० वचनात् ॥

—१ अथास्त्रियाम्।

मृणालं विसमब्जादिकदम्बे २ षण्डमस्त्रियाम्॥ ४२॥
३ करहाटः *शिफाकन्दः ४ किञ्जल्कः केसरोऽस्त्रियाम्।
५ संवर्तिका नवदलं ६ बीजकोशो वराटकः॥ ४३॥

इति वारिवर्गः॥ १०॥

---

१ मृणालम्, बिसम् (+ विसम्, विशम्। २ पु न), 'कमल आदिके डंठल' के २ नाम हैं॥

२ षण्डम् (न पु), 'कमलके फूल, पत्ती, डण्ठल, जड़ आदि सब अवयवमात्र' का १ नाम है॥

३ करहाटः, शिफाकन्दः (+ शिफा, स्त्री, कन्दः, पु न। २ पु), 'कमलकी जड़' के २ नाम हैं॥

४ किञ्जल्कः, केसरः (+ केशरः। २ पु न), 'कमलके केसर' (पराग) के २ नाम हैं॥

५ संवर्त्तिका (स्त्री), नवदलम् (न), 'कमलके नये पत्ते' के २ नाम हैं॥

६ बीजकोशः (+ बीजकोषः, बीजकोशः, बीजकोषः), वराटकः (२ पु), 'कमलगट्टे' के २ नाम हैं॥

इति वारिवर्गः॥ १०॥

---

* '.....शिफा कन्द.....' इति पाठान्तरम्॥

अथ वर्गोपसंहारः काण्डसमाप्तिश्च ।

१ उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम् ।
पातालभोगि नरकं वारि चैषां च सङ्गतम् ॥ १ ॥
* इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।

अथ वर्गोपसंहारः काण्डसमाप्तिश्च ।

१ मैंने (अमरसिंहने) 'स्वर् १, व्योम २, दिक् ३, काल ४, धी ५, शब्दादि ६, नाट्य ७, पातालभोगि ८, नरक ९ और वारि १०' इन दस वर्गों तथा इनके प्रसङ्गसे प्राप्त 'देवता, राक्षस, मेघ, विद्युत्' आदिको कहा है। ('शब्दादि' के 'आदि' शब्दसे रस, गन्ध,···' का संग्रह है') ॥

२ श्रीअमरसिंहके बनाये हुए, नाम (स्वर्, स्वर्ग, नाक,···') और लिङ्ग ('पुंल्लिङ्ग, स्त्रीलिङ्ग, नपुंसकलिङ्ग और अव्ययादि') को बतलानेवाले **'नामलिंगानुशासन'** अर्थात् **'अमरकोष'** नामक इस ग्रन्थमें 'स्वर्' आदि ('आदि शब्दसे 'व्योम, दिक्, काल,·····' १० वर्गोंका और ‡ मु० मतसे

---

* 'इत्यमरसिंहकृतौ·····समर्थितः' इत्ययं चरमः श्लोकः काण्डत्रयेऽपि क्षी० स्वा० मूलपुस्तके नोपलभ्यते, किन्तु तत्कृते 'अमरकोषोद्घाटन' नामके व्याख्याने प्रथमचरमाध्याययोरव्याख्यातो मूलमात्रमेवोपलभ्यते, भा० दी० अव्याख्यातोऽप्ययं प्रथमकाण्डमात्रे महे० व्याख्यात इत्यतो ग्रन्थकृता रचितो न वेति स्वयमनुसंधेयम् ॥

† 'अत्र गणनया दशानामेव वर्गाणामुपलब्धेः 'उक्तमि'ति प्रतीकमादाय 'अत्रैकादश वर्गाः' इति भा० दी० व्याख्यानं चिन्त्यम्। यद्वा मङ्गलाचरण-प्रतिज्ञा-परिभाषीयाणां श्लोकानामेकं पृथग्वर्गमुररीकृत्य 'अत्रैकादश वर्गा' इति तदुक्तेः सामञ्जस्यमित्यवधेयम्। 'पुण्यपत्तन'-मुद्रिते क्षीरस्वामिकृतामरकोषोद्घाटनाख्यव्याख्याने तु व्योमदिग्वर्गावेकीकृत्यास्मिन् काण्डे नवैव वर्गाः प्रदर्शिताः ॥

‡ प्राधान्यादस्मिन् काण्डे स्वर्गीयसाधारणवस्तुनिरूपणात् स्वरादि नाट्यवर्गान्तं 'स्वर्गवर्गः' ततश्च पातालसम्बन्धिपदार्थनिरूपणात्पातालादि वारिवर्गान्तं 'पातालवर्गः' इत्येतौ द्वावेव वर्गौ मुकुटेनोररीकृतावित्यवधेयम् ॥

स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ॥ २ ॥

इत्यमरसिंहविरचिते 'नामलिङ्गानुशासना' परपर्यायके 'अमरकोषे'

प्रथमः स्वरादिकाण्डः समाप्तः ॥



'पातालवर्ग' का संग्रह है') का यह प्रथम काण्ड (भाग) अङ्ग (भेद और उपभेद) के सहित समर्थित होकर सम्पूर्ण हुआ ॥

इति पण्डितप्रवरश्रीरामस्वार्थमिश्रतनुजश्रीहरगोविन्दमिश्र-

विरचितायां मणिप्रभाख्यामरकोषव्याख्यायां प्रथमः

स्वरादिकाण्डः समाप्तः ॥

अथ द्वितीयकाण्डम्

वर्गभेदान् कथयति—

१ वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
मनुब्रह्मक्षत्त्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

१. अथ भूमिवर्गः ।

२ भूर्भूमिरचला ऽनन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥ २ ॥

---

१ इस द्वितीय काण्डमें अङ्गों और उपाङ्गोंके सहित 'पृथ्वी, पुर, पर्वत, वनौषधि, मृगादि ('आदि' शब्दसे 'पक्षी, कीट' आदिका संग्रह है अथवा 'मृगादि' शब्द *सिंहवाचक है), मनुष्य, ब्रह्म, क्षत्रिय, वैश्य और शूद्र; ये १० वर्ग अर्थात् 'भूमिवर्ग १, पुरवर्ग २, शैलवर्ग ३, वनौषधिवर्ग ४,.....' कहे गये हैं । ('भूमिके अङ्ग—'मृत्, शाखा और नगर' आदि तथा उपाङ्ग 'मृत्सा आदि; पुरके अङ्ग—'आपण' आदि तथा उपाङ्ग 'विपणी' आदि; पर्वतके अङ्ग—'शिला' आदि तथा उपाङ्ग 'मैनसिल, गेरु' आदि धातु; वनौषधिके अङ्ग—'वृक्ष' आदि तथा उपाङ्ग 'फूल, फल' आदि; मृगके अङ्ग—'रुरु' आदि; तथा उपाङ्ग 'लोम' आदि एवं 'मृगादि'के आदि पदसे संगृहीत पक्षीके अङ्ग—'कीट, फतीङ्ग' आदि तथा उपाङ्ग 'चञ्चु, पङ्ख' आदि हैं; इसी तरह अन्यान्य वर्गोंका भी अङ्गोपाङ्ग समझना चाहिये) ॥

१. अथ भूमिवर्गः ।

२ भूः (= भू । + भूः, = भूर्, अ०), भूमिः (+ भूमी), अचला, अनन्ता, रसा, विश्वम्भरा, स्थिरा, धरा, धरित्री, धरणिः (+ धरणी), क्षोणिः (+ क्षोणी,

---

* 'मृगादि' शब्दस्यायमेवार्थः समुचितः, मृगान् पशूनत्तीति मृगादिरिति व्युत्पत्त्या 'मृगादि' शब्दस्य सिंहपर्यायलाभसामञ्जस्यात् । अत एवाग्रे 'सिंहादिवर्ग'कथनं संगच्छतेऽन्यथा मृगादिवर्गकथनस्यौचित्यात् ॥

सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा।
गोत्रा क्रुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही ॥ ३ ॥
१ 'विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा (१)
भूतधात्री रत्नगर्भा जगती सागराम्बरा' (२)
२ मृन्मृत्तिका ३ प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका।
४ उर्वरा सर्वसस्याढ्या ५ स्यादूषः क्षारमृत्तिका ॥ ४ ॥
६ ऊषवानूषरो द्वावप्यन्यलिङ्गौ ७ स्थलं स्थली।

क्ष्मौणिः, क्ष्मौणी), ज्या (+ इज्या*), काश्यपी, क्षितिः, सर्वंसहा, वसुमती, वसुधा, उर्वी, वसुन्धरा, गोत्रा, क्रुः, पृथिवी (+ पृथ्वी), पृथ्वी, क्ष्मा, अवनिः (+ अवनी), मेदिनी, मही (+ महिः † । २७ स्त्री), 'पृथ्वी' के २७ नाम हैं ॥

१ [विपुला, गह्वरी, धात्री, गौः (= गो), इला, कुम्भिनी, क्षमा, भूतधात्री, रत्नगर्भा (+ रत्नवती), जगती, सागराम्बरा (११ स्त्री), 'पृथ्वी' के ११ नाम हैं] ॥

२ मृत् (= मृद्), मृत्तिका (२ स्त्री), 'मिट्टी' के २ नाम हैं ॥

३ मृत्सा, मृत्स्ना (२ स्त्री), 'अच्छी मिट्टी' के २ नाम हैं ॥

४ उर्वरा (+ ऊर्वरा । स्त्री), 'उपजाऊ मिट्टी' का १ नाम है ॥

५ ऊषः (पु), क्षारमृत्तिका (स्त्री), 'खारी मिट्टी' अर्थात् 'सादी मिट्टी, रेह' के २ नाम हैं ॥

६ ऊषवान् (= ऊषवत्), ऊषरः (२ त्रि), 'खारी मिट्टीवाले स्थान' अर्थात् 'ऊसर या रेहचट जमीन' के २ नाम हैं ॥

७ स्थलम् (न), स्थली (स्त्री), 'स्थल' के २ नाम हैं। ('अकृत्रिम भूमि' का 'स्थली' (स्त्री) यह १ नाम है, 'कृत्रिम भूमि' का 'स्थला' (स्त्री) यह १ नाम है और 'भूमिसामान्य' अर्थात् 'भूमिमात्र' का 'स्थलम्' (न) यह १ नाम है') ॥

---

* 'इज्या इति मूर्खव्याख्या, 'ज्या मौर्वी ज्या वसुन्धरा' इति शाश्वतविरोधात्' इति क्षी० स्वा० ॥

† 'वीचिः पङ्क्तिर्महिः केलिरित्याद्या ह्रस्वदीर्घयोः' इति वाचस्पत्युक्तेः ॥

१ समानौ मरुधन्वानौ २ द्वे खिलाप्रहते समे ॥ ५ ॥
त्रिष्व३थो जगती लोको विष्टपं भुवनं जगत् ।
४ लोकोऽयं भारतं वर्ष—

---

१ मरुः, धन्वा (=धन्वन् । २ पु), 'मरुस्थल' अर्थात् 'मारवाड़ देश या राजपूतानेकी ज़मीन' के २ नाम हैं ॥

२ खिलम् , अप्रहतम् (२ त्रि), 'बिना जुती हुई ज़मीन'के २ नाम हैं ॥

३ जगती (स्त्री), लोकः (पु), विष्टपम् (+पु, +पिष्टपम्), भुवनम्, *जगत् (३ न), 'भूतल जगत्' के ५ नाम हैं ॥

४ †भारतम् (+भारतवर्षम्, भारतवर्षः, पु न । न), 'हिन्दुस्तान' का १ नाम है । ('यह 'हिन्दुस्तान' जम्बूद्वीपका नवमांश है । ‡ वर्ष ९ हैं— भारत १, किंपुरुष २, हरिवर्ष ३, रम्य ४, हिरण्मय ५, कुरु ६, भद्राश्व ७, केतुमाल ८ और इलावृत्त ९ । इनमें क्रमशः ३ हिमालयके दक्षिण, ३ उत्तर, १–१ पूर्व तथा पश्चिम और १ मध्य भाग में है') ॥

---

* एकं महाभूतं 'पृथ्वी' पञ्चमहाभूतविषयेन्द्रियात्मकं 'जगत्' इति 'पृथ्वीजगत्यो'र्भेदः ॥

† 'उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः' ॥ १ ॥ इति ।
वर्षं स्थानं विदुः प्राज्ञा इमं लोकं च भारतम्' ॥ इति भारतिश्च ।

‡ तदुक्तम् । जम्बूद्वीपस्थानां नववर्षाणां नामानि—
'स्याद्भारतं किम्पुरुषं हरिवर्षं च दक्षिणाः ।
रम्यं हिरण्मयकुरू हिमाद्रेरुत्तराख्यः ॥ २ ॥
भद्राश्वकेतुमालौ तु द्वौ वर्षौ पूर्वपश्चिमौ ।
इलावृत्तं तु मध्यस्थं सुमेरुर्यत्र तिष्ठति' ॥ २ ॥
इति वाचस्पतिः ॥

एषां सीमां ब्रुवन् क्षी० स्वा० त्वष्टावेव वर्षाण्याह । तथथा—
'हिमवान् हेमकूटश्च निषधो मेरुरन्तरे ।
नीलः श्वेतश्च शृङ्गीवान् गन्धमादनमष्टमम् ॥ १ ॥
इति सीमाविच्छिन्नान्यष्टौ वर्षाणि' ॥ इति ॥

—१ शरावत्यास्तु योऽवधेः ॥ ६ ॥
देशः प्राग्दक्षिणः प्राच्य २ उदीच्यः पश्चिमोत्तरः।
३ प्रत्यन्तो म्लेच्छदेशः स्यात् ४ मध्यदेशस्तु मध्यमः ॥ ७ ॥
५ आर्यावर्तः पुण्यभूमिर्मध्यं *विन्ध्यहिमालयोः।

---

१ † प्राच्यः (पु), 'शरावती नदीके पूर्व और दक्षिण वाले देश' का १ नाम है ॥

२ ‡ उदीच्यः (पु), 'शरावती नदीके पश्चिम और उत्तर वाले देश' का १ नाम है ॥

३ प्रत्यन्तः, §म्लेच्छदेशः (२ पु), 'म्लेच्छ देश' अर्थात् 'कामरूप आदि' के २ नाम हैं ॥

४ ‖ मध्यदेशः, मध्यमः (पु), 'मध्यदेश' के २ नाम हैं ॥

५ ¶ आर्यावर्तः (पु), पुण्यभूमिः (स्त्री), 'विन्ध्याचल और हिमालय पहाड़ के बीचवाले देश' के २ नाम हैं ॥

---

* 'विन्ध्यहिमागयोः' इति पाठान्तरम्।

†, ‡ उक्तञ्च काशिकायाम्—
'प्रागुदक्षौ विभजते हंसः क्षीरोदके यथा।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती' ॥ १ ॥ इति ॥

§ तदुक्तं—चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते।
तं म्लेच्छविषयं प्राहुरार्यावर्तमतः परम्' ॥ इति ॥
विषयो देशः।

‖ तदुक्तं मनुना—'हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ १ ॥ इति (२।२१) ॥
अत्र विनशनं तीर्थविशेषः, परे प्रसिद्धाः ॥

¶ तदुक्तं मनुना—'आसमुद्राच्च वै पूर्वादासमुद्राच्च पश्चिमात्।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः' ॥ १ ॥ इति (२।२२) ॥
तयोर्हिमवद्विन्ध्यपर्वततयोरित्यर्थः ॥

१ नीवृज्जनपदो २ देशविषयौ तूपवर्तनम् ॥ ८ ॥
३ त्रिष्वागोष्ठाऽन्नडप्राये नड्वान्नड्वल इत्यपि ।
५ कुमुद्वान् कुमुदप्राये ६ वेतस्वान् बहु वेतसे ॥ ९ ॥
७ शाद्वलः शादहरिते ८ सजम्बाले तु पङ्किलः ।
९ जलप्रायमनूपं स्यात् १० पुंसि कच्छस्तथाविधः ॥ १० ॥

---

१ नीवृत्, जनपदः (+ जानपदः । २ पु), 'मनुष्योंके ठहरनेकी जगह—ग्राम, नगर' के २ नाम हैं ॥

२ देशः, विषयः (२ पु), उपवर्तनम् (न), 'देश' अर्थात् 'ग्रामके समुदाय' के ३ नाम हैं ॥

३ यहाँसे लेकर 'गोष्ठं गोस्थानकं···' (२।१।१२) के पहलेतक 'त्रिषु'का अधिकार होनेसे सब शब्द त्रिलिङ्ग हैं ॥

४ नड्वान् (नड्वत), नड्वलः (२ त्रि), 'नरसल या नरकट जिस देशमें अधिक हों, उस देश' के २ नाम हैं ॥

५ कुमुद्वान् (= कुमुद्वत्, त्रि), 'जिस देशमें कुमुद अधिक हों, उस देश'का १ नाम है ॥

६ वेतस्वान् (= वेतस्वत्, त्रि), 'जिस देशमें बेंत अधिक हों, उस देश' का १ नाम है ॥

७ शाद्वलः (+ शाड्वलः । त्रि), 'नई घासोंसे हरा भरा स्थान या देश' का १ नाम है ॥

८ पङ्किलः (त्रि), 'कीचड़वाले देश या स्थान' का १ नाम है ॥

९ जलप्रायम्, *अनूपम् (२ त्रि), 'बहुत जलवाले स्थान या अनेक प्रकारके पेड़ लता और झरनेवाले जङ्गलसे युक्त सब तरहके अन्न पैदा होनेवाले देश' के २ नाम हैं ।

१० कच्छः (पु । + न), 'बहुत पानीवाले स्थानके समान नदी आदिके पासवाले बागीचा इत्यादि' का १ नाम है । ('भा० दी० मतसे 'जलप्रायम्' आदि ३ नाम उक्तार्थक हैं') ॥

---

* तदुक्तम्—'नानाद्रुमलतावीरुन्निर्झरप्रान्तशीतलैः ।
वनैर्व्याप्तमनूपं स्यात्सस्यैर्नीहियवादिभिः' ॥ १ ॥ इति ॥

१ स्त्री शर्करा शर्करिलः २ शार्करः शर्करावति।
देश एवादिमाश्चैवमुन्नेयाः सिकतावति ॥ ११ ॥
४ देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥
५ सुराष्ट्रि देशे राजन्वान् स्याद्दत्ततोऽन्यत्र राजवान्।
७ गोष्ठं गोस्थानकं ८ तत्तु गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥
९ पर्यन्तभूः परिसरः—

---

१ शर्करा (नि० स्त्री), शर्करिलः (त्रि), 'अधिक वालूवाले या छोटे-छोटे कङ्कड़वाले या रेतीले देश' के २ नाम हैं ॥

२ शार्करः, शर्करावान् (= शर्करावत् । २ त्रि), 'बालूवाले देश इत्यादि' ('आदि शब्दसे बालूवाले पदार्थ आदिका संग्रह है') के नाम हैं ॥

३ इसी तरह 'सिकता' आदि शब्दसे भी तर्ककर समझना चाहिये। (यथा—'सिकताः (नि० स्त्री। + नि० ब० व०), सैकतिलः (त्रि), 'बालूवाले देश' के २ नाम हैं। सैकतः, सिकतावान् (= सिकतावत् । २ त्रि), 'बालूवाले देश आदि' के दो नाम हैं') ॥

४ नदीमातृकः, देवमातृकः (२ त्रि), 'नदी और नहर आदिके पानीसे खेत सींचनेपर अन्न पैदा होनेवाले देश'का तथा वर्षाके पानीसे खेत सींचनेपर अन्न पैदा होनेवाले देश'का क्रमशः १-१ नाम है ॥

५ राजन्वान् (= राजन्वत्, त्रि), 'धर्मात्मा, शीलवान् और सदाचारी राजासे पालित देश' का १ नाम है ॥

६ राजवान् (= राजवत्, त्रि), 'सामान्य राजासे पालित देश' का १ नाम है ॥

७ गोष्ठम्, गोस्थानकम् (२ न) 'गौओंके रहनेके स्थान-गोशाला आदि' के २ नाम हैं ॥

८ गौष्ठीनम् (न), 'जहाँ पहले गौ रहती हो, उस स्थान'का नाम है ॥

९ पर्यन्तभूः (स्त्री), परिसरः (पु) 'नदी और पहाड़ आदिके पासकी भूमि' के २ नाम हैं ॥

—१ सेतुरालौ स्त्रियां पुमान् ।
२ वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् ॥ १४ ॥
३ अयनं वर्त्म मार्गोऽध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥ १५ ॥
४ अतिपन्थाः सुपन्थाश्च सत्पथश्चाचितेऽध्वनि ।
५ व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥ १६ ॥
६ अपन्थास्त्वपथं ७ तुल्ये शृङ्गाटकचतुष्पथे ।
८ प्रान्तरं दूरशून्योऽध्वा ९ कान्तारं वर्त्म दुर्गमम् ॥ १७ ॥

१ सेतुः (पु), आलिः (+ आली । स्त्री), 'पुल' के २ नाम हैं ॥

२ वामलूरः, नाकुः (२ पु), वल्मीकम् (+ वाल्मीकम् । पु न), 'वामी, बम्बौट, दिमकाण' अर्थात् 'दीमकों द्वारा इकट्ठी की हुई मिट्टीके ढेर' के ३ नाम हैं ॥

३ अयनम्, वर्त्म (= वर्त्मन् । २ न), मार्गः, अध्वा (= अध्वन्), पन्थाः (= पथिन् । + पथः । ३ पु), पदवी (+ पदविः), सृतिः, सरणिः (+ शरणिः), पद्धतिः (+ पद्धती), पद्या, वर्तनी, (+ वर्तनिः, वर्त्मनिः), एकपदी (+ एकपात् = एकपाद् । ७ स्त्री), 'मार्ग, रास्ते' के १२ नाम हैं ॥

४ अतिपन्थाः (= अतिपथिन्), सुपन्थाः (= सुपथिन्), सत्पथः (३ पु), 'अच्छे मार्ग' के ३ नाम हैं ॥

५ व्यध्वः, दुरध्वः, विपथः, कदध्वा (= कदध्वन्), कापथः (+ कुपथः । ५ पु*), 'खराब मार्ग' के ५ नाम हैं ॥

६ अपन्थाः (= अपथिन्, पु), अपथम् (न), 'कुमार्ग, खराब रास्ते' के २ नाम हैं ॥

७ शृङ्गाटकम्, चतुष्पथम् (२ न), 'चौरास्ता या चौक' के २ नाम हैं ॥

८ प्रान्तरम् (न), 'जिसमें बहुत दूरतक छाया और पानी नहीं मिले, उस रास्ते' का १ नाम है ।

९ कान्तारम् (पु न), 'चोर, कण्टक और झाड़ी इत्यादिसे दुर्गम रास्ते' का १ नाम है ॥

* 'विपथं—कापथं' च द्वीवमाहुः, वद्धामनः—('पथः संख्याव्ययादेः') 'सङ्ख्याव्ययपूर्वकस्य पथः क्लीवता' इति क्षी० स्वा० 'विपथकापथ' शब्दयोर्नपुंसकत्वमप्युक्तवान् ॥

१ गव्यूतिः स्त्री क्रोशयुगं २ नल्वः *किष्कुचतुःशतम्।
३ घण्टापथः संसरणं ४ तत्पुरस्योपनिष्करम् ॥ १८ ॥
५ †द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी (३)
दिवस्पृथिव्यौ ६ गङ्गा तु रुमा स्यात्लवणाकरः' (४)
‡इति भूमिवर्गः ॥ १ ॥

---

१ § गव्यूतिः (स्त्री। +पु न। गोरुतम्, गोमतम्, २ न), 'दो कोश लम्बे रास्ते या स्थान' का १ नाम है ॥

२ ‖ नल्वः (पु। +न), 'चार हज़ार हाथ लम्बे रास्ते या रस्सी आदि' का १ नाम है ॥

३ ¶ घण्टापथः (पु), संसरणम् (न), 'राजमार्ग' के २ नाम हैं ॥

४ ॐ उपनिष्करम् (न), 'गाँवके राजमार्ग' का १ नाम है ॥

५ [द्यावापृथिव्यौ, रोदस्यौ, द्यावाभूमी, रोदसी, दिवस्पृथिव्यौ (५ स्त्री नि० द्विव०), 'आकाश और पृथ्वी के समुदाय' के ५ नाम हैं] ॥

६ [गङ्गा, रुमा (२ स्त्री), लवणाकरः (पु), 'खारा समुद्र' के ३ नाम हैं] ॥

इति भूमिवर्गः ॥ १ ॥

---

* 'किष्कुचतुःशती' इति क्वाचित्कः पाठः।

† अयं क्षेपकः क्षी० स्वा० व्याख्यायामुपलभ्यते, तत्र 'दिवस्पृथिव्यौ गङ्गा तु' इत्यस्य स्थाने 'दिवस्पृथिव्याः संज्ञेयम्' इति पाठभेदश्चोक्त इति ज्ञेयम् ॥

‡ 'अङ्गो राङ्गापेक्षया भूमेः प्राधान्यादाह—'इति भूमिवर्गः' इतीत्यवधेयम् ॥

§ तथा च बृहस्पतिः—

'धन्वन्तरसहस्रं तु क्रोशः, क्रोशद्वयं पुनः। गव्यूतं स्त्री तु गव्यूतिर्गोरुतं गोमतं च तत्' ॥१॥ इति।

'धनुर्हस्तचतुष्टयम्' इति।

'द्वाभ्यां धनुःसहस्राभ्यां गव्यूतिः पुंसि भाषितः ॥ इति शब्दार्णवः' इति ॥

एवञ्च—४ हस्ताः = १ धनुः, १००० धनूंषि = १ क्रोशः। २ क्रोशौ वा २००० धनूंषि = १ गव्यूतिः।

‖ 'नल्वं हस्तशतम्' इति भा० दी०। 'किष्कुहस्तस्तेषां चतुःशती 'नल्वम्' इति माला। कात्यस्तु—'नल्वं [विंश] हस्तशतम्' इति क्षी० स्वा०। 'नल्वं विंशं हस्तशतम्' इति मुकुटः ॥

¶ 'दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः' इति चाणक्य इति ॥

ॐ 'तैः संसरणं वर्म गजादीनामसंकुलम्। पुरोपनिष्करं प्रोक्तम्' इति क्षी० स्वा० ॥

२. अथ पुरवर्गः ।

१ पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमो२ऽन्यत्तु यन्मूलनगरात्पुरम् ॥ १ ॥
तच्छाखानगरं ३ वेशो वेश्याजनसमाश्रयः ।
४ आपणस्तु निषद्यायां ५ विपणिः पण्यवीथिका ॥ २ ॥
६ रथ्या प्रतोली विशिखा ७ स्याच्चयो वप्रमस्त्रियाम् ।

---

२. अथ पुरवर्गः ।

१ पूः (= पुर्, स्त्री), पुरी, नगरी (२ स्त्री न), पत्तनम् (+ पट्टनम्), पुटभेदनम्, स्थानीयम् (३ न), निगमः (पु), 'नगर' के ७ नाम हैं। ('जहाँ अनेक तरहके कारीगर व्यापारी आदि बसते हैं उसके 'पूः, पुरी, नगरी' ये ३ नाम हैं, 'जहां राजाके नौकर आदि बसते हैं उसके 'पत्तनम्, पुटभेदनम्' ये २ नाम हैं और खाई या चहारदीवारी आदिसे घिरे हुए नगरके 'स्थानीयम्, निगमः' ये २ नाम हैं' यह भी किसी २ का मत है') ॥

२ शाखानगरम् (न), 'राजधानीके समीपवर्ती छोटे-छोटे नगर' का १ नाम है ॥

३ वेशः, वेश्याजनसमाश्रयः (भा० दी० । २ पु), 'वेश्याओंके वास-स्थान' के २ नाम हैं ॥

४ आपणः (पु), निषद्या (स्त्री), 'बाज़ार, हाट या ग्राहकोंके खरीदने योग्य वस्तु (सौदा) के रखनेके स्थान' अर्थात् 'गोदाम' के २ नाम हैं ॥

५ विपणिः (+ विपणी), पण्यवीथिका (+ पण्यवीथी । २ स्त्री), 'दूकानोंकी पङ्क्ति या बाज़ारका रास्ता या बाज़ारसे भिन्न सौदा बेचनेके किसी भी स्थान' के २ नाम हैं। ('आपणः' आदि ४ नाम 'बाज़ार' के हैं, यह भी मत है') ॥

६ रथ्या, प्रतोली, विशिखा (३ स्त्री), 'गली' के ३ नाम हैं। ('विपणिः आदि ५ नाम एकार्थक हैं, यह भी मत है') ॥

७ चयः (पु), वप्रम् (न पु), 'धूस' अर्थात् 'किलेके चारों तरफ ऊँचे किये हुये मिट्टीके ढेर' के २ नाम हैं ॥

१ प्राकारो वरणः *सालः २ प्राचीनं प्रान्ततो वृतिः ॥ ३ ॥
३ भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम् ।
५ गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥
†निशान्तवस्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥
६ वासः कुटी द्वयोः शाला सभा ७ संजवनं त्विदम् ।
चतुःशालं ८ मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥

---

१ प्राकारः, वरणः, सालः (+ शालः । ३ पु), 'बाँस या काँटा आदि के घेरे' के ३ नाम हैं ॥

२ प्राचीनम् (+ प्राचीरम् । न), 'काँटा आदिसे घिरे हुए नगरके समीपवाले स्थान' का १ नाम है ॥

३ भित्तिः (स्त्री), कुड्यम् (न), 'दिवाल' के २ नाम हैं ॥

४ एडूकम् (+ एडुकम्, एडोकम् । न), 'मजबूतीके लिये भीतरमें हड्डी, लोहा, लकड़ी या टीन आदि देकर बनाई हुई दीवाल' का १ नाम है ॥

५ गृहम्, गेहम्, उदवसितम्, वेश्म (= वेश्मन्), सद्म (= सद्मन्), निकेतनम्, निशान्तम्, वस्त्यम् (+ पस्त्यम्, बस्त्यम्), सदनम् (+ सादनम्), भवनम्, अगारम्, मन्दिरम् (१२ न), गृहाः (पु नि० ब० व०), निकाय्यः (+ निकायः), निलयः, आलयः (३ पु), 'मकान' के १६ नाम हैं ॥

६ वासः (पु), कुटी (+ कुटिः । पु स्त्री), शाला, सभा (२ स्त्री), 'सभाभवन या बैठकखाना' के ४ नाम हैं । ('गृहम्,.....' २० नाम 'मकान' ही के हैं, यह भी मत है') ॥

७ संजवनम्, चतुःशालम् (+ चतुःशाला, स्त्री । २ न), 'चौतरफा घरवाले स्थान' के २ नाम हैं ॥

८ पर्णशाला (स्त्री । + न), उटजः (पु न), 'पत्तोंसे बनाई हुई साधुओंकी कुटी' के २ नाम हैं ॥

---

* 'सालः प्राचीरं' इति पाठान्तरम् ॥

† 'कुलोदवसितं पस्त्यम्' इति वाचस्पत्यनुरोधात्—'निशान्तपस्त्यसदनम्' इत्यपीति क्षी० स्वा० आह ॥

१ चैत्यमायतनं तुल्ये २ वाजिशाला तु मन्दुरा ।
३ आवेशनं *शिल्पिशाला ४ प्रपा पानीयशालिका ॥ ७ ॥
५ मठश्छात्रादिनिलयो ६ गञ्जा तु मदिरागृहम् ।
७ गर्भागारं वासगृह ८ मरिष्टं सूतिकागृहम् ॥ ८ ॥
९ †'कुट्टिमोऽस्त्री निबद्धा भू १०श्चन्द्रशाला शिरोगृहम्'(५)
११ वातायनं गवाक्षो१२ऽथ मण्डपोऽस्त्री जनाश्रयः ।

---

१ चैत्यम्, आयतनम् (२ न), 'यज्ञस्थान-विशेष' के २ नाम हैं ॥

२ वाजिशाला, मन्दुरा (२ स्त्री), 'अस्तबल' के २ नाम हैं ॥

३ आवेशनम् (न), शिल्पिशाला (+ शिल्पशाला । स्त्री । + न), 'कारीगरोंके घर' के २ नाम हैं ॥

४ प्रपा, पानीयशालिका (+ पानीयशाला । २ स्त्री), 'पौसरा, प्याऊ, या पानी रखनेकी जगह' के २ नाम हैं ॥

५ मठः (पु), 'मठ' अर्थात् 'विद्यार्थियों या संन्यासियोंके रहनेकी जगह' के २ नाम हैं ॥

६ गञ्जा (स्त्री), मदिरागृहम् (न), 'कलवरिया या मदिराक घर' के २ नाम हैं ॥

७ गर्भागारम्, वासगृहम् (२ न), 'घरके बीचके हिस्से' अर्थात् 'तहखाने' के २ नाम हैं ॥

८ अरिष्टम्, सूतिकागृहम् (+ सूतकागृहम् । २ न), 'सौरीके घर' अर्थात् 'जिसमें लड़का पैदा हुआ हो उस घर' के २ नाम हैं । ('किसीके मतसे 'गर्भागारम्,.....' ४ शब्द एकार्थक हैं') ॥

९ [कुट्टिमः (पु न), 'पत्थर या संगमर्मर आदिके बने हुए फ़र्श' का १ नाम है] ॥

१० [चन्द्रशाला (स्त्री), शिरोगृहम् (न), 'अटारी या घरके ऊपरी छत' के २ नाम हैं] ॥

११ वातायनम् (न), गवाक्षः (पु), 'झरोखे' के २ नाम हैं ॥

१२ मण्डपः (पु न), जनाश्रयः (पु), 'मण्डप' के २ नाम हैं ॥

---

* 'शिल्पिशालम्' इति पाठान्तरम् । 'शिल्पशाला' इति सर्व्यः पाठ' इति क्षी० स्वा० ॥

† अयं क्षी० स्वा० व्याख्यायां तनुपलभ्यते ॥

१ *हर्म्यादि धनिनां वासः २ प्रासादो देवभूभुजाम् ॥ ९ ॥
३ सौधोऽस्त्री राजसदन ४ मुपकार्योपकारिका ।
५ स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ॥ १० ॥
†विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ।
६ स्त्ययगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥
शुद्धान्तश्चावरोधश्च ७ स्यादट्टः क्षोममस्त्रियाम् ।
८ प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥

---

१ हर्म्यम् (न), आदि ('आदि शब्दसे 'स्वस्तिकम्, अट्टालिकम्, वास-गृहम् (३ न),.....' 'धनियोंके रहनेके स्थान' का नाम है ॥

२ प्रासादः (पु), 'देवताओं और राजाओंके निवासस्थान या कोठे' का १ नाम है ॥

३ सौधः (पु न), राजसदनम् (न), 'राजाके घर' के २ नाम हैं ॥

४ उपकार्या, उपकारिका (२ स्त्री) 'तम्बू, कनात, सामियाना' के २ नाम हैं । ('सौधम्,.....' ४ शब्द 'राजगृह' के नाम हैं') ॥

५ स्वस्तिकः, सर्वतोभद्रः, नन्द्यावर्तः, आदि ('आदि' शब्दसे 'रूपकः, वर्द्धमानः,.....'), विच्छन्दकः (+ विच्छर्दकः । ४ पु), 'धनियोंके गृहों' के १–१ नाम हैं । ('चारों तरफसे दरवाजा और तोरणवाले घरको 'स्वस्तिक', अनेक मंजिले घरको 'सर्वतोभद्र', गोलाकार घरको 'नन्द्यावर्त' और बड़े तथा सुन्दर घरको 'विच्छन्दक' कहते हैं') ॥

६ अन्तःपुरम्, अवरोधनम् (२ न), शुद्धान्तः, अवरोधः (२ पु), 'रनिवास' के ४ नाम हैं ॥

७ अट्टः (पु), क्षोमम् (+ क्षौमम् । न पु), 'अटारी' के २ नाम हैं ॥

८ प्रघाणः, प्रघणः, अलिन्दः (+ आलिन्दः । ३ पु), 'पटडेहर' अर्थात् 'चौकठकी बाहरी जगह' के ३ नाम हैं ॥

---

* एतत्पूर्वं 'मत्तालम्बोऽपाश्रयः स्यात्प्रग्रीवो मत्तवारणः' इति क्षेपकः क्षी० स्वा० व्याख्याने उपलभ्यते ॥ † 'विच्छर्दकप्रभेदा हि' इति पाठान्तरम् ॥

१ गृहावग्रहणी *देहल्यङ्गणं चत्वराजिरे ।
३ अधस्ताद्दारुणि शिला ४ नासा दारूपरि स्थितम् ॥ १३ ॥
* 'कोयष्टिष्टिट्टिभः कोकः ककरो वर्तकादयः' इति क्षी० स्वा० सम्मतः पाठः। अत्र मूलोक्तपाठं मत्वा 'उदीचां तु स्त्रियामित्वम्, प्राचां न (वा० ७।३।४५) इति स्त्रियां रूपद्वयप्रदर्शनाय 'वर्तिका' ग्रहणम्' इति प्राञ्चः। वस्तुतस्तु 'वृतेस्तिकन्' (उ० सू० ३।१४६) इति तिकन्नन्तस्य मूषिकवत्पुंस्यपि 'वर्तिकः' इति रूपकथनमिदम्' इति भा० दी०। पूर्वोक्त क्षी० स्वा० सम्मते पाठे तु नैव रूपद्वयप्रदर्शनमित्यवधेयम् ॥

† 'पेशीकोशो' इति 'कोषो' इति च पाठान्तरम् ॥

१ स्त्रीपुंसौ मिथुनं द्वन्द्वं २ युग्मं तु युगलं युगम् ॥ ३८ ॥
३ समूहो निवहव्यूहसंदोहविसरव्रजाः ।
स्तोमौघनिकरव्रातवारसंघातसञ्चयाः ॥ ३९ ॥
समुदायः समुदयः समवायश्चयो गणः ।
स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ ४० ॥
४ वृन्दमेदाः ५ समैर्वर्गः ६ संघसार्थौ तु जन्तुभिः ।
७ सजातीयैः कुलं ८ यूथं तिरश्चां पुन्नपुंसकम् ॥ ४१ ॥

---

१ स्त्रीपुंसौ (भा० दी० मतसे । नित्य द्विव० पु), मिथुनम्, द्वन्द्वम् (२ न), 'स्त्री और पुरुषकी जोड़ी' के ३ नाम हैं ॥

२ युग्मम्, युगलम्, युगम् (३ न), 'जोड़ा, सम' के ३ नाम हैं ॥

('मुकुटने 'द्वन्द्व' शब्दको भी इसीका पर्याय मानकर ४ नाम * कहा है') ॥

३ समूहः, निवहः, व्यूहः, संदोहः, विसरः, व्रजः, स्तोमः, ओघः, निकरः, व्रातः, वारः, संघातः, सञ्चयः, समुदायः, समुदयः, समवायः, चयः, गणः (१८ पु), संहतिः (स्त्री), वृन्दम्, निकुरम्बम्, कदम्बकम् (३ न), 'समूह' के २२ नाम हैं ॥

४ अब समूहोंके भेद-विशेष कहते हैं ॥

५ वर्गः (पु), 'एकजातीय प्राणियों या अप्राणियोंके समूह' का १ नाम है । ('जैसे—मनुष्यवर्गः, ब्राह्मणवर्गः, शैलवर्गः,·····') ॥

६ † संघः, ‡ सार्थः (२ पु), एकजातीय या भिन्नजातीय प्राणिमात्रके समूह' के २ नाम हैं । (जैसे—'पशुसङ्घः, पक्षिसङ्घः, वणिक्सङ्घः···') ॥

७ कुलम् (न), 'एकजातीय केवल प्राणियोंके समूह' का १ नाम है । (जैसे—'ब्राह्मणकुलम्, ऋषिकुलम्, गोकुलम्,·····') ॥

८ § यूथम् (न पु). 'एक जातिके तिर्यग्जातीय' (पशुपक्षीआदिके) समूह'

---

* 'द्वन्द्व' शब्दस्य 'युग्म' पर्यायत्वमनुचितम् । तथा सति '—द्वन्द्वमाद्वे । रहस्ये मिथुने युग्मे—' (अने० सं० ३।५२३—५२४) इति हैमात् 'द्वन्द्वं रहस्ये कलहे तथा मिथुनयुग्मयोः' (मेदिनी पृ० १७२ श्लो० १०) इति मेदिन्याश्चाविरोधेऽपि 'त्वन्ताथादि न···' (१।१।४) इत्यादिग्रन्थकारप्रतिज्ञाविरोधात् । 'द्वन्द्वयुग्मे तु' इति पाठे तु ग्रन्थकारप्रतिज्ञाऽविरोधान्मुकुटमतस्य सामञ्जस्यमपीत्यवधेयम् ॥

† ‡ § 'सङ्घतद्घातपुञ्जौघसार्थयूथकदम्बकाः' इति ।

१ पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम् ।
स्यान्निकायः ४ पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥४२॥
५ कापोतशौकमायूरतैत्तिरादीनि तद्गणे ।
६ गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥४३॥

इति सिंहादिवर्गः ॥ ५ ॥

का १ नाम है । 'जैसे—'मृगयूथम्, गजयूथम्, बर्हियूथम्,.....' ॥

१ समजः (पु), 'केवल पशुओंके समूह' का १ नाम है । (जैसे—गोसमजः,.....') ॥

२ समाजः (पु), 'पशुसे भिन्न जातिवालोंके समूह' का १ नाम है । ('जैसे—'श्रोत्रियसमाजः, ब्राह्मणसमाजः,.....') ॥

३ निकायः (पु), 'एक जातिवालोंके समूह' का १ नाम है । (जैसे—ब्राह्मणनिकायः, गोनिकायः, श्रमणनिकायः,.....') ॥

४ पुञ्जः (+ पिञ्जः), राशिः, उत्करः (३ पु), कूटम् (न पु), 'अन्न इत्यादिकी ढेरी' के ४ नाम हैं । ('जैसे—धान्यराशिः, तृणराशिः,.....') ॥

५ कापोतम्, शौकम्, मायूरम्, तैत्तिरम् (४ न), आदि ('आदिसे—'कौक्कुटम, काकम,.....'), 'कबूतर, मुर्गा, मोर और तीतर' आदि ('आदिसे—मुर्गा और कौआ,.....') के समूह' का क्रमशः १-१ नाम है ॥

६ छेकः, गृह्यकः (२ पु), 'पालतू पशु-पक्षी' अर्थात् 'घरमें पाले हुए तोता, मोर, मैना आदि पक्षी और मृग आदि पशुओं' के २ नाम हैं ॥

इति सिंहादिवर्गः ॥ ५ ॥

---

१ 'निकरनिकायविसरव्रजपुञ्जसमूहसञ्चयाः समुदयसार्थयूथनिकुरम्बकदम्बकपूगराशयः ।
चयसमवायवृन्दसन्दोहसमाजवितानसंहतिप्रकरघनौघसंघसंघातव्रातकुलोत्कराः स्मृताः' ॥
(अमि० रत्न० ४।१) इति चोक्त्वा भागुरिहलायुधौ 'सङ्घसार्थयूथपुञ्जानां पर्यायतामाहतुः' इत्यवधेयम् ॥

६. अथ मनुष्यवर्गः ।

१ मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
२ स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥
३ *स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥
४ विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥
सुन्दरी रमणी रामा ५ कोपना सैव भामिनी ।
६ वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥

---

६. अथ मनुष्यवर्गः ।

१ मनुष्यः, मानुषः, मर्त्यः, मनुजः, मानवः, नरः (६ पु), भा० दी० मतसे 'मनुष्यमात्र' के ६ नाम हैं ॥

२ पुमान् (= पुंस्), पञ्चजनः, पुरुषः, पूरुषः, ना (= नृ । ५ पु), भा० दी० मतसे 'पुरुष' अर्थात् 'मर्द' के ५ नाम हैं । ('महे० मतसे 'मनुष्यः,··· ···ना' ये ११ नाम 'मनुष्य' के हैं') ॥

३ स्त्री, योषित् (+ जोषित्, योषिता, जोषिता), अबला (+ अबला), योषा (+ जोषा), नारी, सीमन्तिनी, वधूः, प्रतीपदर्शिनी, वामा, वनिता, महिला (+ महेला, महला । ११ स्त्री), 'औरत, जनाना' के ११ नाम हैं ॥

४ अङ्गना, भीरुः (+ भीरूः, भीलुः भीलूः), कामिनी, वामलोचना, प्रमदा, मानिनी, कान्ता, ललना, नितम्बिनी, सुन्दरी (+ सुन्दरा), रमणी (+ रमणा), रामा (१२ स्त्री), ये १२ 'स्त्रियोंके भेद-विशेष' हैं ॥

५ कोपना, भामिनी (२ स्त्री), 'क्रोध करनेवाली स्त्री' के २ नाम हैं ॥

६ वरारोहा, मत्तकाशिनी (+ मत्तकासिनी), उत्तमा, † वरवर्णिनी (४ स्त्री), 'गुणवती स्त्री' के ४ नाम हैं ॥

---

* 'स्त्री योषिदबला जोषा' इति पाठान्तरम् ॥

† वरवर्णिनीलक्षणं यथा—

'शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला ।
भर्तृभक्ता च या नारी विज्ञेया वरवर्णिनी' ॥ १ ॥ इति ॥

१ कृताभिषेका महिषी २ भोगिन्योऽन्या नृपस्त्रियः।
३ पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाऽथ पुंभूम्नि दाराः ४ स्यात्तु कुटुम्बिनी।
पुरन्ध्री ५ सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥
६ *कृतसापत्निकाऽध्यूढाऽधिविन्नाऽथ स्वयंवरा।
पतिंवरा च वर्याऽथ कुलस्त्री कुलपालिका ॥ ७ ॥
९ कन्या कुमारी—

---

१ महिषी (स्त्री), 'पटरानी' का १ नाम है। ('जैसे—वासवदत्ता,···') ॥

२ भोगिनी (स्त्री), 'पटरानियोंसे भिन्न रानियों' का १ नाम है। ('जैसे-पद्मावती,·····') ॥

३ पत्नी, पाणिगृहीती, द्वितीया, सहधर्मिणी (+ सधर्मिणी, सहचरी), भार्या, † जाया (६ स्त्री), दाराः (= दार, पु नि० ब० व० । + ‡ दारा = स्त्री), 'ब्याही हुई स्त्री' के ७ नाम हैं ॥

४ कुटुम्बिनी, पुरन्ध्री (+ पुरन्ध्रिः, सु०), 'पति-पुत्रवाली स्त्री' के २ नाम हैं ॥

५ सुचरित्रा, सती, साध्वी, पतिव्रता (४ स्त्री), 'पतिव्रता स्त्री' के ४ नाम हैं ॥

६ कृतसापत्निका (+ कृतसापत्नका), अध्यूढा, अधिविन्ना (३ स्त्री), 'अनेक विवाह किये हुए पुरुषकी पहली स्त्री' के ३ नाम हैं ॥

७ स्वयंवरा, पतिंवरा, वर्या (३ स्त्री), 'जिसके लिये स्वयंवर किया गया हो उस कन्या' के ३ नाम हैं ॥

८ कुलस्त्री, कुलपालिका (२ स्त्री), 'कुलीन स्त्री' के २ नाम हैं ॥

९ कन्या, कुमारी (२ स्त्री), 'प्रथम अवस्थावाली या काँरी लड़की' के २ नाम हैं ॥

---

* 'कृतसापत्नकाऽध्यूढा—' इति पाठान्तरम् ॥

† 'जायायास्तद्धि जायात्वं यदस्यां जायते पुनः' इति मनुः ॥

‡ 'क्रोडा हारा तथा दारा त्रय एते यथाक्रमम्।
क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः' ॥ १ ॥ इत्युक्तेः ॥

१ गौरी तु नग्निकाऽनागतार्तवा ।
२ स्यान्मध्यमा दृष्टरजाऽस्तरुणी युवतिः समे ॥ ८ ॥
४ *समाः स्नुषाजनीवध्वश्चिरिण्टी तु स्ववासिनी ।

---

१ †गौरी, ‡नग्निका (+लग्निका), अनागतार्तवा (३ स्त्री), 'जिसे रजोधर्म नहीं हुआ हो उस स्त्री' के ३ नाम हैं ॥

२ मध्यमा, दृष्टरजाः (=दृष्टरजस्। २ स्त्री), 'जिसे पहली बार रजोधर्म हुआ हो उस स्त्री' के २ नाम हैं ॥

३ तरुणी (+तलुनी), युवतिः (+युवती। २ स्त्री), 'जवान स्त्री' के २ नाम हैं। (स्त्री १६ वर्षकी अवस्थातक 'बाला' १७ से ३० वर्षकी अवस्था तक 'तरुणी', ३१ से ५५ वर्षकी अवस्थातक 'प्रौढा' और उसके बाद 'वृद्धा' कहलाती है; यह वृद्धा रतिमें त्याज्य है §। यह अवस्थाकथन जब मनुष्य स्वस्थ एवं पूर्णायु होते थे, उस समयके अनुसार उचित प्रतीत होता है) ॥

४ स्नुषा, जनी (+जनिः), वधूः (३ स्त्री), 'पतोहू' अर्थात् 'पुत्र, भतीजा या शिष्य आदिकी स्त्री' के ३ नाम हैं ॥

५ चिरिण्टी (+चिरण्टी, चरण्टी, चरिण्टी), स्ववासिनी (+सुवासिनी। २ स्त्री), 'जिसे जवानीके चिह्न कुछ-कुछ मालूम पड़ रहे हों ऐसी विवाहिता स्त्री' के २ नाम हैं ॥

---

* 'समाः स्नुषाजनीवध्वश्चिरण्टी तु सुवासिनी' इति पाठान्तरम् ॥

† ‡ अथ प्रसङ्गात्स्त्रीणां संज्ञाविशेषा उच्यन्ते—

'बालेति गीयते नारी यावद्वर्षाणि षोडश ।
गौरी स्वसंजातरजाः श्यामा षोडशवार्षिकी' ॥ १ ॥ इति ॥
'अष्टवर्षा भवेद् गौरी नववर्षा च रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला' ॥ १ ॥
इति संवर्तस्मृतिः १।६६ ॥

अत्र 'अष्टवर्षा भवेद् गौरी नवमे नग्निका भवेत्' इति स्मार्तो विशेषो नाद्रृत इति क्षी० स्वा० ॥

§ अवस्थाभेदेन स्त्रीणां संज्ञा आह—

'यावत्षोडशसंख्यमब्दमुदिता बाला ततस्त्रिंशतं
तावत्स्यात्तरुणीति बाणविशिखैः संख्या तु तावद्भवेद् ।
सा प्रौढेत्यभिधीयते कविवरैर्वृद्धा तदूर्ध्वं स्मृता
निन्द्या कामकलाकलापविधिषु त्याज्या सदा कामिभिः' ॥ १ ॥ इति ॥

१ इच्छावती कामुका स्याद् २ वृषस्यन्ती तु कामुकी ॥ ९ ॥
३ कान्तार्थिनी तु या याति संकेतं साऽभिसारिका।
४ पुंश्चली * धर्षिणी बन्धकयसती कुलटेत्वरी ॥ १० ॥
स्वैरिणी पांशुला च स्यादशिश्वी शिशुना विना।
६ अवीरा निष्पतिसुता ७ विश्वस्ताविधवे समे ॥ ११ ॥
८ आलिः सखी वयस्याऽस्य पतिवत्नी सभर्तृका।

---

१ इच्छावती, कामुका (२ स्त्री), 'किसी पदार्थको चाहनेवाली स्त्री' के २ नाम हैं ॥

वृषस्यन्ती, कामुकी (२ स्त्री), 'बैल-घोड़ेकी तरह अधिक मैथुनकी इच्छा करनेवाली स्त्री' के २ नाम हैं ॥

३ † अभिसारिका (स्त्री), 'रतिके लिये अपने पति या जारके संकेत किये हुए स्थानपर जानेवाली या जार वा पतिको संकेत-स्थानपर बुलानेवाली स्त्री' का १ नाम है ॥

४ पुंश्चली, धर्षिणी (+ चर्षणी, धर्षणीः, कर्षणिः), बन्धकी, असती, कुलटा, इत्वरी, स्वैरिणी, पांशुला (+ व्यभिचारिणी । ८ स्त्री), 'व्यभिचारिणी स्त्री' के ८ नाम हैं ॥

५ अशिश्वी (स्त्री), 'वंशहीन स्त्री' का १ नाम है ॥

६ अवीरा (स्त्री), 'पति और पुत्रसे हीन स्त्री' का १ नाम है ॥

७ विश्वस्ता, विधवा (२ स्त्री), 'विधवा स्त्री' के २ नाम हैं ॥

८ आलिः, सखी, वयस्या (३ स्त्री), 'सहेली' के ३ नाम हैं ॥

९ पतिवत्नी, सभर्तृका (२ स्त्री), 'सधवा स्त्री' के २ नाम हैं ॥

---

* 'चर्षणी' इति 'धर्षणी' इति च पाठान्तरे ॥

† अभिसारिकाया लक्षणान्याहुः। तथा—

'हित्वा लज्जाभये क्लिष्टा मदनेन मदेन च।
अभिसारयते कान्तं सा भवेदभिसारिका' ॥ १ ॥ इति भरतः ॥
'कामार्ताऽभिसरेत्कान्तं सारयेद्वाऽभिसारिका' ॥ दशरूपक २।३७ इति ॥
अभिसारयते कान्तं या मन्मथवशंवदा।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका' ॥१॥ सा०द० ३।११८ इति ॥

१ वृद्धा पलिक्नी २ प्राज्ञी तु प्रज्ञा ३ प्राज्ञा तु धीमतो ॥ १२ ॥
४ शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च ।
६ आभीरी तु महाशूद्री जातिपुंयोगयोः समा ॥ १३ ॥
७ अर्याणी स्वयमर्या स्यात् ८ क्षत्रिया क्षात्रयाण्यपि ।
९ उपाध्यायाऽप्युपाध्यायी १० स्यादाचार्यापि च स्वतः ॥ १४ ॥
११ आचार्यानी तु पुंयोगे १२ स्यादर्या—

---

१ वृद्धा, पलिक्नी (२ स्त्री), 'वृद्ध या पके हुए बालवाली स्त्री' के २ नाम हैं ॥

२ प्राज्ञी, प्रज्ञा (२ स्त्री), 'किसी विषयको अच्छी तरह स्वयं जाननेवाली स्त्री' के २ नाम हैं ॥

३ प्राज्ञा, धीमती (+ बुद्धिमती । स्त्री), 'चतुर स्त्री' के २ नाम हैं ॥

४ शूद्री (स्त्री), 'किसी भी वर्णमें उत्पन्न हुई शूद्रकी स्त्री' का १ नाम है ॥

५ शूद्रा (स्त्री), 'शूद्र वर्णमें उत्पन्न हुई शूद्रकी या अन्य किसी जातिकी स्त्री' का १ नाम है ॥

६ आभीरी, महाशूद्री (२ स्त्री), 'ग्वालिन या गोपकी स्त्री, महाशूद्र-कुलमें उत्पन्न किसी भी जातिकी स्त्री, अन्य वर्णमें उत्पन्न महाशूद्रकी स्त्री' के २ नाम हैं ॥

७ अर्याणी, अर्या (२ स्त्री), 'वैश्य कुलमें उत्पन्न स्त्री' के २ नाम हैं ॥

८ क्षत्रिया, क्षात्रयाणी (२ स्त्री), 'क्षत्रिय कुलमें उत्पन्न स्त्री' के २ नाम हैं ॥

९ उपाध्याया, उपाध्यायी (२ स्त्री), 'स्वयं पढ़ानेवाली स्त्री' के २ नाम हैं ॥

१० आचार्या (स्त्री), 'मन्त्रोंकी स्वयं व्याख्या करनेवाली स्त्री' का १ नाम है ॥

११ आचार्यानी (+ आचार्याणी । स्त्री), 'आचार्यकी स्त्री' का १ नाम है ॥

१२ अर्या (स्त्री), 'किसी भी जातिमें पैदा हुई वैश्यकी स्त्री' का १ नाम है ॥

—१ क्षत्रियी तथा।
२ उपाध्यायान्युपाध्यायी ३ पोटा स्त्रीपुंसलक्षणा ॥ १५ ॥
३ वीरपत्नी वीरभार्या ५ वीरमाता तु वीरसूः।
६ जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥
७ स्त्री नग्निका *कोटवी स्याद् ८ दूतीसंचारिके समे।
९ कात्यायन्यर्द्धवृद्धा या † काषायवसनाऽधवा ॥ १७ ॥
१० ‡ सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका।

---

१ क्षत्रियी (स्त्री), 'किसी भी जातिमें उत्पन्न हुई क्षत्रियकी स्त्री' का १ नाम है ॥

२ उपाध्यायानी, उपाध्याया (२ स्त्री), 'पढ़ानेवालेकी स्त्री' के २ नाम हैं ॥

३ पोटा (स्त्री), 'स्तन और दाढी (स्त्री-पुरुषके इन दो लक्षणों) से युक्त स्त्री या नपुंसक स्त्री' का १ नाम है।

४ वीरपत्नी, वीरभार्या (२ स्त्री), 'शूरवीरकी पत्नी' के २ नाम हैं ॥

५ वीरमाता (= वीरमातृ), वीरसूः (२ स्त्री), 'शूरवीरकी माता' के २ नाम हैं ॥

६ जातापत्या, प्रजाता, प्रसूता, प्रसूतिका (४ स्त्री) 'प्रसूति' अर्थात् 'जिसे सन्तान पैदा किये थोड़े दिन बीते हों उस 'जच्चा' स्त्री के ४ नाम हैं ॥

७ नग्निका (भा० दी०), कोटवी (+ कोट्टवी, कौटवी। २ स्त्री), 'नंगी स्त्री' के २ नाम हैं ॥

८ दूती, संचारिका (२ स्त्री), 'दूती' के २ नाम हैं ॥

९ कात्यायनी (स्त्री), 'अधबूढ़, गेरुआ कपड़ा पहनी हुई विधवा स्त्री' का १ नाम है ॥

१० § सैरन्ध्री (+ सैरिन्ध्री। स्त्री) 'जो दूसरेके घर रहे, स्वतन्त्र

---

* 'कोट्टवी' इति पाठान्तरम् ॥ † 'कषायवसनाऽधवा' इति पाठान्तरम् ॥
‡ 'सैरिन्ध्री' इति पाठान्तरम् ॥
§ सैरन्ध्रीलक्षणं यथा—

चतुःषष्टिकलाऽभिज्ञा शीलरूपादिसेविनी।
प्रसाधनोपचारज्ञा सैरन्ध्री परिकीर्तिता ॥ १ ॥ इति कात्यः।

क्षी० स्वा० तु 'परिकीर्तिता' इत्यत्र 'स्ववशेति च' इति पाठमाह ॥

१ असिक्नी स्यादवृद्धा या प्रेष्याऽन्तःपुरचारिणी ॥ १८ ॥
२ वारस्त्री गणिका *वेश्या रूपाजीवाऽथ सा जनैः ।
सत्कृता वारमुख्या स्यात् ४ कुट्टनी शम्भली समे ॥ १९ ॥
५ विप्रश्निका त्वीक्षणिका दैवज्ञा६ऽथ रजस्वला ।
†स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥
ऋतुमत्यप्युदक्यापि ७ स्याद्रजः पुष्पमार्तवम् ।

हो और केश झाड़ना-गूथना आदि शिल्पकार्य करती हो उस स्त्री' का १ नाम है । (जैसे—राजा विराटके यहां अज्ञातवास करती हुई द्रौपदी सैरन्ध्री का कार्य करती थी) ॥

१ ‡असिक्नी (स्त्री) 'जो वृद्धा नहीं हो, आज्ञा पाकर कहीं आया जाया करे और रनिवासमें रहे उस स्त्री' का १ नाम है ॥

२ वारस्त्री, गणिका, वेश्या (+ वेष्या), रूपाजीवा (+ पण्यस्त्री, पणस्त्री । ४ स्त्री), 'वेश्या' के ४ नाम हैं ॥

३ वारमुख्या (स्त्री), 'सौन्दर्य और गान आदि से बड़े लोगोंके द्वारा प्रतिष्ठा पानेवाली वेश्या' का १ नाम है ॥

४ कुट्टनी, शम्भली (+ सम्भली । २ स्त्री), 'कुटिनी' के २ नाम हैं ॥

५ विप्रश्निका, ईक्षणिका, दैवज्ञा (३ स्त्री), 'हाथ-पैर आदिकी रेखाओं को देखकर शुभाशुभ लक्षणोंको जानने या कहनेवाली स्त्री' के ३ नाम हैं ॥

६ रजस्वला, स्त्रीधर्मिणी, अविः (+ अवी), आत्रेयी, मलिनी, पुष्पवती (+ पुष्पिता), ऋतुमती, उदक्या (८ स्त्री) 'रजस्वला स्त्री' के ८ नाम हैं ॥

७ रजः (=रजस्), पुष्पम्, आर्तवम् (३ न), 'स्त्रियोंके रज' के ३ नाम हैं ॥

---

* 'वेष्या' इति पाठान्तरम् ॥

† 'स्त्रीधर्मिण्यपि चात्रेयी मलिनी पुष्पवत्यपि' इति स्वा० पाठः । 'अविलृतृतन्त्रिभ्य ईः' (उ० सू० ३।१५८) इति ईप्रत्ययेन सिद्धयुक्तेस्तदग्रे च 'अवि स्त्रीधर्मिणा वियात्' इति कात्यात् 'सर्वधातुभ्य इन्' (उ० सू० ४।११८) इति इन्प्रत्यये ह्रस्वान्ताऽपि अविः इति भानुजिदीक्षितेन स्वयमुक्तत्वान्मूले 'स्त्रीधर्मिण्यविरात्रेयी' इति ह्रस्वान्त 'अवि' शब्दपाठः संशोधकप्रमादज एव । व्याख्यानुदीर्णान्तरत्वेन 'अवि' शब्दस्य प्रथमं साधितत्वेन तत्रैव स्वास्थ्यप्रदर्शनात् ॥

‡ 'असिक्नी स्यादवृद्धा या प्रेष्याऽन्तःपुरयोषिता' इति मुनिः ॥

१ श्रद्धालुर्दोहदवती २ निष्कला विगतार्तवा ॥ २१ ॥
३ आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी।
४ गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥
५ पुनर्भूर्दीधिषूरूढा द्विर्दत्तस्या* दिधिषुः पतिः।
७ स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥ २३ ॥

---

१ श्रद्धालुः, दोहदवती (२ स्त्री), 'गर्भ रहनेपर किसी वस्तु या कार्यको चाहनेवाली स्त्री' के २ नाम हैं ॥

२ निष्कला (+ निष्कली), विततार्तवा (२ स्त्री), 'रजोधर्मसे हीन (जिसे रजोधर्म कभी न होता हो या वृद्धावस्था के कारण समाप्त हो गया हो) स्त्री' के २ नाम हैं।

३ आपन्नसत्त्वा, गुर्विणी (+ गुर्वी), अन्तर्वत्नी, गर्भिणी (+ गर्भवती। ४ स्त्री), 'गर्भवती स्त्री' के ४ नाम हैं ॥

४ गाणिक्यम्, गार्भिणम्, यौवतम् (३ न), 'वेश्याओं, युवतियों और गर्भिणियोंके समूह' का क्रमशः १-१ नाम है ॥

५ †पुनर्भूः, दीधिषूः (+ दिधीषूः, दिधिषुः, अग्रेदिधिषुः। २ स्त्री), 'दो बार व्याही हुई स्त्री' के २ नाम हैं॥

६ दिधिषुः (+ दिधिषूः, स्वा० म०। पु०), 'दो बार व्याही हुई स्त्रीके पति' का १ नाम है ॥

७ अग्रेदिधिषूः। (+ अग्रेदिधिषुः। पु), 'दो बार व्याही हुई स्त्रीके द्विजाति (ब्राह्मण, क्षत्रिय और वैश्य) वर्णवाले पति' का १ नाम है ॥

---

* 'दिधिषूः पतिः' इति पाठान्तरम् ॥

† तदुक्तं याज्ञवल्क्ये—

'अक्षता च क्षता चैव पुनर्भूर्दिधिषूः पुनः' इति याज्ञ० १। ६७ ॥
'ज्येष्ठायां यद्यनूढायां कन्यायामक्षतेऽनुजा।
सा चाग्रेदिधिषुर्ज्ञेया पूर्वा तु दिधिषुर्मता' ॥ १ ॥ इति ॥
'दिधिषूःतत्पुनर्भूर्द्विरूढा स्याद्दिधिषुः पतिः।
स तु द्विजोऽग्रेदिधिषूर्यस्य स्यात्सैव गेहिनी' ॥ १ ॥
अभि० चिन्ता० ३।१८९ इति ॥

१ कानीनः कन्यकाजातः सुतोऽथ सुभगासुतः।
सौभागिनेयः स्यात् ३ पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥
४ पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः।
सुतो ५ मातृष्वसुश्चैवं ६ वैमात्रेयो विमातृजः ॥ २५ ॥
७ अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः।
कौलटेरः कौलटेयो ८ भिक्षुकी तु सती यदि ॥ २६ ॥
तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः।
९ आत्मजस्तनयः सूनुः सुतः पुत्रः १० स्त्रियां त्वमी ॥ २७ ॥
आहुर्दुहितरं सर्वे—

---

१ कानीनः (पु), 'क्वांरी स्त्रीके पुत्र' का १ नाम है ('जैसे—व्यास, कर्ण,.....) ॥

२ सुभगासुतः, सौभागिनेयः (२ पु), 'सौभाग्यवती स्त्रीके पुत्र' के २ नाम हैं ॥

३ पारस्त्रैणेयः (पु), 'परस्त्रीके पुत्र' का १ नाम है ॥

४ पैतृष्वसेयः, पैतृष्वस्रीयः (२ पु), 'फूआका पुत्र अर्थात् फुफेरे भाई' के २ नाम हैं ॥

५ इसी प्रकार 'मौसीका लड़का अर्थात् मौसेरे भाई' के मातृष्वसेयः, मातृष्वस्रीयः (२ पु), २ नाम हैं ॥

६ वैमात्रेयः (+वैमात्रः), विमातृजः (२ पु), 'सौतेली माँका लड़का' अर्थात् 'मैभावत भाई' के २ नाम हैं।

७ बान्धकिनेयः, बन्धुलः, असतीसुतः, कौलटेरः, कौलटेयः (५ पु), 'व्यभिचारिणी स्त्रीके पुत्र' के ५ नाम हैं ॥

८ कौलटिनेयः, कौलटेयः (२ पु), 'भीख मांगनेके लिये घर २ घूमनेवाली सदाचारिणी स्त्रीके पुत्र' के २ नाम हैं ॥

९ आत्मजः, तनयः, सूनुः, सुतः, पुत्रः (५ पु), 'पुत्र' के ५ नाम हैं ॥

१० दुहिता (=दुहितृ । स्त्री), और 'आत्मज' आदि ५ शब्द स्त्रीलिङ्ग होने पर (आत्मजा, तनया, सूनुः, सुता, पुत्री । ५ स्त्री), 'लड़की, पुत्री' के ६ नाम हैं ॥

—१ऽपत्यं तोकं तयोः समे।
२ स्वजाते त्वौरसोरस्यौ ३ तातस्तु जनकः पिता ॥ २८ ॥
४ जनयित्री प्रसूर्माता जननी ५ भगिनी स्वसा।
६ ननान्दा तु स्वसा पत्युर्ज्ञप्त्री पौत्री सुतात्मजा ॥ २९ ॥
८ भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्।
९ प्रजावती भ्रातृजाया १० मातुलानी तु मातुलो ॥ ३० ॥

---

१ अपत्यम्, तोकम् (२ न), 'सन्तान' अर्थात् 'लड़के या लड़की' के २ नाम हैं ॥

२ * औरसः, उरस्यः (+ औरस्यः । २ पु), 'अपने खास लड़के' के २ नाम हैं ॥

३ तातः, जनकः, पिता (= पितृ । ३ पु), 'पिता' के ३ नाम हैं ॥

४ जनयित्री (+ जनित्री), प्रसूः, माता (= मातृ), जननी (+ जननिः । ४ स्त्री), 'माता' के ४ नाम हैं ॥

५ भगिनी, स्वसा (= स्वसृ । २ स्त्री), 'बहन' के २ नाम हैं ॥

६ ननान्दा (= ननान्दृ । + ननन्दा = ननन्दृ, नन्दिनी । स्त्री), 'ननद' अर्थात् 'पतिकी बहन' का १ नाम है ॥

७ नप्त्री, पौत्री, सुतात्मजा (भा० दी० । ३ स्त्री), 'नातिन' अर्थात् 'पुत्रकी या पुत्रीकी लड़की' के ३ नाम हैं ॥

८ यातरः (= यातृ, स्त्री), 'गोतिनी' अर्थात् 'पतिके भाइयोंकी स्त्री' का १ नाम है ॥

९ प्रजावती, भ्रातृजाया (२ स्त्री), 'भाईकी स्त्री भौजाई' के २ नाम हैं॥

१० मातुलानी, मातुली (+ मातुला । २ स्त्री), 'मामी' अर्थात् 'मामा-(पिताका साला) की स्त्री' के २ नाम हैं ॥

---

* 'स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम्। तमौरसं विजानीयात्पुत्रं प्रथमकल्पितम्' ॥ मनुः ९।१६६ ॥

इति वचनात्परभार्यायामपि स्वस्माज्जाते पुत्रे नातिव्याप्तिः शङ्क्या। 'औरस १ क्षेत्रज २ दत्तक ३ कृत्रिम ४ गूढोत्पन्न ५ अपविद्ध ६ कानीन ७ सहोढ ८ क्रीत ९ पौनर्भव १० स्वयंदत्त ११ शौद्र (पाराशव) १२' इति दायादादायादबान्धवरूपद्वादशविधपुत्रलक्षणं मनुस्मृतौ (९।१६६–१७८) द्रष्टव्यम् ॥

१ पतिपत्न्योः प्रसूः श्वश्रूः २ श्वशुरस्तु पिता तयोः।
३ पितुर्भ्राता पितृव्यः स्यात् ४ मातुर्भ्राता तु मातुलः॥ ३१॥
५ श्यालाः स्युर्भ्रातरः पत्न्याः ६ स्वामिनो देवृदेवरौ।
७ स्वस्रीयो भागिनेयः स्यात् ८ जामाता दुहितुः पतिः॥ ३२॥
९ पितामहः पितृपिता १० तत्पिता प्रपितामहः।
११ मातुर्मातामहाद्येवं १२ सपिण्डास्तु सनाभयः॥ ३३॥

---

१ श्वश्रूः (स्त्री), 'सास' अर्थात् 'पति या स्त्रीकी माता' का १ नाम है।

२ श्वशुरः (पु), 'ससुर' अर्थात् 'पति या स्त्रीके पिता का १ नाम है॥

३ पितृव्यः (पु), 'चाचा' अर्थात् 'पिताके भाई' का १ नाम है॥

४ मातुलः (पु), 'मामा' अर्थात् 'माताके भाई' का १ नाम है॥

५ श्यालः (+ स्याल्यः। पु), 'साला' अर्थात् 'स्त्रीके भाई' का १ नाम है॥

६ देवा (=देवृ), देवरः (२ पु), 'देवर' अर्थात् 'पतिके * छोटे भाई के २ नाम हैं॥

७ स्वस्रीयः (+ स्वस्रियः, स्वस्रेयः), भागिनेयः (२ पु), 'भांजा' अर्थात् 'बहनके लड़के' के २ नाम हैं॥

८ जामाता (= जामातृ, पु), 'दामाद, जमाई' का १ नाम है॥

९ पितामहः, पितृपिता (=पितृपितृ। २ पु), 'पिताके पिता, दादा, बाबा' के २ नाम हैं॥

१० प्रपितामहः (पु), 'परदादा' अर्थात् पितामहके पिता' का १ नाम है॥

११ मातामहः (पु), 'नाना' अर्थात् 'माताके पिता' का १ नाम है। ("इसी तरह 'प्रमातामहः (पु), 'परनाना' अर्थात् 'नानाके पिता' का १ नाम है") ॥

१२ सपिण्डः, सनाभिः (२ पु), † 'सात पुस्त (पीढ़ी) के भीतरवाले परिवार' के २ नाम हैं॥

---

* युक्तमिदं क्षी० स्वा० महे० मतम्। ग्रंथकारमते तु 'पत्युर्भ्रातृमात्रस्ये' मे नामनी। "पत्युर्ज्येष्ठो भ्राता श्वशुर एवेति सुभूत्यादयः" इति भा० दी० आह॥

† तदुक्तं मनुना—"सपिण्डता तु पुरुषे सप्तमे विनिवर्तते" इति, मनुः ५। ६०॥

१ समानोदर्यसोदर्यसगर्भ्यसहजाः समाः।
२ सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः॥ ३४॥
३ ज्ञातेर्यं ४ बन्धुता तेषां क्रमाद्भावसमूहयोः।
५ धवः प्रियः पतिर्भर्ता ६ जारस्तूपपतिः समौ॥ ३५॥
७ अमृते जारजः कुण्डो ८ मृते भर्तरि गोलकः।
९ भ्रात्रीयो भ्रातृजो १० भ्रातृभगिन्यौ भ्रातरावुभौ॥ ३६॥

---

१ समानोदर्यः, सोदर्यः (+ सोदरः, सहोदरः), सगर्भ्यः, सहजः (४ पु), 'सहोदर भाई' अर्थात् 'एक मातासे उत्पन्न भाई' के ४ नाम हैं॥

२ सगोत्रः, बान्धवः, ज्ञातिः, बन्धुः, स्वः (यह सर्वनाम-संज्ञक है), स्वजनः (६ पु), 'सगोत्र, अपने खास खान्दान' के ६ नाम हैं॥

३ ज्ञातेर्यम् (न), 'जातियोंके धर्म्म या भाव' का १ नाम है॥

४ बन्धुता (स्त्री), 'बन्धुओंके समूह' का १ नाम है॥

५ धवः, प्रियः, पतिः, भर्ता (= भर्तृ। ४ पु), 'पति' के ४ नाम हैं॥

६ जारः, उपपतिः (२ पु), 'जार' अर्थात् 'अप्रधान पति' के २ नाम हैं॥

७ * कुण्डः (पु), 'पतिके जीते रहनेपर जारसे पैदा हुए लड़के' का १ नाम है॥

८ † गोलकः (पु), 'पतिके मरनेपर जारसे पैदा हुए लड़के' का १ नाम है॥

९ भ्रात्रीयः (+ भ्रातृव्यः), भ्रातृजः (२ पु), 'भतीजा' अर्थात् 'भाईके लड़के का १ नाम है॥

१० भ्रातृभगिन्यौ (भा० दी० मत से), भ्रातरौ (= भ्रातृ। २ पु नि० द्वि०), 'भाई-बहन' के २ नाम हैं। ("जब भाई और बहनको एक साथ कहना हो तब इसका प्रयोग होता है। इसी तरह "भार्यापती च तौ" (२। ६। ३८) तक जानना चाहिये")॥

---

* † तदुक्तम्—"परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ
पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः"॥ १॥ इति मनुः ३।१७४

१ मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ।
२ श्वश्रूश्वशुरौ श्वशुरौ ३ पुत्रौ पुत्रश्च दुहिता च ॥ ३७ ॥
४ दम्पती जम्पती जायापती भार्यापती च तौ।
५ गर्भाशयो जरायुः स्यादुल्वं च ६ कललोऽस्त्रियाम् ॥ ३८ ॥
७ सूतिमासो वैजननो ८ गर्भो भ्रूण इमौ समौ।
९ तृतीयाप्रकृतिः शण्ढः क्लीवः पण्डो *नपुंसके ॥ ३९ ॥

---

१ मातापितरौ (= मातापितृ), पितरौ (= पितृ), मातरपितरौ (= मातरपितृ), प्रसूजनयितारौ (= प्रसूजनयितृ । ४ पु, नि० द्विव०), 'माता और पिताके समुदाय' के ४ नाम हैं ॥

२ श्वश्रूश्वशुरौ, श्वशुरौ (२ पु, नि० द्विव०), 'सास और ससुरके समुदाय' के २ नाम हैं ॥

३ पुत्रौ (पु० नि० द्विव०) 'लड़का और लड़कीके समुदाय' का १ नाम है।

४ दम्पती, जम्पती (+ २ स्त्री †), जायापती, भार्यापती (४ पु, नि० द्विव०), 'पति और पत्नीके समुदाय' के ४ नाम हैं ॥

५ गर्भाशयः, जरायुः (२ पु), उल्वम् (+ उल्वम् । न), 'गर्भाशय' अर्थात् 'जिसमें गर्भ लिपटा रहता है, उस चर्म' के ३ नाम हैं ॥

६ कललः (पु न), 'वीर्य और शोणितके समुदाय' का १ नाम है। ('किसीके मतसे 'गर्भाशय' आदि २–२ नाम उन अर्थोंमें हैं, और किसीके मतसे ४ नाम एकार्थक हैं') ॥

७ सूतिमासः, वैजननः (२ पु), 'सन्तान पैदा होनेवाले (‡ नवें या दशवें) महीने' के २ नाम हैं ॥

८ गर्भ, भ्रूणः (२ पु), 'गर्भ या गर्भस्थ जीव' के २ नाम हैं ॥

९ तृतीयाप्रकृतिः (+ तृतीयप्रकृतिः । स्त्री), शण्ढः (+ षण्ढः, शण्ढः,

---

* 'नपुंसकम्' इति पाठान्तरम् ॥

† 'शाल्मली मथिला मैत्री दम्पती जम्पती च सा' इत्युक्तेरिति बोध्यम् ॥

‡ तदुक्तं महर्षिणा याज्ञवल्क्येन—
'नवमे दशमे वापि प्रजनैः सूतिमारुतैः।
निःसार्यते बाण इव यन्त्रच्छिद्रेण सत्वरः' ॥ १ ॥ याज्ञ० स्मृ० ३।८३ इति।
भा० दी० तु अस्य तुरीयपादं 'जन्तुश्छिद्रेण सत्वरः' इत्येवमाह ॥

१ शिशुत्वं शैशवं बाल्यं २ तारुण्यं यौवनं समे।
३ स्यात्स्थाविरं तु वृद्धत्वं ४ वृद्धसंघेऽपि वार्धकम् ॥ ४० ॥
५ पलितं जरसा शौक्ल्यं केशादौ ६ विस्रसा जरा।
७ स्यादुत्तानशया *डिम्भा स्तनपा च स्तनन्धयी ॥ ४१ ॥
८ बालस्तु स्यान्माणवको—

षण्ढः †) क्लीवः, पण्डः (३ पु), नपुंसकम् (न। +पु), 'नपुंसक, हिजड़ा' के ५ नाम हैं ॥

१ शिशुत्वम्, शैशवम्, बाल्यम् (३ न), 'लड़कपन, बाल्यावस्था' के ३ नाम हैं ॥

२ तारुण्यम्, यौवनम् (२ न), 'जवानी, युवावस्था' के २ नाम हैं ॥

३ स्थाविरम्, वृद्धत्वम् (+वार्द्धकम्, वार्द्धक्यम्। २ न), 'बुढ़ापा' के २ नाम हैं ॥

४ वृद्धसंघः (भा० दी० मतसे। पु) वार्द्धकम् (+वार्द्धक्यम्। न), 'वृद्धसमूह' के २ नाम हैं ॥

५ पलितम् (न), 'बाल पकने' अर्थात् 'बुढ़ापा आदिसे दाढ़ी-मूंछ आदिके बालके सफेद होने' का १ नाम हैं ॥

६ विस्रसा, जरा (२ स्त्री), 'बुढ़ौती' के २ नाम हैं ॥

७ उत्तानशया, डिम्भा, स्तनपा, स्तनन्धयी (४ त्रि), 'दूध पीनेवाली लड़की' के ४ नाम हैं। ('स्त्रीलिङ्गमें रूपप्रदर्शनके लिये स्त्रीत्वको कहा गया है, स्त्रीत्व विवक्षित नहीं है। अतः पुलिङ्ग में—उत्तानशयः, डिम्भः, स्तनपः, स्तनन्धयः (४ पु), 'दूध पीनेवाले लड़के' के ४ नाम हैं; नपुंसकलिङ्गमें 'उत्तानशयम्,.....' होता है। इसी तरह आगे जानना चाहिये') ॥

८ बालः, ‡माणवकः (+माणवः। २ त्रि), 'छोटे बच्चे' के २ नाम हैं ॥

---

* 'डिम्भ' शब्दः प्राक् (२।५।३८) पक्षिक्रमेणोक्तोऽप्यत्र मानुषक्रमेण पुनरुक्तः ॥

† 'पण्डः शण्डे—'(अने० सं० २।१२२) इति, 'षण्डः कानने इङ्वरे'(अने० सं० २।१२९) इति '—षण्ढौ तु सौविदौ। वन्ध्यपुंसीङ्वरे क्लीवे—' (अने० सं० २।१३०-१३१) इति च हेमचन्द्राचार्योक्तेरित्यवधेयम् ॥

‡ 'अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्द्धन्यस्तेन सिद्ध्यति माणवः' ॥ १ ॥

एवमुक्तरीत्या निष्पन्नान्माणवशब्दात्स्वार्थे कनि 'माणवक'शब्दसिद्धिर्ज्ञेया ॥

—१ वयस्थस्तरुणो युवा ।
२ प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ ४२ ॥
३ वर्षीयान् दशमी ज्यायान् ४ *पूर्वजस्त्वग्रियोऽग्रजः ।
५ जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ॥ ४३ ॥
६ अमांसो † दुर्बलश्छातो ७ बलवान्मांसलोंऽसलः ।
८ ‡तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिलः ॥ ४४ ॥

---

१ वयस्थः, तरुणः, युवा (= युवन् । + युवकः । ३ त्रि), 'नौजवान, युवा' के ३ नाम हैं ॥

२ प्रवयाः (= प्रवयस्), स्थविरः, वृद्धः, जीनः, जीर्णः, जरन् (= जरत् । ६ त्रि), 'बूढ़े' के ६ नाम हैं ॥

३ वर्षीयान् (= वर्षीयस्), दशमी (= दशमिन्), ज्यायान् (= ज्यायस् । ३ त्रि), 'बहुत बूढ़े' के ३ नाम हैं ॥

४ पूर्वजः, अग्रियः (अग्रीयः, अग्रयः, अग्रीमः, अग्रिमः), अग्रजः (३ त्रि), 'बड़े भाई या अपनेसे पहले जन्मे हुए' के ३ नाम हैं ॥

५ जघन्यजः, कनिष्ठः (+ कनीयान् = कनीयस्), यवीयान् (= यवीयस् । + यविष्ठः), अवरजः, अनुजः (५ त्रि), 'छोटे भाई या अपनेसे पीछे जन्मे हुए' के ५ नाम हैं ॥

६ अमांसः, दुर्बलः, छातः (+ शातः । ३ त्रि), 'दुर्बल, कमज़ोर' के ३ नाम हैं ॥

७ बलवान् (= बलवत्), मांसलः, अंसलः (३ त्रि), 'बलवान्, मज़बूत या मोटे' के ३ नाम हैं ॥

८ तुन्दिलः (+ तुण्डिलः, तुन्दितः, तुण्डितः, तुन्दिकः, उदरिलः), तुन्दिभः (+ तुण्डिभः), तुन्दी (= तुन्दिन् । + तुण्डी = तुण्डिन्), बृहत्कुक्षिः, पिचण्डिलः (+ पिचिण्डिलः । ५ त्रि), 'तोंदवाले, बड़े पेटवाले' के ५ नाम हैं ॥

---

* 'पूर्वजस्त्वग्रीयोऽग्रजः' इति पाठभेदः । किन्त्वत्रच्छन्दोभङ्गोऽपि वर्त्तते ॥

† 'दुर्बलश्शातः' इति पाठान्तरम् ॥

‡ 'तुन्दिलस्तुन्दिकस्तुन्दी बृहत्कुक्षिः पिचिण्डिलः' इति पाठान्तरम् ॥

१ अवटीटोऽवनाटश्चावभ्रटो नतनासिके।
२ केशवः केशिकः केशी ३ वलिनो वलिभः समौ ॥ ४५ ॥
४ *विकलाङ्गस्त्वपोगण्डः ५ खर्वो ह्रस्वश्च वामनः।
६ खरणाः स्यात्खरणसो ७ विघ्रस्तु गतनासिकः ॥ ४६ ॥
८ खुरणाः स्यात्खुरणसः ९ प्रज्ञुः प्रगतजानुकः।

---

१ अवटीटः, अवनाटः, अवभ्रटः, नतनासिकः (४ त्रि), महे० मतसे 'नकचिपटा' अर्थात् 'चिपटी नाकवाले' के ४ नाम हैं। 'भा० दी० मतसे 'नतनासिकः' शब्दका पर्याय नहीं होनेसे ३ ही नाम हैं') ॥

२ केशवः (+ केशवान् = केशवत्), केशिकः, केशी (= केशिन्। ३ त्रि), 'सुन्दर केशवाले' के ३ नाम हैं ॥

३ वलिनः, वलिभः (२ त्रि), 'जिसका चमड़ा सिकुड़ गया हो उस' के २ नाम हैं ॥

४ विकलाङ्गः, अपोगण्डः (+ पोगण्डः। २ त्रि), 'कम या अधिक अङ्गवाले' के २ नाम हैं ॥

४ खर्वः (+ खर्वः, निखर्वः), ह्रस्वः, वामनः (३ त्रि), 'बौना, वामन' के ३ नाम हैं ॥

६ खरणाः (=खरणस्), खरणसः (२ त्रि) 'नुकीली नाकवाले' के २ नाम हैं ॥

७ विघ्रः (+ विखुः, विखः, विख्यः, विक्षः, विक्षुः), गतनासिकः (+ विनासिकः। २ त्रि), 'नकटा' के २ नाम हैं ॥

८ खुरणाः (=खुरणस्), खुरणसः (२ त्रि), 'पशुके खुरके समान नाकवाले' के २ नाम हैं ॥

९ प्रज्ञुः (+ प्रज्ञः †), प्रगतजानुकः (२ त्रि), 'रोगसे या स्वभावतः विरल जङ्घावाले' के २ नाम हैं ॥

---

* 'विकलाङ्गस्तु पोगण्डः खर्वो' इति पाठान्तरम् ॥

† तदुक्तं भानुजिदीक्षितेन—
'प्रज्ञुः संहतजानुः स्याद्प्रज्ञोऽप्यत्रैव दृश्यते ॥' इति साहसाङ्कः, इति ॥

१ ऊर्ध्वजुरूर्ध्वजानुः स्यात् २ संजुः संहतजानुकः ॥ ४७ ॥
३ स्यादेडे बधिरः ४ कुब्जे गडुलः ५ कुकरे कुणिः ।
६ पृश्निरल्पतनौ ७ श्रोणः पङ्गौ ८ मुण्डस्तु मुण्डिते ॥ ४८ ॥
९ वलिरः केकरे १० खोडे खञ्ज११स्त्रिषु जराऽवराः ।
१२ जडुलः कालकः पिप्लुः—

---

१ ऊर्ध्वजुः (+ ऊर्ध्वजः*), ऊर्ध्वजानुः (२ त्रि), 'बैठनेपर जिसकी जङ्घा ऊपरको उठी रहती हो उस' के २ नाम हैं ॥

२ संजुः (+ संजः †), संहतजानुकः (२ त्रि), 'सटे हुए जङ्घावाले' के २ नाम हैं ॥

३ एडः, बधिरः (२ त्रि), 'बहरा' के २ नाम हैं ॥

४ कुब्जः (+ न्युब्जः), गडुलः (+ गडुः । २ त्रि), 'कूबड़ा' के २ नाम हैं ॥

५ कुकरः, कुणिः (+ कूणिः । २ त्रि), 'टेढ़े हाथवाले' के २ नाम हैं ॥

६ पृश्निः (+ पृष्णिः), अल्पतनुः (२ त्रि), 'छोटे शरीरवाले, नाटा' के २ नाम हैं ॥

७ श्रोणः, पङ्गुः (२ त्रि), 'पङ्गु' के २ नाम हैं ॥

८ मुण्डः, मुण्डितः (२ त्रि), 'मुण्डन कराये हुए' के २ नाम हैं ॥

९ वलिरः (+ बलिरः), केकरः (+ काचरः, कावरः । २ त्रि), 'ऐंचकर देखनेवाले' अर्थात् 'एक भौंको ऊँचा और एक भौंको नीचाकर देखनेवाले' के २ नाम हैं ॥

१० खोडः (+ खोलः, खोरः), खञ्जः (२ त्रि), 'लंगड़ा' के २ नाम हैं ॥

११ 'जरा' (२।६।४१) शब्दके बादसे यहाँतक सब शब्द त्रिलिङ्ग हैं । ('उनमें ग्रन्थकारके कथनानुसार सब शब्दोंको प्रायः पुंल्लिङ्गमें देकर लिङ्गनिर्देश में त्रिलिङ्ग लिखा गया है, अतः स्त्रीलिङ्ग और नपुंसकलिङ्गके रूपको स्वयं समझ लेना चाहिये') ॥

१२ जडुलः (+ जटुलः), कालकः, पिप्लुः (३ पु), 'जन्मसन' अर्थात् 'जन्म-कालसे ही उत्पन्न शरीरके चिह्न-विशेष' के ३ नाम हैं ॥

---

* † अत्र भा० दी०—

'संजुः संहतजानौ च भवेत्संशोऽपि तत्र हि ।
ऊर्ध्वजुरूर्ध्वजानुः स्यादूर्ध्वज्ञोऽप्यूर्ध्वजानुके' ॥ १ ॥ इति साहसाङ्कः, इति ॥

—१ तिलकस्तिलकालकः
२ अनामयं स्यादारोग्यं ३ चिकित्सा रुक्प्रतिक्रिया।
४ भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥
५ स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः।
६ क्षयः शोषश्च यक्ष्मा च ७ प्रतिश्यायस्तु पीनसः ॥ ५१ ॥
८ स्त्री क्षुत्क्षुतं क्षवः पुंसि ९ *कासस्तु क्षवथुः पुमान्।
१० शोफस्तु श्वयथुः शोथः ११ पादस्फोटो विपादिका ॥ ५२ ॥
१२ किलाससिध्मे—

---

१ तिलकः, तिलकालकः (२ पु), 'तिल' अर्थात् 'काली तिलके समान देहके चिह्न-विशेष' के २ नाम हैं ॥

२ अनामयम्, आरोग्यम् (२ न), 'नीरोग' के २ नाम हैं ॥

३ चिकित्सा, रुक्प्रतिक्रिया (२ स्त्री), 'चिकित्सा' अर्थात् 'रोगको दूर करनेके लिये दवा आदिके सेवन करने' के २ नाम हैं ॥

४ भेषजम्, औषधम्, भैषज्यम् (३ न), अगदः, जायुः (२ पु), 'दवा' के ५ नाम हैं ॥

५ रुक् (= रुज्), रुजा (२ स्त्री), उपतापः, रोगः, व्याधिः, गदः, आमयः (+ आमः । ५ पु), 'रोग' के ७ नाम हैं ॥

६ क्षयः, शोषः, यक्ष्मा (= यक्ष्मन् । + राजयक्ष्मा = राजयक्ष्मन् । ३ पु), 'राजयक्ष्मा (T. B.) रोग' के ३ नाम हैं ॥

७ प्रतिश्यायः (+ प्रतिश्या), पीनसः (+ आपीनसः । २ पु), 'पीनस रोग' के २ नाम हैं ॥

८ क्षुत् (स्त्री), क्षुतम् (न), क्षवः (पु), 'छींक' के ३ नाम हैं ॥

९ कासः (+ काशः), क्षवथुः (२ पु), 'खाँसी' के २ नाम हैं ॥

१० शोफः, श्वयथुः, शोथः (३ पु), 'शोथ, सूजन' के ३ नाम हैं ॥

११ पादस्फोटः (पु), विपादिका (स्त्री), 'बिवाय' अर्थात् 'पैरके तलवेमें फटनेवाले रोग-विशेष' के २ नाम हैं ॥

१२ किलासम्, सिध्मम् (+ सिध्मली । २ न), 'सेहुँआ, सिहुला' के २ नाम हैं ॥

---

* 'कासस्तु क्षवथुः पुमान्' इति पाठान्तरम् ॥

—१ कच्छूां तु पामा पामा विचर्चिका।
२ कण्डूः खर्जूश्च कण्डूया ३ विस्फोटः * पिटकः स्त्रियाम् ॥ ५३ ॥
४ व्रणोऽस्त्रियामीर्मभरुः क्लीवे ५ नाडोव्रणः पुमान्।
६ कोठो मण्डलकं ७ कुष्ठश्वित्रे ८ दुर्नामकार्शसी ॥ ५४ ॥
९ आनाहस्तु विबन्धः स्याद् १० ग्रहणी रुक्प्रवाहिका।
११ प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥ ५५ ॥

---

१ कच्छूः, पामा (=पामन्, + न), पामा, विचर्चिका (४ स्त्री), 'गीली खुजली या खसरा' के ४ नाम हैं ॥

२ कण्डूः (+ कण्डुः), खर्जूः, कण्डूया (३ स्त्री), 'खाज़ या खुज़लाहट' के ३ नाम हैं ॥

३ विस्फोटः, पिटकः (२ पु स्त्री। स्त्री० में 'विस्फोटा, पिटिका। + विटिका। + २ त्रि), 'फोड़ा' के २ नाम हैं ॥

४ व्रणः (पु न), ईर्मम्, अरुः (=अरुस्। २ न), 'घाव या व्रण' के ३ नाम हैं ॥

५ नाडीव्रणः (पु), 'सइन' अर्थात् 'सर्वदा पीव बहानेवाले व्रण-विशेष' का १ नाम है ॥

६ कोठः (पु), मण्डलकम् (न) भा० दी० मतसे 'गजकर्ण रोग' अर्थात् 'जिससे शरीरमें गोले २ चकत्ते पड़ जायँ उस रोग' के २ नाम हैं ॥

७ कुष्ठम्, श्वित्रम् (२ न), भा० दी० मतसे 'सफेद कोढ़' अर्थात् 'चरक फूटने' के २ नाम हैं। ("मेदि० मतसे 'कोठः,...' ४ नाम 'सफेद कोढ़' ही के हैं") ॥

८ दुर्नामकम्, अर्शः (=अर्शस्। + अर्श। २ न), 'बवासीर' के २ नाम हैं ॥

९ आनाहः, विबन्धः (+ विबन्धः। २ पु), 'जिसमें मल और मूत्र रुक जायं उस रोग' के २ नाम हैं ॥

१० ग्रहणी (+ ग्रहणिः, ग्रहणीरुक्, =ग्रहणीरुज्) प्रवाहिका (२ स्त्री), 'संग्रहणी' के २ नाम हैं ॥

११ प्रच्छर्दिका, वमिः (+ वमी, स्त्री; वमः, पु। २ स्त्री), वमथुः (पु), 'वमन या उल्टी' के ३ नाम हैं ॥

---

*"पिटकस्त्रिषु" इति भा० दी० क्षी० स्वा० सम्मतं पाठान्तरम् ॥

१ व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगन्दराः।
२ * 'श्लीपदं पादवल्मीकं ३ केशघ्नस्त्विन्द्रलुप्तकः' (१४)
४ अश्मरी मूत्रकृच्छ्रं स्यात् ५ पूर्वं शुक्रावधेस्त्रिषु ॥ ५६ ॥
६ रोगहार्यगदङ्कारो भिषग्वैद्यो चिकित्सके।
७ † वार्तो निरामयः कल्य ८ उल्लाघो निर्गतो गदात् ॥ ५७ ॥

१ विद्रधिः (स्त्री), ज्वरः, मेहः (+ प्रमेहः), भगन्दरः (३ पु), 'पेट आदि कोमल स्थानमें होनेवाला फोड़ा, ज्वर, प्रमेह और भगन्दर' (गुदाके बगलमें होनेवाला व्रण-विशेष) का क्रमशः १—१ नाम है। ये सब 'व्याधिके भेद' हैं।

२ [श्लीपदम्, पादवल्मीकम् (२ न), 'पीलपांव' अर्थात् 'जिसमें पैरके घुटनेके नीचेका हिस्सा फूलकर बहुत मोटा हो जाय, उस रोग' के २ नाम हैं] ॥

३ [केशघ्नः, इन्द्रलुप्तकः (२ न), 'गुनकी लगना' अर्थात् 'जिसमें शिर आदिके बाल झड़कर गिर जांय, उस रोग' के २ नाम हैं] ॥

४ अश्मरी (स्त्री), मूत्रकृच्छ्रम् (न), 'मूत्रकृच्छ्र' अर्थात् 'जिससे पेशाब करनेमें अत्यन्त कष्ट हो, उस रोग' के २ नाम हैं ॥

५ यहांसे आगे 'शुक्रम्' (२।६।६२) के पहलेवाले सब शब्द त्रिलिङ्ग हैं ॥

६ रोगहारी (=रोगहारिन्), अगदङ्कारः, भिषक् (= भिषज्), वैद्यः, चिकित्सकः (५ पु), 'वैद्य डाक्टर, कविराज, हकीम आदि दवा करने वाले' के ५ नाम हैं। ("क्षी० स्वा० मतसे 'रोगहारी, अगदङ्कारः' ये २ नाम 'औषध' के भी हैं") ॥

७ वार्तः (+ वान्तः), निरामयः, कल्यः (+ नीरोगः। ३ त्रि), महे० मतसे 'नीरोग' के ३ नाम हैं ॥

८ उल्लाघः (त्रि), महे० मतसे 'रोगसे शीघ्र ही छुटे हुए' का १ नाम है। ("भा० दी० मतसे 'वार्तः,.....' ४ नाम 'नीरोग' के ही हैं") ॥

---

*अयं क्षेपकांशः क्षी० स्वा० व्याख्यायामुपलभ्यत इत्यवधेयम् ॥

† 'वान्तो निरामयः' इति पाठान्तरम्। अत्र मूलपाठ एव युक्तः, अग्रे (नानार्थवर्गे) "वार्त्तं फल्गुन्यरोगे च त्रिषु' (३।३।७६) इति स्वयं वक्ष्यमाणत्वात्, '—वार्तं त्वारोग्यारोग-फल्गुषु' (अने० संग्र० २।१९४) इति हैमोक्तेश्चेत्यवधेयम् ॥

१ ग्लानग्लास्नू २ आमयावी विकृतो व्याधितोऽपटुः।
आतुरोऽभ्यमितोऽभ्यान्तः ३ समौ पामनकच्छुरौ ॥ ५८ ॥
४ दद्रुणो दद्रुरोगी स्याद्दर्शोरोगयुतोऽर्शसः।
६ वातकी वातरोगी स्यात् ७ सातिसारोऽतिसारकी ॥ ५९ ॥
८ स्युः क्लिन्नाक्षे* चुल्लचिल्लपिल्लाः क्लिन्नेऽदिण चाप्यमी।
९ उन्मत्त उन्मादवति १० श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥

---

१ ग्लानः, ग्लास्नुः (२ त्रि), 'रोगसे खिन्न' के २ नाम हैं ॥

२ आमयावी (=आमयाविन्), विकृतः, व्याधितः, अपटुः, आतुरः, अभ्यमितः, अभ्यान्तः (+ रोगी = रोगिन् । ७ त्रि), 'रोगी' के ७ नाम हैं ॥

३ पामनः (+ पामरः), कच्छुरः (२ त्रि), 'गीली खुजलीवाले या खसरा रोगवाले' के २ नाम हैं ॥

४ दद्रुणः (+ दद्रूणः, दर्दुणः, दर्दूणः), दद्रुरोगी (= दद्रुरोगिन् । + दर्दुरोगी = दर्दुरोगिन् । २ त्रि), 'दाद रोगवाले' के २ नाम हैं ॥

५ अर्शोरोगयुतः (भा० दी०), अर्शसः (२ त्रि), 'बवासीर रोगवाले' के २ नाम हैं ॥

६ वातकी (+ वातकिन्), वातरोगी (= वातरोगिन् । २ त्रि), 'वात रोगवाले' के २ नाम हैं ॥

७ सातिसारः, अतिसारकी (= अतिसारकिन् । + अतीसारकी=अतीसारकिन् । २ त्रि), 'अतिसार रोगवाले' के २ नाम हैं ॥

८ क्लिन्नाक्षः (महे०), चुल्लः, चिल्लः, पिल्लः (४ त्रि), 'कीचरसे युक्त आँखवाले' के ४ नाम हैं। प्रथम 'क्लिन्नाक्ष' शब्दको छोड़कर शेष ३ नाम (चुल्लम्, चिल्लम्, पिल्लम्; ३ न), 'कींचरसे युक्त आँख' के हैं। ('चुल्लः, चिल्लः, पिल्लः; ३ त्रि), 'आँखसे कींचर निकलनेवाले रोग-विशेष' के भी ३ नाम हैं') ॥

९ उन्मत्तः, उन्मादवान् (= उन्मादवत् । + उन्मादी = उन्मादिन् । २ त्रि), 'पागल, उन्मादके रोगी' के २ नाम हैं ॥

१० श्लेष्मलः, श्लेष्मणः, कफी (= कफिन् । ३ त्रि), 'कफवाले रोगी' के ३ नाम हैं ॥

---

* 'चुल्लः चक्षूरोगविशेषः, तद्योगाच्चुल्लं चक्षुः । चुल्लचक्षुष्कात्चुल्लः पुरुषोऽपीत्यवधेयम् ॥

१ न्युब्जो भुग्ने रुजा २ वृद्धनाभौ *तुण्डिलतुण्डिभौ।
३ किलासी सिध्मलोऽन्धोऽदृङ्मूर्च्छालेमूर्त्तमूर्च्छितौ ॥ ६१ ॥
६ शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च।
७ मायुः पित्तं ८ कफः श्लेष्मा ९ स्त्रियां तु त्वगसृग्धरा ॥ ६२ ॥
१० पिशितं तरसं मांसं पललं क्रव्यमामिषम्।
११ उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥

---

१ न्युब्जः (त्रि), 'रोगसे कुबड़ा' का १ नाम है ॥

२ वृद्धनाभिः, तुण्डिलः (+तुन्दिलः), तुण्डिभः (+तुन्दिभः। ३ त्रि), 'ढोंढर' अर्थात् 'कब्ज आदिके कारण बढ़े हुए नाभिवाले' के ३ नाम हैं ॥

३ किलासी (=किलासिन्), सिध्मलः (२ त्रि), 'सिहुला, सेंहुआ या पपड़ीवाले रोगी' के २ नाम हैं ॥

४ अन्धः, अदृक् (=अदृश्। २ त्रि), 'अन्धा, सूर' के २ नाम हैं ॥

५ मूर्च्छालः, मूर्त्तः, मूर्च्छितः (३ त्रि), 'मूर्च्छा या मृगी रोगवाले' के ३ नाम हैं ॥

६ शुक्रम्, तेजः (=तेजस्), रेतः (=रेतस्), बीजम् (+वीजम्), वीर्यम्, इन्द्रियम् (६ न), 'वीर्य' अर्थात् 'मनुष्यके शरीरस्थ स्निग्ध तथा श्वेतवर्ण धातु' के ६ नाम हैं ॥

७ मायुः (पु), पित्तम् (न), 'पित्त' के २ नाम हैं ॥

८ कफः, श्लेष्मा (=श्लेष्मन्। २ पु), 'कफ' के २ नाम हैं ॥

९ त्वक् (=त्वच्। +त्वचः, पुः +त्वचा, स्त्री), असृग्धरा (+असृग्धारा। २ स्त्री), 'चमड़ा' के २ नाम हैं ॥

१० पिशितम्, तरसम्, † मांसम्, पललम्, क्रव्यम्, आमिषम् (६ न), 'मांस' के ६ नाम हैं ॥

११ उत्तप्तम्, शुष्कमांसम् (२ न), वल्लूरम् (+वल्लुरम्। त्रि), 'सूखे मांस' के ३ नाम हैं ॥

---

* 'तुन्दिलतुन्दिभौ' इति पाठान्तरम्। अत्र मूलपाठ एव समीचीनः, यतः 'तुण्डिरुन्नतनाभिस्तुन्दिस्तु जठरः' इति क्षी० स्वा० उक्त्या वृद्धनाभियुक्तस्यैव पर्यायतौचित्यप्रतीतेः ॥

† अत्र नैरुक्ताः—'मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहम्।
एतन्मांसस्य मांसत्वे निरुक्तं मुनिरब्रवीत्' ॥ १ ॥ इति क्षी० स्वा० ॥

१ रुधिरेऽसृग्लोहितास्रक्तक्षतजशोणितम् ।
२ वुक्काऽग्रमांसं ३ हृदयं हृन् ४ मेदस्तु वपा वसा ॥ ६४ ॥
५ पश्चाद्ग्रीवाशिरा मन्या ६ नाडी तु धमनिः *शिरा ।
७ तिलकं क्लोम ८ मस्तिष्कं गोर्दं ९ किट्टं मलोऽस्त्रियाम् ॥ ६५ ॥

---

१ रुधिरम्, असृक् (=असृज्), लोहितम्, अस्रम्, रक्तम्, क्षतजम्, शोणितम् (७ न), 'रक्त, खून' के ७ नाम हैं ॥

२ वुक्का (स्त्री । + वुक्का = वुक्कन्, पु । + वुक्का, वृक्का; २ स्त्री), अग्रमांसम् (न । + वुक्काग्रमांसम्, न) 'कलेजा' अर्थात् 'हृदयके भीतरवाले कमलके समानाकार मांस-पिण्ड-विशेष' के २ नाम हैं ॥

३ † हृदयम्, हृत् (= हृद् । २ न), 'हृदय' के २ नाम हैं । ("वुक्का,·····" ‡ ४ नाम 'हृदय' के हैं, किसीका यह भी मत है") ॥

४ मेदः (= मेदस् । + मेदः । न) वपा, वसा (२ स्त्री), 'चर्बी' के २ नाम हैं ॥

५ मन्या (स्त्री), 'गर्दनके पीछेवाली नस' का १ नाम है ॥

६ नाडी, धमनिः (=धमनी), शिरा (+ सिरा । ३ स्त्री), 'नस' के ३ नाम हैं ॥

७ तिलकम्, क्लोम (=क्लोमन् । २ न), 'पेटमें जल रहनेके स्थान' के २ नाम हैं ॥

८ मस्तिष्कम् (+ मस्तिकम्), गोर्दम् (+ गोदः, पु । २ न), 'दिमाग, मस्तिष्क, माइण्ड' के २ नाम हैं ॥

९ किट्टम्, (न) मलम् (पु न), 'नाक, कान आदिके § बारह मल' के २ नाम हैं ॥

---

* "सिरा" इति पाठान्तरम् ॥

† तदुक्तम्—"पद्मकोशप्रतीकाशं रुचिरं चाप्यधोमुखम् ।
हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् " ॥ १ ॥ इति ॥

‡ 'पद्मकोशप्रतीकाशम्···' इत्यनुरोधादिदमेव समीचीनं प्रतिभाति ॥

§ तदुक्तं मनुना—'वसाशुक्रमसृङ्मज्जा मूत्रविट् घ्राणकर्णविट् ।
श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः' ॥ १ ॥ इति मनुः ५।१३५

१ अन्त्रं पुरीतद् २ गुल्मस्तु प्लीहा पुंस्य ३ थ वस्नसा ।
स्नायुः स्त्रियां ४ कालखण्डयकृती तु समे इमे ॥ ६६ ॥
५ सृणिका स्यन्दिनी लाला ६ दूषिका नेत्रयोर्मलम् ।
७ 'नासामलं तु सिङ्घाणं ८ पिञ्जूषः कर्णयोर्मलम्' (१५)
९ मूत्रं प्रस्राव १० उच्चारावस्करौ शमलं शकृत् ॥ ६७ ॥
* पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ ।

---

१ अन्त्रम् (+ आन्त्रम्), पुरीतत् (२ न), 'आँत' के २ नाम हैं ॥

२ गुल्मः, प्लीहा (= प्लीहन् । + प्लीहा = प्लीहा, स्त्री । २ पु), 'गुल्म रोग' अर्थात् 'हृदय की बायीं कोखमें होनेवाले मांस-पिण्ड-विशेष' के २ नाम हैं ॥

३ वस्नसा, स्नायुः (२ स्त्री), 'प्रत्येक अङ्ग-उपाङ्गके जोड़की नस' के २ नाम हैं ॥

४ कालखण्डम् (+ कालखञ्जम्), यकृत् (२ न), 'यकृत्' अर्थात् 'हृदयकी दाहिनी कोखमें होनेवाले मांस-पिण्ड-विशेष' के २ नाम हैं ॥

५ सृणिका (+ सृणीका), स्यन्दिनी, लाला (३ स्त्री), 'लार' के ३ नाम हैं ॥

६ दूषिका (+ दूषीका । स्त्री), 'कीचर' का १ नाम है ॥

७ [नासामलम्, सिङ्घाणम् (२ न), 'नकटी, नेटा' अर्थात् 'नाककी मैल' के २ नाम हैं] ॥

८ [पिञ्जूषम् (न), 'खोंट' अर्थात् 'कानकी मैल' का १ नाम है ॥]

९ मूत्रम् (न), प्रस्रावः (पु), 'पेशाब' के २ नाम हैं ॥

१० उच्चारः, अवस्करः (२ पु), शमलम्, शकृत्, पुरीषम् (३ न),

अत्र भा० दी० तु 'कर्णविण्मूत्रविण्नखाः' इत्येवं तद्भिन्नमेव द्वितीयचरणमाहेत्यवधेयम् ॥ प्रसङ्गादेतेषां निर्गमस्थानानि गरुडपुराणोक्तानि लिख्यन्ते—

"द्वारैर्द्वादशभिर्भिन्नं किट्टं देहाद्बहिः स्रवेत् ।
कर्णाक्षिनासिका जिह्वा दन्ता नाभिर्नखा गुदम् ॥
शुक्रं शिरा वपुर्लोम मलस्थानानि चक्षते ॥" इति ग० पु० १५ । ६०-६१ ॥

*"पुरीषं गूथं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियौ" इति "गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियौ" इति च क्रमशः क्षी० स्वा० भा० दी० सम्मते पाठान्तरे ॥

१ स्यात्कर्परः कपालोऽस्त्री २ कीकसं कुल्यमस्थि च ॥ ६८ ॥
३ स्याच्छरीरास्थि न कङ्कालः ४ पृष्ठास्थि न तु कशेरुका।
५ शिरोऽस्थनि करोटिःस्त्री ६ पार्श्वास्थनि तु पर्शुका ॥ ६९ ॥
७ अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम्।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥
कायो देहः क्लीवपुंसोः स्त्रियां मूर्त्तिस्तनुस्तनूः।
९ पादाग्रं प्रपदं १० पादः *पदङ्घ्रिश्चरणोऽस्त्रियाम् ॥ ७१ ॥

गूथम्, वर्चस्कम् (२ पु न), विष्ठा, विट् (=विश्। + विट् = विष्। २ स्त्री), 'विष्ठा, पाखाना' के ९ नाम हैं ॥

१ कर्परः (पु), कपालः (पु न) 'कपाल' के २ नाम हैं ॥

२ कीकसम्, कुल्यम्, अस्थि (३ न), 'हड्डी' के ३ नाम हैं ॥

३ (+ शरीरास्थि न), कङ्कालः (+ करङ्कः। पु), 'कङ्काल, ठठरी' का १ नाम है ॥

४ (+ पृष्ठास्थि न), कशेरुका (+ कशारुका। स्त्री), 'रीढ़' अर्थात् 'पीठके बीचकी हड्डी' का १ नाम है ॥

५ (+ शिरोऽस्थि न), करोटिः (+ करोटी। स्त्री), 'खोपड़ी' का १ नाम है ॥

६ (+ पार्श्वास्थि, न), पर्शुका (+ पर्शूः। स्त्री), 'पँजड़ी' का १ नाम है ॥

७ अङ्गम् (न), प्रतीकः, अवयवः, अपघनः (३ पु), 'शरीरके अङ्ग' के ४ नाम हैं। ('जैसे—हाथ, पैर, शिर, मुख, ·····') ॥

८ कलेवरम्, गात्रम्, वपुः (=वपुष्), संहननम्, शरीरम्, वर्ष्म (=वर्ष्मन्। ६ न), विग्रहः, कायः (२ पु), देहः (पु न), मूर्त्तिः, तनुः (+ तनुः = तनुस्), तनूः (३ स्त्री), 'शरीर, देह' के १२ नाम हैं ॥

९ पादाग्रम्, प्रपदम् (२ न), 'पैरका चौवा' अर्थात् 'पैरके आगेवाले हिस्से' के २ नाम हैं ॥

१० पादः, पत् (= पद् + पदः), अङ्घ्रिः (३ पु), चरणः (पु न), 'पैर' के ४ नाम हैं ॥

---

* 'पदोऽङ्घ्रिश्चरणोऽस्त्रियाम्' इति क्षी० स्वा० व्याख्यानुसारि पाठान्तरम् ॥

१ तद्ग्रन्थी घुटिके गुल्फौ २ पुमान्पार्ष्णिस्तयोरधः।
३ जङ्घा तु प्रसृता ४ जानूरुपर्वाऽष्ठीवदस्त्रियाम् ॥ ७२ ॥
५ सक्थि क्लीवे पुमानूरुर्६स्तत्सन्धिः पुंसि वङ्क्षणः।
७ गुदं त्वपानं पायुर्ना ८ वस्तिर्नाभेरधो द्वयोः ॥ ७३ ॥
९ कटो ना श्रोणिफलकं १० कटिः श्रोणिः ककुद्मती।
११ पश्चान्नितम्बः स्त्रीकट्याः १२ क्लीबे तु जघनं पुरः ॥ ७४ ॥
१३ कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे।

---

१ घुटिका (स्त्री), गुल्फः (पु), 'पैरकी घुट्टी' के २ नाम हैं ॥
२ पार्ष्णिः (पु), 'पैरकी घुट्टीके नीचेवाले हिस्से' का १ नाम है ॥
३ जङ्घा, प्रसृता (२ स्त्री), 'जंघा' के २ नाम हैं ॥

४ जानु, ऊरुपर्वा (= ऊरुपर्वन् । २ न), अष्ठीवत् (पु न । भा० दी० मतसे ३ पु न), 'घुटना, ठेहुन' के ३ नाम हैं ॥
५ सक्थि (= सक्थिन् न), ऊरुः (पु), 'घुटनेके ऊपरवाले हिस्से' के २ नाम हैं ॥

६ वङ्क्षणः (पु), 'घुटना तथा उसके ऊपरके जोड़' का १ नाम है ॥
७ गुदम्, अपानम् (२ न), पायुः (पु), 'पाखानाके रास्ता' के २ नाम हैं ॥

८ वस्तिः (पु स्त्री) 'मूत्राशय' का १ नाम है ॥
९ कटः (पु), श्रोणिफलकम् (न, भा० दी०), 'कमरके दोनों बगल' के २ नाम हैं ॥

१० कटिः (+ कटी), श्रोणिः (+ श्रोणी), ककुद्मती (३ स्त्री), 'कमर' के ३ नाम हैं । ('अन्याचार्योंके मतसे 'कटः,·····' ५ नाम 'कमर' के हैं') ॥
११ नितम्बः (पु) 'स्त्रियों के चूतड़' का १ नाम है ॥
१२ जघनम् (न), 'स्त्रियोंकी जंघा' का १ नाम है ॥
१३ + कूपकः (पु), कुकुन्दरम् (+ ककुन्दरम् । न), 'चूतड़पर पृष्ठ-वंशके नीचेवाले गढ़े' के २ नाम हैं ॥

१ स्त्रियां स्फिचौ *कटिप्रोथाऽवुपस्थो वक्ष्यमाणयोः ॥ ७५ ॥
३ भगं योनिर्द्वयोः ४ शिश्नो मेढ्रो †मेहनशेफसी ।
५ मुष्कोऽण्डकोशो वृषणः ६ पृष्ठवंशाधरे त्रिकम् ॥ ७६ ॥
७ ‡पिचण्डकुक्षी जठरोदरं तुन्दं ८ स्तनौ कुचौ ।
९ §चूचुकं तु कुचाग्रं स्यात् १० न ना क्रोडं भुजान्तरम् ॥ ७७ ॥

---

१ स्फिक् (= स्फिच्, स्त्री), कटिप्रोथः (+ कटीप्रोथः, कटिः, प्रोथः, प्रोहः । पु), 'कुलहा' अर्थात् 'कमरमें होनेवाले मांस-पिण्ड' के २ नाम हैं ॥

२ उपस्थः (पु न), 'भग और लिंग' अर्थात् 'स्त्री या पुरुषके पेशाब करनेके रास्ता' का १ नाम है ॥

३ भगम् (न), योनिः (पु स्त्री), 'स्त्रीके पेशाब करनेके रास्ता' के २ नाम हैं ॥

४ शिश्नः, मेढ्रः (२ पु), मेहनम्, शेफः (= शेफस् । + शेपः = शेपस्, शेफः = शेफ, शेपः = शेप ॥ । २ न), 'शिश्न, पुरुषके पेशाब करनेके रास्ता' के ४ नाम हैं ॥

५ मुष्कः, अण्डकोशः (+ अण्डकोपः), वृषणः (३ पु), 'अण्डकोश, फोता' के ३ नाम हैं ॥

६ त्रिकम् (न), 'पीठकी रीढ़के आधारपर तीन हड्डियोंके जोड़वाले स्थान-विशेष' का १ नाम है ॥

७ पिचण्डः (+ पिचिण्डः), कुक्षिः (२ पु), जठरम् (+ पु), उदरम्, तुन्दम् (३ न), 'पेट' के ५ नाम हैं ॥

८ स्तनः, कुचः (+ पयोधरः, वक्षोजः । २ पु), 'स्तन' के २ नाम हैं ॥

९ चूचुकम् (+ चुचुकम् । + पु), कुचाग्रम् (२ न), 'स्तनके ऊपर वाले काले भाग' के २ नाम हैं ॥

१० क्रोडम् (न स्त्री), भुजान्तरम् (+ अङ्कम् । न), 'गोदी' के २ नाम हैं ॥

---

* 'कटीप्रोथावुपस्थौ' इति पाठान्तरम् । पृथङ् नामद्वयमिति मते तु 'कटी प्रोथावुपस्थौ' इति पाठान्तरम् ॥ † 'मेहनशेपसी' इति पाठान्तरम् ॥

‡ 'पिचिण्डिकुक्षी' इति पाठान्तरम् ॥ § 'चुचुकं तु' इति पाठान्तरम् ॥

॥ 'शेफशेप' शब्दयोरदन्तत्वादेव 'शेपपुच्छलाङ्गूलेषु शुनः' (वा० ३९०१) इति वार्तिकसङ्गतिरन्यथा सान्तत्वे मध्ये विसर्गस्यापि वक्तुमौचित्यम् ॥

१ उरो वत्सं च वक्षश्च २ पृष्ठं तु चरमं तनोः।
३ स्कन्धो भुजशिरोंऽसोऽस्त्री ४ सन्धौ तस्यैव जत्रुणी ॥ ७८ ॥
५ बाहुमूले उभे कक्षौ ६ पार्श्वमस्त्री तयोरधः।
७ मध्यमं चावलग्नं च मध्योऽस्त्री ८ द्वौ परौ द्वयोः ॥ ७९ ॥
भुजबाहू प्रवेष्टो दोः *स्यात् ९ कफोणिस्तु कूर्परः।

---

१ उरः (=उरस्), वत्सम्, वक्षः (=वक्षस्। ३ न), 'छाती' के ३ नाम हैं। ('क्रोडम्,.....' ५ नाम 'छाती' के हैं, यह अन्य आचार्योंका मत है') ॥

२ पृष्ठम् (न), 'पीठ' का १ नाम है ॥

३ स्कन्धः (पु), भुजशिरः (=भुजशिरस्, न), अंसः (पु न), 'कन्धे' के ३ नाम हैं ॥

४ जत्रु (न), 'कन्धेके जोड़' का १ नाम है ॥

५ बाहुमूलम् (न), कक्षः (+कक्ष्यः। पु), 'काँख' के २ नाम हैं ॥

६ पार्श्वम् (न पु), 'कोख' अर्थात् 'काँखके नीचेवाले भाग' का १ नाम है ॥

७ मध्यमम्, अवलग्नम् (+विलग्नम्। २ न), मध्यः (पु न। +३ पु न †), 'शरीरके मध्य भाग' के ३ नाम हैं ॥

८ भुजः, बाहुः (+बाहः। २ पु स्त्री), प्रवेष्टः, दोः (=दोस्। +दोषा, स्त्री भागु०। २ पु), 'बाँह' के ४ नाम हैं ॥

९ कफोणिः (+‡कफणिः, कपोणिः। पु स्त्री) कूर्परः (+कर्परः। पु) 'केहुनी' के २ नाम हैं ॥

---

* 'स्यात्कपोणिस्तु' इति पाठान्तरम् ॥

† '—मध्यमो मध्यजेऽन्यवत्। पुमान् स्वरे मध्यदेशेऽप्यवलग्ने तु न स्त्रियाम्' (मेदि० पृ० ११८ श्लो० ४९-५०) इति, 'अवलग्नोऽस्त्रियां मध्ये त्रिषु स्यात्तुल्यमात्रके' (मेदि० पृ० १०० श्लो० ५९) इति मेदिन्युक्तेः 'अस्त्री' इत्यस्य त्रिभिः सम्बन्धः समीचीनः प्रतिभातीत्यवधेयम् ॥

‡ 'कफोणिः कफणिर्द्वयोः' इति शब्दार्णवात् 'कफणिः कूर्परःस्मृतः' (अभि० रत्न० २।३७८) इति हलायुधाच्चेत्यवधेयम् ॥

१ अस्योपरि प्रगण्डः स्यात् २ प्रकोष्ठस्तस्य चाध्यधः ॥ ८० ॥
३ मणिबन्धादाकनिष्ठं करस्य करभो बहिः ।
४ पञ्चशाखः *शयः पाणिश्स्तर्जनी स्यात्प्रदेशिनी ॥ ८१ ॥
६ अङ्गुल्यः करशाखाः स्युः ७ पुंस्यङ्गुष्ठः प्रदेशिनी ।
मध्यमाऽनामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ ८२ ॥
८ †पुनर्भवः करुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।
९ प्रादेश—

---

१ प्रगण्डः (पु), केहुनीके ऊपरवाले भाग' का १ नाम है ॥

२ प्रकोष्ठः (पु । + न), 'केहुनीके नीचेवाले भाग' का १ नाम है ॥

३ करभः (पु), 'हाथको कलाईसे कनिष्ठातकवाले बाहरी मांसल भाग' का १ नाम है ॥

४ पञ्चशाखः, शयः (+ शमः, शवः), पाणिः (३ पु), 'हाथ' के ३ नाम हैं ॥

५ तर्जनी, प्रदेशिनी (+ प्रदेशनी । २ स्त्री), 'तर्जनी' अर्थात् 'अँगूठेके पासवाली अंगुली' के २ नाम हैं ॥

६ अङ्गुली (+ अङ्गुलिः, अङ्गुरिः, २ स्त्री; अङ्गुलः, पु), करशाखा (२ स्त्री), 'अङ्गुली' के २ नाम हैं ॥

७ अङ्गुष्ठः (पु), प्रदेशिनी (+ प्रदेशनी), मध्यमा, ‡ अनामिका, कनिष्ठा (४ स्त्री), अंगूठेसे लेकर कनिष्ठा तकवाली प्रत्येक अङ्गुली' का क्रमशः १–१ नाम है ॥

८ पुनर्भवः (+ पुनर्नवः), करुहः (२ पु), नखः, नखरः (+ त्रि । २ पु न), 'नाखून, नँह' के ४ नाम हैं ॥

९ प्रादेशः (पु), 'फैलाये हुए तर्जनी और अँगूठेके बीचके प्रमाण-विशेष' का १ नाम है ॥

---

* 'शमः पाणिस्तर्जनी स्यात्प्रदेशनी' इति पाठान्तरम् । नाममाला तु 'पाणिः शयः शमी हस्तः' इत्युभयं पपाठ' इति क्षी० स्वा० ॥

† 'पुनर्नवः' इति पाठान्तरम् ॥

‡ अनया ब्रह्मणहिंशरश्छेदनादपवित्रत्वेन नामग्रहणायोग्यतया 'अनामिका' इति नाम्नः प्रसिद्धिः । अत एव यज्ञावसरेऽस्यां दर्भमयं पवित्रं धार्यत इत्यवधेयम् ॥

—१ ताल२गोकर्णास्तर्जन्यादियुते तते ॥ ८३ ॥
३ अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः।
४ पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥ ८४ ॥
५ *द्वौ संहतौ सिंहतलप्रतलौ वामदक्षिणौ।
६ †पाणिर्निकुञ्जः प्रसृतिश्चस्तौ युतावञ्जलिः पुमान् ॥ ८५ ॥
८ प्रकोष्ठे विस्तृतकरे हस्तो ९ मुष्ट्या तु बद्धया।
सरत्निः स्या१०दरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥ ८६ ॥

---

१ तालः (पु), 'फैलाये हुए मध्यमा और अँगूठेके बीचके प्रमाण-विशेष' का १ नाम है ॥

२ गोकर्णः (पु), 'फैलाये हुए अनामिका और अँगूठेके बीचके प्रमाण-विशेष' का १ नाम है ॥

३ वितस्तिः (पु स्त्री), द्वादशाङ्गुलः (भा० दी०, पु), 'वित्ता' अर्थात् फैलाये हुए कनिष्ठा और अँगूठेके बीचके प्रमाण-विशेष' के २ नाम हैं ॥

४ चपेटः (+ चर्पटः, पु, + चपेटा, चपेटिका; २ स्त्री), प्रतलः (+ तलः, तालः), प्रहस्तः (३ पु), 'थप्पड़, चटकन' के ३ नाम हैं ॥

५ सिंहतलः (+ संहतलः, सिंहतालः), प्रतलः (२ पु), 'अङ्गुल फलाये हुए दोनों हाथोंको सटाने' के २ नाम हैं ॥

६ प्रसृतिः (स्त्री । + प्रसृतः, पु), 'टेढ़े किये (समेटे) हुए हाथ' का १ नाम है ॥

७ अञ्जलिः (पु), 'अञ्जलि' का १ नाम है ॥

८ हस्तः (पु), 'एक हाथ' अर्थात् 'दो वित्ता या चौबीस अङ्गुलके प्रमाण-विशेष' का १ नाम है ॥

९ रत्निः (+ सरत्निः । पु स्त्री), 'निमूठ (मुट्ठीको बाँधकर) हाथसे नापे हुए प्रमाण-विशेष' का १ नाम है ॥

१० अरत्निः (स्त्री पु), 'कनिष्ठा अङ्गुलीको फैलाये हुए मुट्ठी बांधकर हाथसे नापे हुए प्रमाण-विशेष' का १ नाम है ॥

---

* 'द्वौ संहतौ सिंहतलः प्रतलौ' इति मुकु० सम्मतं पाठान्तरम् । 'द्वौ संहतौ संहतलप्रतलौ' इति च पाठान्तरम् ॥ † 'पाणिर्निकुञ्जः' इत्यपपाठः' इति क्षी० स्वा० ॥

१ व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्।
२ ऊर्ध्वविस्तृतदोष्णिनृमाने पौरुषं त्रिषु ॥ ८७ ॥
३ कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि।
५ कम्बुग्रीवा त्रिरेखा सा६ऽवटुर्घाटा कृकाटिका ॥ ८८ ॥
७ वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्।
८ क्लीवे घ्राणं गन्धवहा घोणा नासा च नासिका ॥ ८९ ॥
९ ओष्ठाधरौ तु रदनच्छदौ दशनवाससी।

---

१ व्यामः (पु), 'दोनों तरफ दोनों हाथोंको फैलाकर नापे हुए प्रमाण-विशेष' का १ नाम है ॥

२ पौरुषम् (त्रि), 'पोरसासे नापे हुए प्रमाण-विशेष' का १ नाम है। ('खड़े होकर हाथको ऊपर उठानेपर जो प्रमाण होता है, उसे 'पोरसा' कहते हैं, यह ४½ हाथका होता है') ॥

३ कण्ठः, गलः (२ पु), 'कण्ठ' के २ नाम हैं ॥

४ ग्रीवा, शिरोधिः, कन्धरा (३ स्त्री), 'गर्दन' के ३ नाम हैं ॥

५ कम्बुग्रीवा (स्त्री), 'शङ्खके समान तीन रेखावाली गर्दन' का १ नाम है ॥

६ अवटुः, घाटा, कृकाटिका (३ स्त्री), 'घाँटी' के ३ नाम हैं। ('भा० दी० मतसे 'गर्दनके ऊपरवाले भाग' के और स्वा० मु० मतसे 'गर्दनके पीछेवाले भाग' के ये ३ नाम हैं') ॥

७ वक्त्रम्, आस्यम्, वदनम्, तुण्डम्, आननम्, लपनम्, *मुखम् (७ न), 'मुखके बिल' के और उपचारसे 'मुखमात्र' के ७ नाम हैं ॥

८ घ्राणम् (न), गन्धवहा, घोणा, नासा (+ नसा, नस्या), नासिका (+ कुल्या, सिङ्घाणी। ४ स्त्री), 'नाक' के ५ नाम हैं ॥

९ ओष्ठः, अधरः, रदनच्छदः (३ पु), दशनवासः (= दशनवासस्, न), 'ओठ' के ४ नाम हैं ॥

---

* मुखशब्दस्य साधुत्वप्रकारो निरुक्ते प्रोक्तस्तथा हि—
"प्राक्खनो मुद्ददात्तश्च ततोऽञ्च प्रत्ययो भवेत्।
प्रजासृजा यतः खातं तस्मादाहुर्मुखं बुधाः" ॥ १ ॥ इति ॥

१ अधस्ताच्चिबुकं २ गण्डौ कपोलौ ३ तत्परा हनुः ॥ ९० ॥
४ रदना दशना दन्ता रदाऽस्तालु तु काकुदम्।
६ रसज्ञा रसना जिह्वा ७ प्रान्तावोष्ठस्य * सृक्किणी ॥ ९१ ॥
८ ललाटमलिकं गोधिरूर्ध्वं दृग्भ्यां भ्रुवौ स्त्रियौ।
१० कूर्चमस्त्री भ्रुवोर्मध्यं ११ तारकाऽक्ष्णः कनीनिका ॥ ९२ ॥
१२ लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी।
दृग्दृष्टी—

---

१ चिबुकम् (न), 'ओठ और ठुड्ढीके नीचेवाले भाग' का १ नाम है॥

२ गण्डः, कपोलः (+ कटः। २ पु), 'गाल' के २ नाम हैं॥

३ हनुः (स्त्री), 'दाढ़ी,ठुड्ढी' का १ नाम है॥

४ रदनः, दशनः, दन्तः (+ दंष्ट्रा, स्त्री), रदः (४ पु), 'दाँत' के ४ नाम हैं॥

५ तालु, काकुदम्, (२ न), 'तालु' के २ नाम हैं॥

६ रसज्ञा, रसना (+ रशना। + न†), जिह्वा (+ लोला। ३ स्त्री), 'जीभ' के ३ नाम हैं॥

७ सृक्किणी (= सृक्किणी स्त्री। + सृक्किणी = सृक्किणी स्त्री; सृक्कि = सृक्किन्, = सृक्कि; सृक्क = सृक्कन्; सृक्कम्=सृक्क, सृक्कि = सृक्किन्, = सृक्कि; सृक्क = सृक्कन्; सृक्कम् = सृक्क; ८ न), 'ओठके दोनों किनारों' का १ नाम है॥

८ ललाटम्, अलिकम् (+ अलीकम्, भालम्। २ न), गोधिः (पु), 'ललाट' के ३ नाम हैं॥

९ भ्रूः (स्त्री), 'भौंह' का १ नाम है॥

१० कूर्चम् (न पु), 'दोनों भौंहके बीचवाले भाग' का १ नाम है॥

११ तारका, कनीनिका (भा० वी०, ची० स्वा०। २ स्त्री) 'आँखकी पुतली' के २ नाम हैं॥

१२ लोचनम् (+ विलोचनम्), नयनम्, नेत्रम्, ईक्षणम्, चक्षुः (=चक्षुस्), अक्षि (६ न), दृक् (= दृश्), दृष्टिः (२ स्त्री), 'आँख' के ८ नाम हैं॥

---

* सृक्किणी" इति पाठान्तरम्॥

† यथाऽऽह श्रीहर्षः—"पित्तेन दूने रसने..." इति नैषधः॥ ३।९४॥

—१ चास्रु नेत्राम्बु रोदनं चास्रमश्रु च ॥ ६३ ॥
२ अपाङ्गौ नेत्रयोरन्तौ ३ कटाक्षोऽपाङ्गदर्शने।
४ कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ ६४ ॥
५ उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्।
६ चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ॥ ६५ ॥
७ तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः।
८ ते ललाटे भ्रमरकाः १० काकपक्षाः शिखण्डकः ॥ ६६ ॥

---

१ अस्रु, नेत्राम्बु, रोदनम्, अस्रम्, अश्रु (+ वाष्पम्। ५ न), 'आँसू' के ५ नाम हैं ॥

२ अपाङ्गः (पु), 'आँखोंके किनारेवाले भाग' का १ नाम है ॥

३ कटाक्षः (पु), (+ अपाङ्गदर्शनम्, न), 'कटाक्ष' का १ नाम है ॥

४ कर्णः, शब्दग्रहः (२ पु) श्रोत्रम्, श्रुतिः (स्त्री), श्रवणम्, श्रवः (= श्रवस्। शेष ३ न), 'कान' के ६ नाम हैं ॥

५ उत्तमाङ्गम् (+ वराङ्गम्), शिरः (= शिरस्। + शिरः = शिर,* पु), शीर्षम् (३ न), मूर्धा (= मूर्धन्, पु), मस्तकः (पु न), 'सिर, मस्तक' के ५ नाम हैं ॥

६ चिकुरः (+ चिकूरः, चिहुरः †), कुन्तलः, बालः (+ बालः), कचः, केशः, शिरोरुहः (+ शिरसिजः, मूर्धजः। ६ पु), 'केश, बाल' के ६ नाम हैं ॥

७ कैशिकम्, कैश्यम् (२ न), 'केशके समूह' का १ नाम है ॥

८ अलकः, चूर्णकुन्तलः (२ पु), 'अँगूठिया बाल' के २ नाम हैं ॥

९ भ्रमरकः (पु), 'काकुल' अर्थात् 'बुलबुली यानी ललाटपर लटके हुए बाल' का १ नाम है ॥

१० ‡ काकपक्षः, शिखण्डकः (+ शिखाण्डकः। २ पु), 'काकपक्ष' अर्थात् 'लड़कोंका जूड़ा, जुल्फी, शिखा—सामान्य' के २ नाम हैं ॥

---

* "शिरोवाची शिरोऽदन्तो रजोवाची रजस्तथा" इत्युक्तेरिति बोध्यम् ॥

† 'कुन्तला मूर्धजाः शस्ताश्चिकुराश्चिहुरास्तथा' इति दुर्गोक्तेः। किन्तु 'चिहुर'शब्दस्य प्राकृत एव बाहुल्येन प्रयोग उपलभ्यते न तु संस्कृत इत्यवधेयम् ॥

‡ "क्षत्रियाणां चूडा 'काकपक्ष' इति गौडः" इति क्षी० स्वा० ॥

१ * कवरी केशवेशोऽथ धम्मिल्लः संयताः कचाः।
३ शिखा चूडा केशपाशी ४ † व्रतिनस्तु जटा सटा ॥ ६७ ॥
५ वेणिः प्रवेणी ६ शीर्षण्यशिरस्यौ विशदे कचे।
७ पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ ६८ ॥
८ तनूरुहं रोम लोम ९ तद्वृद्धौ ‡ श्मश्रु पुंमुखे।
१० आकल्पवेषौ नेपथ्यं—

---

१ कवरी (+कवरं। स्त्री), केशवेशः (+केशवेषः। पु), 'बालके रचना-विशेष' के २ नाम हैं ॥

२ धम्मिल्लः (पु), 'पटिया, जूड़ा' अर्थात् 'बाँधे हुए स्त्रियोंके बालके रचना-विशेष' का १ नाम है ॥

३ शिखा, चूडा, केशपाशी (३ स्त्री), 'शिखा, चुटिया, चुन्नी'के ३नाम हैं ॥

४ जटा, सटा (२ स्त्री), 'जटा' अर्थात् 'आपसमें सटे हुए बाल या ऋषियोंकी जटा या जटामात्र' के २ नाम हैं ॥

५ वेणिः (+वेणी), प्रवेणी (+प्रवेणिः। २ स्त्री), 'बालकी गुथी हुई चोटी' के २ नाम हैं ॥

६ शीर्षण्यः, शिरस्यः (२ पु), 'निर्मल बाल' के २ नाम हैं ॥

७ पाशः, पक्षः, हस्तः (३ पु), ये तीन शब्द 'कच' शब्दसे परे रहने पर अर्थात् 'कचपाशः, कचपक्षः, कचहस्तः' (३ पु), या कच (केश) के पर्याय-वाचक शब्दसे परे रहने पर अर्थात् 'केशपाशः, केशपक्षः, केशहस्तः, बालपाशः, बालपक्षः, बालहस्तः (६ पु), इत्यादि नाम 'केश-समूह' के हैं ॥

८ तनूरुहम्, रोम (=रोमन्), लोम (=लोमन्। ३ न), 'रोंएं' के ३ नाम हैं ॥

९ श्मश्रु (+स्मश्रु। न), 'दाढ़ीके बढ़े हुए बाल' का १ नाम है ॥

१० आकल्पः, वेषः (+वेशः। २ पु), नेपथ्यम् (न। +पु), 'आभूषण आदिसे उत्पन्न शोभा' के ३ नाम हैं ॥

---

* "कवरी केशवेषोऽथ" इति पाठान्तरम् ॥

† "व्रतिनः सा जटा सटा" इति पाठान्तरम्। अत्र 'सा' शब्दः केशार्थकः।

‡ "स्मश्रु पुंमुखे" इति पाठान्तरम् ॥

—१ प्रतिकर्म प्रसाधनम् ॥ ९९ ॥
२ दशैते त्रिष्वशलङ्कर्ताऽलङ्करिष्णुश्च ४ मण्डितः ।
प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृतः ॥१००॥
५ विभ्राड् भ्राजिष्णुरोचिष्णू ६ भूषणंस्यादलङ्क्रिया ।
७ अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥
मण्डनं चाऽथ *मुकुटं किरीटं पुन्नपुंसकम् ।
९ चूडामणिः शिरोरत्नं—

---

१ प्रतिकर्म (= प्रतिकर्मन्), प्रसाधनम् (२ न), 'तिलक, फूल आदिसे सँवारने' के २ नाम हैं । 'आकल्पः·····' ५ नाम एकार्थक हैं, यह भी कई एक आचार्यों का मत 'है') ॥

२ यहाँ से लेकर आगेवाले दश शब्द त्रिलिङ्ग हैं ॥

३ अलङ्कर्ता (= अलङ्कर्तृ), अलङ्करिष्णुः (+ मण्डनः । २ त्रि), 'अलङ्कृत (सुशोभित) करनेवाले' के २ नाम हैं ॥

४ मण्डितः, प्रसाधितः, अलङ्कृतः, भूषितः, परिष्कृतः (+ परिस्कृतः । ५ त्रि), 'आभूषण इत्यादिसे सुशोभित' के ५ नाम हैं ॥

५ विभ्राट् (= विभ्राज्), भ्राजिष्णुः, रोचिष्णुः (३ त्रि), 'आभूषण इत्यादिसे अधिक शोभनेवाले' के ३ नाम हैं ॥

६ भूषणम् (न । + भूषा, स्त्री), अलङ्क्रिया (स्त्री), 'आभूषण इत्यादिसे सुशोभित करने' के २ नाम हैं ॥

७ अलङ्कारः, आभरणम्, परिष्कारः (+ परिस्कारः । १ ला और ३ रा पु), विभूषणम् (+ भूषणम्), मण्डनम् (शेष ३ न), 'आभूषण, गहना' के ५ नाम हैं ॥

८ मुकुटम् (+ मकुटम् । न), किरीटम् (पु न), 'मुकुट' के २ नाम हैं ॥

९ चूडामणिः (+ शिरोमणिः । पु), शिरोरत्नम् (न), 'शिरोमणि' के २ नाम हैं ॥

---

* मकुटं किरीटं' इति पाठान्तरम् ॥

† इदमसत्—वेषो हि वस्त्रालङ्करणप्रसाधनैरङ्गशोभा । प्रसाधनं तु समालम्भनं तिलकपत्त्रभङ्गादिना (अङ्गशोभा) इति क्षी० स्वा० ॥

—१ तरलो हारमध्यगः ॥ १०२ ॥
२ वालपाश्या पारितथ्या ३ पत्त्रपाश्या ललाटिका।
४ कर्णिका तालपत्त्रं स्यात् ५ कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥
६ ग्रैवेयकं कण्ठभूषा ७ लम्बनं स्याल्ललन्तिका।
८ स्वर्णैः प्रालम्बिकाऽथोरःसूत्रिका मौक्तिकैः कृता ॥ १०४ ॥
१० हारो मुक्तावली ११ देवच्छन्दोऽसौ शतयष्टिका।

---

१ तरलः (+ नायकः। पु) 'हारका सुमेरु' अर्थात् 'हार या माला के बीचवाले बड़े दाने' का १ नाम है ॥

२ वालपाश्या (+ वालपाश्या), पारितथ्या (२ स्त्री), 'स्त्रियोंको चोटी या जूड़ामें लगानेके लिये सोने आदिकी पट्टी' (भूषण-विशेष) के २ नाम हैं ॥

३ पत्त्रपाश्या, ललाटिका (२ स्त्री), 'बन्दी, बेना आदि ललाटके भूषण' के २ नाम हैं ॥

४ कर्णिका (स्त्री), तालपत्त्रम् (+ तालपत्त्रम्। न), 'कनफूल, बेरन, तरकी, झूमक आदि कानके भूषण' के २ नाम हैं ॥

५ कुण्डलम्, कर्णवेष्टनम् (२ न), 'कुण्डल' के २ नाम हैं। ('कुण्डल' और 'कर्णिका'में यह भेद है कि 'कुण्डल'को स्त्री-पुरुष दोनों पहनते हैं और 'कर्णिका' को केवल स्त्रियाँ ही पहनती हैं') ॥

६ ग्रैवेयकम् (+ ग्रैवेयम्, ग्रैवम्। न), कण्ठभूषा (स्त्री), 'हँसुली, कण्ठा, टीक आदि गलेके आभूषण' के २ नाम हैं ॥

७ लम्बनम् (न), ललन्तिका (स्त्री), 'गलेसे थोड़ा नीचे लटकनेवाले भूषण' के २ नाम हैं ॥

८ प्रालम्बिका (स्त्री), 'गलेसे थोड़ा नीचे लटकनेवाले सुवर्णके भूषण (सोनेकी हलका सिकड़ी आदि)' का १ नाम है ॥

९ उरःसूत्रिका (स्त्री), 'मोतीके हार' का १ नाम है ॥

१० हारः (पु), मुक्तावली (स्त्री), 'हार' के २ नाम हैं ॥

११ देवच्छन्दः (पु), शतयष्टिका (स्त्री। भा० दी०) 'सौ लड़ीवाले हार' के २ नाम हैं ॥

१ हारभेदा* यष्टभेदाद्गुच्छगुच्छार्द्धगोस्तनाः ॥ १०५ ॥
अर्द्धहारो माणवक एकावल्येकयष्टिका।
२ सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ १०६ ॥
३ आवापकः परिहार्यः कटको वलयोऽस्त्रियाम्।

---

१ गुच्छः (+ गुत्सः, गुत्स्यः), गुच्छार्द्धः (+ गुत्सार्द्धः गुत्स्यार्द्धः), गोस्तनः, अर्द्धहारः, माणवकः (५ पु), एकावली, एकयष्टिका, (२ स्त्री), ये ७ 'हारोंके भेदविशेष' हैं। ('इनमें बत्तीस लड़ीके हारका गुच्छ, चौबीस लड़ीके हारका गुच्छार्द्ध, चार लड़ीके हारका गोस्तन, बारह लड़ीके हारका अर्द्धहार, बीस लड़ीके हारका माणवक और एक लड़ीके हारका एकावली, एकयष्टिका † नाम है') ॥

२ नक्षत्रमाला (स्त्री), 'सत्ताइस मोतियोंके हार' का १ नाम है ॥

३ आवापकः, परिहार्यः (२ पु), कटकः, वलयः (२ पु न), 'पहुँची, कड़ा आदि हाथके भूषण' के ४ नाम हैं ॥

---

* 'यष्टिभेदाद् गुत्सगुत्सार्द्धगोस्तनाः' इति पाठान्तरम् ॥

‡ अत्र क्षी० स्वा०—'अन्ये त्वाख्यन्'—'द्वात्रिंशल्लतो गुच्छो गुह्याच्छादकत्वात्। चत्वारिंशल्लतो गोस्तनो लम्बमानत्वात्, गोपुच्छोऽपि। चतुःपञ्चाशल्लतोऽर्द्धहारो देवच्छन्दार्द्धत्वाद्। विंशल्लतो माणवकोऽल्पत्वात्' इति' इत्याह ॥ अभिधानचिन्तामणौ हेमचन्द्राचार्यपादै-रुक्ता हारभेदा प्रसङ्गादुच्यन्ते—

'देवच्छन्दः शतं साष्टं त्रिंशच्छन्दः सहस्रकम्।
तदर्द्धं विजयच्छन्दो हारस्त्वष्टोत्तरं शतम् ॥ १ ॥
अर्द्धं रश्मिः कलापोऽस्य द्वादश त्वर्द्धमाणवः।
द्विर्द्वादशार्द्धगुच्छः स्यात्पञ्च हारफलं लताः ॥ २ ॥
अर्द्धहारश्चतुःषष्टिर्गुच्छमाणवमन्दराः।
अपि गोस्तनगोपुच्छावर्द्धमर्द्धं यथोत्तरम् ॥ ३ ॥
इति हारयष्टिभेदादेकावल्येकयष्टिका।
कण्ठिकाऽभ्यथ नक्षत्रमाला तत्संख्यमौक्तिकैः' ॥ ४ ॥

इति अभि० चिन्ता० ३।३२२—३२६

अन्ये त्वेवमाहुः—'चतुःषष्टिलतो हारोऽष्टाष्टहीना यथोत्तरम्।
रश्मिः कलापो माणवकोऽर्द्धहारोऽर्द्धगुच्छकः ॥१॥
कलापच्छन्दो मन्दरः स्यादर्द्धगुच्छः सप्ततियष्टिकः'। इति।

अत्र केचित् 'रश्मिकलापो' इति वा पठित्वैकं नामेत्याहु। सुलभतयाऽवगमाय चक्रं द्रष्टव्यम् ॥

विविधमतेन हाराणां संज्ञाया यष्टिसंख्यायाश्च बोधकचक्रम् ॥

क्रमागतसंख्याः	हारसंज्ञाः	हैमोक्तयष्टि-संख्याः	मा० दी० उक्ताः यष्टिसंख्याः	महे० उक्ताः यष्टिसंख्याः	क्षी० स्वा० मते अन्योक्ता यष्टि-संख्याः	अन्योक्ताः यष्टिसंख्याः
१	देवच्छन्दः	१००	❀	❀	१०८	❀
२	इन्द्रच्छन्दः	१००८	❀	❀	❀	❀
३	विजयच्छन्दः	५०४	❀	❀	❀	❀
४	हारः	१०८	३४	❀	❀	६४
५	रश्मिकपालः	५४	❀	❀	❀	❀
६	अर्द्धमाणवः	१२	❀	❀	❀	❀
७	अर्द्धगुच्छः	२४	२४	२४	❀	२४
८	हारफलम्	५	❀	❀	❀	❀
९	अर्द्धहारः	६४	❀	१२	५४	३२
१०	गुच्छः	३२	३२	३२	३२	७०
११	माणवः	१६	२०	२०	२०	४०
१२	मन्दरः	८	❀	❀	❀	८
१३	गोस्तनः	४	४	४	४०	❀
१४	गोपुच्छः	२	❀	❀	४०	❀
१५	एकावली	१	१	१	१	❀
१६	नक्षत्रमाला	२७ मौ०	२७ मौ०	२७ मौ०	२७ मौ०	❀
१७	रश्मिः	❀	❀	❀	❀	५६
१८	कलापः	❀	❀	❀	❀	४८
१९	कलापच्छन्दः	❀	❀	❀	❀	१६

१ केयूरमङ्गदं तुल्ये २ अङ्गुलीयकमूर्मिका ॥ १०७ ॥
३ साक्षराऽङ्गुलिमुद्रा स्यात् ४ कङ्कणं करभूषणम्।
५ स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा ॥ १०८ ॥
क्लीबे सारसनं चाऽथ पुंस्कट्यां शृङ्खलं त्रिषु।
७ पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥ १०९ ॥
हंसकः पादकटकः ८ * किङ्किणी क्षुद्रघण्टिका।
९ त्वक्फलक्रिमिरोमाणि वस्त्रयोनिः—

---

१ केयूरम्, अङ्गदम् (२ न), 'बिजायठ, लाजूबन्द, बहरबूटा' के २ नाम हैं ॥

२ अङ्गुलीयकम् (+ अङ्गुरीयकम् । न । + पु †), ऊर्मिका (स्त्री), 'अँगूठी' के २ नाम हैं ॥

३ अङ्गुलिमुद्रा (स्त्री), 'नाम खुदी हुई अँगूठी' का १ नाम है ॥

४ कङ्कणम्, करभूषणम् (२ न), कङ्कण, ककना' के २ नाम हैं ॥

५ मेखला, काञ्ची, सप्तकी, रशना (+ रसना, सिञ्जनी । ४ स्त्री), सारसनम् (न), ‡ 'स्त्रियोंकी करधनी के ५ नाम हैं। (यद्यपि १ लड़ीवाली करधनीकी 'काञ्ची', ८ लड़ीवालीकी 'मेखला', १६ लड़ीवालीकी 'रशना' और २५ लड़ीवालीकी 'कलाप' संज्ञा अन्य ग्रन्थोंमें कही गयी है, तथापि यहां उक्त भेदविशेषका आश्रय नहीं किया गया है) ॥

६ शृङ्खलम् (त्रि), 'पुरुषोंकी करधनी' का १ नाम है ॥

७ पादाङ्गदम् (न), तुलाकोटिः (+ तुलाकोटी । स्त्री), मञ्जीरः (+ मञ्जीलः), नूपुरः (२ पु न), हंसकः, पादकटकः (२ पु), 'पावजेब' के ६ नाम हैं ॥

८ किङ्किणी (+ किङ्किणिः, कङ्किणी), क्षुद्रघण्टिका (२ स्त्री), 'घूघूर' के २ नाम हैं ॥

९ वस्त्रयोनिः (स्त्री), 'जिनके कपड़े बनते हों उन छाल, फल, कृमि और रोएं' का १ नाम है। ('तीसी, केला आदिके छालसे, कपास-

---

* 'कङ्किणी' इति पाठान्तरम् ॥

† 'अयं मैथिल्यभिज्ञानं राघवस्याङ्गुरीयकः' (भट्टि ८।११८) इत्युक्तेरिति मुकुटः ॥

‡ 'एकयष्टिभवेत्काञ्ची मेखला त्वष्टयष्टिका।
रशना षोडश ज्ञेया कलापः पञ्चविंशकः' ॥ १ ॥
इत्युक्ता भेदास्त्विह नाश्रिता इत्यवधेयम् ॥

१ दश त्रिषु ॥ ११० ॥

२ वाल्कं क्षौमादि ३ फालं तु कार्पासं वादरं च तत् ।
४ कौशेयं कृमिकोशोत्थं ५ राङ्कवं मृगरोमजम् ॥ १११ ॥

आदिके फलसे, रेशमवाले कृमि (कीड़े) के कोएसे और भेंड़, दुम्बा भेंड़ा, मृग आदिके रोंएंसे कपड़े बनते हैं; अतः 'उन छाल, फल, कृमि और रोंएं' का 'वस्त्रयोनिः (स्त्री), यह १ नाम है") ॥

१ यहांसे दश शब्द त्रिलिङ्ग हैं। ("वाल्कम्, क्षौमम्, फालम्, कार्पासम्, वादरम्, कौशेयम्, राङ्कवम्, अनाहतम्, निष्प्रवाणि, तन्त्रकम्' क्षी० स्वा० भा० दी० मतसे ये १० शब्द त्रिलिङ्ग हैं। वाल्कम्, क्षौमम् (न *), फालम्, कार्पासम्, वादरम्, कौशेयम्, कृमिकोशोत्थम्, राङ्कवम्, मृगरोमजम्, अनाहतम्, निष्प्रवाणि, तन्त्रकम् ('च' शब्दसे इसका संग्रह हुआ है), सुभूति और महेश्वरके मतसे शेष ११ शब्द त्रिलिङ्ग हैं") ॥

२ वाल्कम्, क्षौमम् (+ न । २ त्रि), 'तिसीवट या केले आदिके छालसे बने हुए कपड़े' के २ नाम हैं ॥

३ फालम्, कार्पासम्, वादरम् (+ बादरम् । ३ त्रि), 'कपास इत्यादि-के फलसे बने हुए कपड़े' अर्थात् 'सूती कपड़े' के ३ नाम हैं ॥

४ कौशेयम्, कृमिकोशोत्थम् (भा० दी०, क्षी० स्वा० । + कृमिकोषोत्थम् । २ त्रि), 'पीताम्बर आदि रेशमी कपड़ा' अर्थात् 'रेशमवाले कीड़ोंके कोएके बने सूतसे बुने हुए कपड़े' के २ नाम हैं ॥

५ राङ्कवम्, मृगरोमजम् (भा० दी०, क्षी० स्वा० । २ त्रि), 'दुशाला, शाल, अलवान, कम्बल आदि ऊनी कपड़ा' अर्थात् 'मृग (भेंड़ा आदि पशु) के रोंएंके बने सूतसे बुने हुए कपड़े' के या 'रङ्कुनामक मृग-विशेषके रोंएंके बने सूतसे बुने हुए कपड़े' के २ नाम हैं ॥

---

* 'क्षौमं दुकूलं स्याद् द्वे तु' (२।६।११३) इत्यत्र 'दुकूल'शब्दसाहचर्यात् 'क्षौमं' क्लीबमेवेत्याशयः। अत एव 'कृमिकोशोत्थ-मृगरोमज'शब्दयोरपि पर्यायता, 'तत्रोक्त'शब्दस्यैकादशसङ्ख्यकता च सिध्यति। स्वा० भा० दी० मते तु 'कृमिकोशोत्थ-मृगरोमज'शब्दयोर्न पर्यायता, 'क्षौम'शब्दश्च त्रिलिङ्ग एव, अत एव 'दश त्रिषु' इति ग्रन्थकारोक्तिः संगच्छते इति बोध्यम् ॥

१ अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरम्।
२ तस्योद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥११२॥
३ पत्त्रोर्णं धौतकौशेयं ४ बहुमूल्यं महाधनम्।
५ क्षौमं दुकूलं स्याद् ६ द्वे तु निवीतं प्रावृतं त्रिषु ॥११३॥
७ स्त्रियां बहुत्वे वस्त्रस्य * दशाः स्युर्वस्तयो द्वयोः।
८ दैर्घ्यमायाम † आरोहः—

---

१ अनाहतम् (+ अहतम्), निष्प्रवाणि, तन्त्रकम् (भा० दी, ही० स्वा० । ३ त्रि), नवाम्बरम् (न), भा० दी० ही० स्वा० के मतसे 'जो पहना, धुलाया या फटा हुआ नहीं हो उस कपड़े' के और महेश्वरके मतसे 'कोरे कपड़े' के ४ नाम हैं ॥

२ उद्गमनीयम् (न), 'धुलाये हुए कपड़े' का नाम है। ('धौतयोर्वस्त्रयोर्युगम्' यहाँ पर 'युग' ‡ शब्द अविवक्षित है') ॥

३ पत्त्रोर्णम् (न), धौतकौशेयम् (भा० दी० । २ न), 'धुलाये हुए रेशमी कपड़े' के २ नाम हैं ॥

४ बहुमूल्यम्, महाधनम् (भा० दी० । २ न), 'बेशकीमती वस्तु' के २ नाम हैं ॥

५ क्षौमम् (त्रि । + न), दुकूलम् (न), 'पीताम्बर' के २ नाम हैं ॥

६ निवीतम् (+ निवृत्तम्), प्रावृतम् (२ न), 'ढके हुए वस्त्र' के २ नाम हैं ॥

७ दशाः (स्त्री नि० ब० व०); वस्तयः (भा० दी० । स्त्री पु नि० ब० व० । + वर्तयः ; २ एक व० § भी हैं), 'कपड़ेकी किनारी, धारी, दस्सी' के २ नाम हैं ॥

८ दैर्घ्यम् (न,) आयामः, आरोहः (+ आनाहः । २ पु), 'कपड़े आदिकी

---

* 'दशाः स्युर्वस्तयोर्द्वयोः' इति पाठान्तरम् ॥ † 'आनाहः' इति पाठान्तरम् ॥

‡ युगशब्दस्याविवक्षायां लक्ष्यं यथा—

'गृहीतपत्युद्गमनीयवस्त्रा' । कुमारसम्भव ७।११ इति ॥

'धौतोद्गमनीयं च—' इति हलायुधश्च (अभि० रत्न० २।३९६) ॥

§ 'वर्तिर्वस्ति' शब्दयोरेकवचनत्वज्ञापि। तथा हि हलायुधः—'वर्तिर्वस्तिर्दशाः सिचः' (अभि० रत्न० २।३९६) इति ॥

—१ परिणाहो विशालता ॥ ११४ ॥

२ पटच्चरं जीर्णवस्त्रं ३ समौ *नक्तककर्पटौ।
४ वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ॥ ११५ ॥
५ सुचेलकः †पटोऽस्त्री स्याद् ६ वराशिः स्थूलशाटकः।

लम्बाई' के ३ नाम हैं ॥

१ परिणाहः (पु), विशालता (स्त्री), 'कपड़े आदिकी चौड़ाई' के २ नाम हैं ॥

२ पटच्चरम्, जीर्णवस्त्रम् (२ न), 'पुराने कपड़े' के २ नाम हैं ॥

३ नक्तकः (+ लक्तकः), कर्पटः (२ पु), मुकु० महे० मतसे 'पुराने कपड़ेके टुकड़े' के, भा० दी० मतसे 'रुमाल' अर्थात् 'पसीना आदिको पोंछनेवाले छोटे वस्त्र' के और क्षी० स्वा० मतसे 'दूध, पानी आदिको छाननेवाले कपड़े' के २ नाम हैं ॥

४ वस्त्रम्, आच्छादनम्, वासः (= वासस्), चैलम् (+ चेलम्), वसनम्, अंशुकम् (+ चीरम्, प्रोतः। ६ न), 'कपड़ामात्र' के ६ नाम हैं ॥

५ सुचेलकः (पु), पटः (पु न। + पु स्त्री क्षी० स्वा० ‡), 'अच्छे कपड़े' के २ नाम हैं ॥

६ वराशिः (+ वरासिः। + पु), स्थूलशाटकः (२ त्रि), 'मोटे कपड़े' के २ नाम हैं। ('सुचेलकः,.....' ४ शब्द एकार्थक हैं, यह भी आचार्यों का मत है') ॥

---

* 'लक्तककर्पटौ' इति पाठान्तरम् ॥

† 'पटोऽस्त्री ना वराशिः' इति 'पटोऽस्त्री ना वरासिः' इति च क्वचित्कं पाठान्तरम् ॥

‡ पटोऽस्त्री कर्पटः शाटः सिचयप्रोतलक्तकाः' इति रभसोक्तेः, 'पटश्चित्रपटे वस्त्रेऽस्त्री, प्रियालद्रुमे पुमान्' (मेदि० पृ० ३६ श्लो० १९) इति मेदिन्युक्तेश्च 'अस्त्री'ति चिन्त्यम्, द्वयोरदर्शनात्' इति क्षी० स्वा० वचसश्चिन्त्यत्वमुक्तम् भा० दी०। क्षी० स्वा० तु 'अस्त्री'ति चिन्त्यम्, द्वयोर्दर्शनात्' इत्येवोक्तत्वात् 'अपटीक्षेपेण' इति लक्ष्यात्त्व भा० दी० उक्तेरेव चिन्त्यत्वम्। 'अम्बरमंशुकमुक्तं वस्त्रं सिचयः पटः पोटः' (अभि० रत्न० २।३९३) इति हलायुधोक्तथा तु 'पट' शब्दस्य पुंस्त्वमात्रमेवायातीत्यवधेयम् ॥

१ निचोलः प्रच्छदपटः २ समौ रल्लककम्बलौ ॥ ११६ ॥
३ अन्तरीयोपसंव्यानपरिधानान्यधोऽशुके ।
४ द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥ ११७ ॥
संव्यानमुत्तरीयं च ५ चोलः कूर्पासकोऽस्त्रियाम् ।
६ नीशारः स्यात्प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥
७ अधोरुकं वरस्त्रीणां स्याच्चण्डातकमस्त्रियाम् ।
८ स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥ ११९ ॥
९ अस्त्रो वितानमुल्लोचो—

---

१ निचोलः (+निचुलः । त्रि), प्रच्छदपटः (२ पु), महे० भा० दी० मतसे 'पालकी आदिके ओहार या सारङ्गी, सितार आदिके गिलाफ' (खोली) के, ही० स्वा० मतसे 'रजाई, तोसक, तकिया आदिकी खोली' के और अन्याचार्योंके मतसे 'बुर्का' अर्थात् 'यवन आदिकी स्त्रियां पर्देके वास्ते जिसको ओढ़कर पूरे शरीरको छिपाकर बाहर निकलती हैं उस वस्त्र-विशेष'-के २ नाम हैं।

२ रल्लकः, कम्बलः (२ पु), 'कम्बल' के २ नाम हैं ॥

३ अन्तरीयम्, उपसंव्यानम्, परिधानम्, अधोंऽशुकम् (४ न), 'कमरसे नीचे पहने जानेवाले धोती, पायजामा, साड़ी आदि कपड़ों' के ४ नाम हैं ॥

४ प्रावारः (+प्रावरः), उत्तरासङ्गः (२ पु), बृहतिका (स्त्री), संव्यानम्, उत्तरीयम् (२ न), 'कमरसे ऊपर धारण करने योग्य दुपट्टा, चादर, पगड़ी आदि कपड़ों' के ५ नाम हैं ॥

५ चोलः (+चोली, स्त्री), कूर्पासकः (पु न), 'स्त्रियोंकी चोली, कुर्ती आदि' के २ नाम हैं ॥

६ नीशारः (पु), 'रजाई, दुलाई या शीतसे बचनेके लिये ओढ़े जानेवाले वस्त्रमात्र' का १ नाम है ॥

७ अधोरुकम् (न), चण्डातकम् (न पु), 'लहँगा' के २ नाम हैं ॥

८ आप्रपदीनम् (त्रि), 'पैरतक लटकनेवाले कपड़े' का १ नाम है ॥

९ वितानम् (न पु), उल्लोचः (पु), 'चँदवा' के २ नाम हैं ॥

१ दूष्याद्यं वस्त्रवेश्मनि ।
२ प्रतिसीरा * जवनिका स्यात्तिरस्करिणी च सा ॥ १२० ॥
३ † परिकर्माङ्गसंस्कारः स्याद्धन्माष्टिर्मार्जना मृजा ।
५ उद्वर्तनोत्सादने द्वे स्नाने ६ आप्लाव आप्लवः ॥ १२१ ॥
स्नानं ७ चर्चा तु चार्चिक्यं स्यासकोऽथ प्रबोधनम् ।
अनुबोधः ८ पत्त्रलेखा ‡ पत्राङ्गुलिरिसे समे ॥ १२२ ॥

---

१ दूष्यम् (+ दूश्यम् । न), आदि ('आदि' शब्दसे 'पटकुटी' (स्त्री), पटवासः (= पटवासस्), पटगृहम्, पटकुड्यम् (३ न), इत्यादिका संग्रह है'), 'कपड़ेके घर, डेरा, रावटी, तम्बु आदि' का नाम है ॥

२ प्रतिसीरा, जवनिका (+ यमनिका), तिरस्करिणी (+ तिरस्कारिणी, तिरस्करणी । ३ स्त्री), 'कनात, पर्दा' के ३ नाम हैं ॥

३ परिकर्म (= परिकर्मन् । + प्रतिकर्म = प्रतिकर्मन् । न), अङ्गसंस्कारः (पु), 'कुङ्कुम आदिसे शरीरके संस्कार करने' के २ नाम हैं ॥

४ मार्ष्टिः, मार्जना, मृजा (३ स्त्री), 'झाड़ पोंछकर शरीरको साफ करने' के ३ नाम हैं ॥

५ उद्वर्तनम्, उत्सादनम् (+ उच्छादनम् । २ न), 'उबटन, वेशन, साबुन आदिसे शरीरको मलने' के २ नाम हैं ॥

६ आप्लावः, आप्लवः (२ पु), स्नानम् (न), 'स्नान करने'के ३ नाम हैं ॥

७ चर्चा (स्त्री), चार्चिक्यम् (न), स्थासकः (पु), 'शरीरमें चन्दन आदि लगाने' के ३ नाम हैं ॥

८ प्रबोधनम् (न), अनुबोधः (पु), 'निकले हुए गन्धको फिरसे लाने' के २ नाम हैं । ('जैसे—'कस्तूरीके गन्धके निकल जानेपर मदिरा छोड़नेसे उसका गन्ध फिर आ जाता है') ॥

९ पत्त्रलेखा, पत्त्राङ्गुलिः (२ स्त्री), 'कस्तूरी, केसर, मेंहदी या चन्दन आदिसे गाल या स्तनादिपर पत्ते, फूल आदिकी चित्रकारी करने' के २ नाम हैं ॥

---

* 'यमनिका' इति पाठान्तरम् ॥ † 'प्रतिकर्माङ्गसंस्कारः' इति पाठान्तरम् ॥
‡ 'पत्राङ्गुलिरिमे स्त्रियौ' इति पाठान्तरम् ॥

१ तमालपत्रतिलकचित्रकाणि विशेषकम्।
द्वितीयं च तुरीयं च न स्त्रियाम्अथ कुङ्कुमम्॥ १२३॥
काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने।
रक्तसंकोचपिशुनं *धीरं लोहितचन्दनम्॥ १२४॥
३ लाक्षा राक्षा जतु क्लीवे यावोऽलक्तो द्रुमामयः।
४ लवङ्गं देवकुसुमं श्रीसंज्ञम्अथ जायकम्॥ १२५॥
† कालीयकं च कालानुसार्यं चाद्थ समार्थकम्।
‡ वंशिकागुरुराजार्हलोहक्रि(कृ)मिजजोङ्गकम्॥ १२६॥

---

१ तमालपत्त्रम्, तिलकम्, चित्रकम्, विशेषकम् (२ रा ४ था पु न। शेष न), 'कस्तूरी, चन्दन, भस्म आदिसे टीका (तिलक) लगाने' के ४नाम हैं॥

२ कुङ्कुमम्, काश्मीरजन्म (=काश्मीरजन्मन्), अग्निशिखम्, वरम्, वाह्लीकम् (+वाहिकम्, बह्लीकम्, बहिकम्), पीतनम्, रक्तम् (+असृक्संज्ञम् ; खूनके पर्यायवाचक नाम), संकोचम्, पिशुनम्, धीरम् (+वीरम्) लोहितचन्दनम् (११ न) 'केसर, कुङ्कुम' के ११ नाम हैं॥

३ लाक्षा, राक्षा (+रक्षा। २ स्त्री), जतु (न), यावः, अलक्तः, द्रुमामयः § (३ पु), 'लाही, लाक्षा, लाख, महावर' के ६ नाम हैं॥

४ लवङ्गम्, देवकुसुमम्, श्रीसंज्ञम् (श्री अर्थात् लक्ष्मीके पर्यायवाले सब नाम। ३ न), 'लौंग' के ३ नाम हैं॥

५ जायकम्, कालीयकम् (+कालेयकम्), कालानुसार्यम् (३ न), 'पीला चन्दन, जायकनामक गन्धद्रव्य' के ३ नाम हैं॥

६ वंशिकम् (+वंशकम्), अगुरु (+पु। +अगरु), राजार्हम्, लोहम् (+पु), क्रि(कृ)मिजम्, जोङ्गकम् (६ न), भा० दी० मतसे 'अगर' के ६ नाम हैं॥

---

* 'वा (धा) रलोहितचन्दनम्' इति पाठान्तरम्॥ † 'कालेयकं च' इति पाठान्तरम्॥
‡ 'वंशकागरुराजार्हलोहक्रि(कृ)मिजजोङ्गकम्' इति पाठान्तरम्॥
§ धन्वन्तरिस्त्वेवमाह—
'लाक्षा पलङ्कषा राक्षा दीप्तिश्च कृमिजं जतु।
कृतघ्नानङ्गमाताच द्रुमव्याधिरलक्तकः' ॥ १॥ इति॥

१ * कालागुर्वगुरु २ स्यात्तु मङ्गल्या मल्लिगन्धि यत्।
३ यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥
बहुरूपोऽप्यथ वृकधूपकृत्रिमधूपकौ।
५ तुरुष्कः पिण्डकः † सिह्लो यावनोऽप्यथ पायसः ॥ १२८ ॥
श्रीवासो वृकधूपोऽपि ‡ श्रीवेष्टसरलद्रवौ।
७ मृगनाभिर्मृगमदः कस्तूरी च—

---

१ कालागुरु, अगुरु (+ अगरु। २ न), भा० दी० मतसे 'काला अगर' के २ नाम हैं। ('महे० मतसे 'वंशिकम्, ·····, ७ नाम 'अगर' के हैं') ॥

२ मङ्गल्या (स्त्री), वेलाके फूलके समान सुगन्ध देनेवाले अगर' का १ नाम है ॥

३ यक्षधूपः (+ धूपः), सर्जरसः, रालः (+ राला, स्त्री, अरालः), सर्वरसः, बहुरूपः (५ पु), 'राल,धूप' के ५ नाम हैं ॥

४ वृकधूपः, कृत्रिमधूपः (२ पु), 'अनेक सुगन्धित पदार्थोंको मिलाकर बनाये हुए धूप' के २ नाम हैं ॥

५ तुरुष्कः, पिण्डकः, सिह्लः (सिल्हः), यावनः (४पु), 'लोहबान'के ४नाम हैं॥

६ पायसः, श्रीवासः (+ श्रीः), वृकधूपः (+ वृकः), श्रीवेष्टः (+ श्रीवेष्टः), सरलद्रवः (५ पु), 'सरल देवदारुके गोंदसे बने हुए सुगन्धित द्रव्य-विशेष' के ५ नाम हैं ॥

७ मृगनाभिः (+ नाभिः §), मृगमदः (+ मृगः ‖ , मदः ¶ । २ पु), कस्तूरी (स्त्री), 'कस्तूरी' के ३ नाम हैं ॥

---

* 'कालागुर्वगुरु स्यात्तन्मङ्गल्या' इति पाठान्तरम्। अत्र पक्षे यन्मल्लिगन्धि अगुरु तत्तु 'मङ्गल्या' स्यादित्येव सम्बन्धो ज्ञेयः, तत्र मूलपाठ एव समीचीन इत्यवधेयम् ॥

† 'सिल्हो यावनोऽप्यथ' इति पाठान्तरम् ॥ ‡ 'श्रीपिष्टसरलद्रवौ' इति पाठान्तरम् ॥

§ 'मुख्यराट्क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे' ॥ १ ॥
इति रभसोक्तेः नाभिशब्दस्यापि पर्यायत्वमित्यवधेयम् ॥

‖ 'मृगनाभिर्मृगमदः मृगः कस्तूरिकापि च' इत्युक्तेर्मृग शब्दस्यापि पर्यायत्वमित्यवधेयम् ॥

¶ 'मदो रेतसि कस्तूर्यां गर्वे हर्षेमदानयोः' (मेदिनी पृ० ७९ श्लो० १२) इत्युक्तेः मदशब्दस्यापि पर्यायतेत्यवधेयम् ॥

१—अथ कोलकम् ॥ १२९ ॥

ककोलकं कोशफल२मथ कर्पूरमस्त्रियाम् ।
घनसारश्चन्द्रसंज्ञः * सिताभ्रो हिमवालुका ॥ १३० ॥
३ गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।
४ तैलपर्णिकगोशीर्षं हरिचन्दनमस्त्रियाम् ॥ १३१ ॥
५ तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं चा६थ जातीकोषजातीफले समे ॥ १३२ ॥

---

१ कोमलम् (+ कोरकम्), कक्कोलकम्, कोशफलम् (+ कोषफलम् । ३ न) 'कङ्कोल' के ३ नाम हैं ॥

२ कर्पूरम् (पु न), घनसारः, चन्द्रसंज्ञः (चन्द्रमाके पर्यायवाचक सब शब्द), सिताभ्रः (+ सिताभः । ३ पु), हिमवालुका (स्त्री), 'कपूर' के ५ नाम हैं ॥

३ गन्धसारः, मलयजः (२ पु), भद्रश्रीः (स्त्री), चन्दनः (पु न), 'मलयागिरि चन्दन' के ४ नाम हैं ॥

४ तैलपर्णिकम्, गोशीर्षम्, (२ न); हरिचन्दनम् (पु न), 'सफेद ठण्ढा चन्दन, कमलके समान गन्धवाले चन्दन और कपिल या पीले वर्णवाले चन्दन' का क्रमशः १—१ नाम है ॥

५ तिलपर्णी (स्त्री), पत्राङ्गम्, रञ्जनम्, रक्तचन्दनम्, कुचन्दनम् (४ न), 'लाल चन्दन' के ५ नाम हैं ॥

६ जातीकोषम् (+ जातिकोशम्, जातीकोषः, जातिः, कोषः †), जातीफलम् (+ फलम् ‡ । २ न)' 'जायफल' के २ नाम हैं ॥

---

* 'सिताभो हिमवालुका' इति पाठान्तरम् ॥

† '—कोशः कोष इवाण्डजे । कुड्मले चक्रके दिव्येऽर्बुदे योनिशिम्बयोः । जातीकोशेऽसिपिधाने—' (अने० संग्र० २।५४६—५४७), इति, '—अथ जनिपु जातिः सामान्यगात्रयोः ॥ मालत्यामामलक्यां च चुल्ल्यां कम्पिल्लजन्मनोः । जातीफले छन्दसि च' (अने० संग्र० २।१६८—१६९) इति हेमचन्द्राचार्योक्तेः जाति-कोष-कोशशब्दानां पर्यायतेत्यवधेयम् ॥

‡ 'फलं हेतुफले जातीफले फलकसस्ययोः' (अभि० चिन्ता० २।४९९) इति हेमचन्द्राचार्योक्त्या 'फल' शब्दस्यापि पर्यायत्वमित्यवधेयम् ॥

१ कर्पूरागुरुकस्तूरीकङ्कोलैर्यत्तदुद्भवः ।
२ गात्रानुलेपनी वर्त्तिर्वर्णकं स्याद्विलेपनम् ॥ १३३ ॥
३ चूर्णानि वासयोगाः स्युः भावितं वासितं त्रिषु ।
५ संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् ॥ १३४ ॥
६ माल्यं मालास्रजौ मूर्ध्नि—

---

१ * यत्तत्कर्दमः (पु), 'कपूर, अगर, कस्तूरी और कङ्कोल ; इन चारोंको बराबर-बराबर देकर बनाये हुए लेप-विशेष' का १ नाम है ॥

२ गात्रानुलेपनी, वर्त्तिः (२ स्त्री), वर्णकम्, विलेपनम् (२ न), 'लेप करनेके लिये पीसे या घिसे हुए गन्धद्रव्य-विशेष' के ४ नाम हैं। ('क्षी० स्वा० मत से दो-दो शब्द एकार्थक हैं †' ॥

३ चूर्णम् (न), वासयोगः (पु), 'कपड़े आदिको सुवासित करनेके योग्य चूर्ण किये हुए गन्धद्रव्य-विशेष' के २ नाम हैं ॥

४ भावितम्, वासितम् (२ त्रि), 'सुवासित कपड़ा आदि' के २ नाम हैं। ('क्षी० स्वा० मतसे गन्धद्रव्य अर्थात् इतर आदिसे सुगन्धित किये हुए कपड़े आदिको 'भावित' और केतकी, केवड़ा या गुलाब आदि से सुगन्धित किये हुए कपड़े आदिको 'वासित' कहते हैं') ॥

५ अधिवासनम् (न), 'गुलाबजल या सुगन्धित फूल आदिसे पान, तिल आदिको सुवासित करने' का १ नाम है ॥

६ माल्यम् (न), माला, स्रक् (= स्रज् । २ स्त्री), 'शिरसे धारण की हुई माला' के ३ नाम हैं। ('यहाँ 'मूर्ध्नि' शब्दके अविवक्षित होनेसे

---

* तदुक्तं व्याडिना—

'कर्पूरागुरुकस्तूरीकङ्कोलघुसृणानि च ।
एकीकृतमिदं सर्वं यत्तत्कर्दम इष्यते' ॥ १ ॥ इति ॥

धन्वन्तरिस्तु भिन्नमेवाह । तथा—

'कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनं तथा ।
महासुगन्धिसंयुक्तं नामतो यत्तत्कर्दमः ॥ १ ॥ इति ॥

† गात्रानुलेपनी वर्त्तिर्विगन्ध्यथ विलेपनम् ।
वर्णकश्चाथ निष्पित्तिः स्त्री कषायोऽङ्गरागके' ॥ १ ॥

इति रभसोक्तिमनुसृत्येदमित्यवधेयम् ॥

—१ केशमध्ये तु गर्भकः।
२ प्रभ्रष्टकं शिखालम्बि ३ पुरोन्यस्तं ललामकम्॥ १३५॥
४ प्रालम्बमृजुलम्बि स्यात् ५ कण्ठाद्वैकक्षिकं तु तत्।
यत्तिर्यक्क्षिप्तमुरसि ६ शिखास्वापीडशेखरौ॥ १३६॥
७ रचना * स्यात्परिस्यन्द ८ आभोगः परिपूर्णता।
९ उपधानं तूपबर्हः १० शय्यायां शयनीयवत्॥ १३७॥
शयनं ११ मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः।

'मालामात्र' के भी ये ३ नाम हैं')॥

१ गर्भकः (पु), 'केशके बीचमें लगायी हुई माला'का १ नाम है॥

२ प्रभ्रष्टकम् (न), 'शिखा या चोटीसे लटकती हुई माला'का १ नाम है॥

३ ललामकम् (न), 'ललाटपर धारण की हुई माला, मुण्डमाला' का १ नाम है॥

४ प्रालम्बम् (न), 'गलेमें सीधे लटकती हुई माला' का १ नाम है॥

५ वैकक्षिकम् (न), 'जनेऊकी तरह तिर्छी पहनी हुई माला'का १ नाम है॥

६ आपीडः, शेखरः (२ पु), 'शिखामें रक्खी हुई माला'के २ नाम हैं॥

७ रचना (स्त्री), परिस्यन्दः (+परिस्पन्दः। पु), 'माला आदि को बनाने (गूथने)' के २ नाम हैं॥

८ आभोगः (पु), परिपूर्णता (स्त्री), सेवा-शुश्रूषा आदि सब प्रकारके उपचारोंसे परिपूर्ण होने'के २ नाम हैं॥

९ उपधानम् (न), उपबर्हः (पु), 'तकिया' के २ नाम हैं॥

१० शय्या (स्त्री), शयनीयम्, शयनम् (२ न), 'शय्या, बिछौना' के ३ नाम हैं। ('भा० दी० मतसे 'तोसक आदि' के ये ३ नाम हैं')॥

११ मञ्चः, पर्यङ्कः, पल्यङ्कः (३ पु), खट्वा (स्त्री), 'पलँग, खटिआ आदि' के ४ नाम हैं। ('किसी २ के मतसे 'मञ्चः' यह १ नाम 'मचान या

---

* 'स्यात्परिस्पन्दः' इति पाठान्तरम्॥

१ गेन्दुकः कन्दुको २ दीपः प्रदीपः ३ पीठमासनम् ॥ १३८ ॥
४ समुद्गकः संपुटकः ५ प्रतिग्राहः पतद्ग्रहः ।
६ प्रसाधनी कङ्कतिका ७ पिष्टातः पटवासकः ॥ १३९ ॥
८ दर्पणे *मुकुरादर्शौ ९ व्यजनं तालवृन्तकम् ।
इति मनुष्यवर्गः ॥ ६ ॥

ऊंचे सिंहासन आदि' का और 'पर्यङ्कः, पल्यङ्कः' ये २ नाम 'पलँग, मसहरी आदि' के तथा 'खट्वा' यह एक नाम 'खटिया' का है') ॥

१ गेन्दुकः (+ गिन्दुकः, गेण्डुकः, गण्डूकः), कन्दुकः (२ पु), 'गेंद' के २ नाम हैं ॥

२ दीपः, प्रदीपः (+ स्नेहाशः, कज्जलध्वजः, दशेन्धनः, गृहमणिः, दोषातिलकः, शिखातरुः, दीपवृक्षः, ज्योत्स्नावृक्षः ; † ८ पु । २ पु) 'चिराग' के २ नाम हैं ॥

३ पीठम्, आसनम् (२ न), 'आसन' के २ नाम हैं ॥

४ समुद्गकः, संपुटकः (२ पु), 'डब्बा सम्पुट' के २ नाम हैं ॥

५ प्रतिग्राहः (वै० प्रतिग्रहः), पतद्ग्रहः (२ पु), 'उगलदान, पिकदान' के २ नाम हैं ॥

६ प्रसाधनी, कङ्कतिका (२ स्त्री), 'कङ्घी' के २ नाम हैं ॥

७ पिष्टातः, पटवासकः (२ पु), 'बुक्का' के २ नाम हैं ॥

८ दर्पणः, मुकुरः (+ मकुरः, मङ्कुरः), आदर्शः (+ आत्मदर्शः । ३ पु), 'शीशा-आइना' के ३ नाम हैं ॥

९ व्यजनम्, तालवृन्तकम् (+ तालवृन्तम् । २ न), 'पंखा' के २ नाम हैं ॥

इति मनुष्यवर्गः ॥ ६ ॥

---

* 'मकुरादर्शौ' इति पाठान्तरम् ॥

† तदुक्तं त्रिकाण्डशेषे—'—दीपस्तु स्नेहाशः कज्जलध्वजः ।
दशेन्धनो गृहमणिः दोषातिलक इत्यपि ॥ १ ॥
शिखातरुर्दीपवृक्षो ज्योत्स्नावृक्षोऽथ—' इति ॥

७. अथ ब्रह्मवर्गः।

१ सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः सन्तानो २ वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥
३ विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।
४ * राजवीजी राजवंश्यो ५ वीज्यस्तु कुलसंभवः ॥ २ ॥
६ † महाकुलकुलीनार्यसभ्यसज्जनसाधवः ।
७ ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥ ३ ॥
आश्रमोऽस्त्री—

---

७. अथ ब्रह्मवर्गः।

१ सन्ततिः (स्त्री), गोत्रम्, जननम्, कुलम् (३ न), अभिजनः, अन्वयः, वंशः, अन्ववायः, सन्तानः (५ पु), 'वंश, कुल, खान्दान' के ९ नाम हैं ॥

२ वर्णः (पु), 'ब्राह्मण, क्षत्रिय, वैश्य और शूद्र ये ४ ‡ 'वर्ण' हैं ॥

३ चातुर्वर्ण्यम् (न), 'ब्राह्मण आदि पूर्वोक्त चार वर्णोंके समुदाय' का १ नाम है ॥

४ राजवीजी (= राजवीजिन्), राजवंश्यः (२ पु), 'राजकुलमें उत्पन्न व्यक्ति' के २ नाम हैं ॥

५ वीज्यः, कुलसंभवः (२ पु), 'कुलमें उत्पन्न व्यक्ति' के २ नाम हैं ॥

६ महाकुलः (+ माहाकुलः), कुलीनः (+ कुल्यः, कौलेयकः), आर्यः, सभ्यः, सज्जनः, साधुः (४ पु), 'सज्जन, उत्तम कुलमें उत्पन्न व्यक्ति' के ६ नाम हैं ॥

७ ब्रह्मचारी (= ब्रह्मचारिन्), गृही (= गृहिन्), वानप्रस्थः, भिक्षुः (४ पु), ये चार 'आश्रम' शब्दवाच्य हैं अर्थात् आश्रमः (पु न), 'ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, संन्यासाश्रमः (४ पु न), ये ४ 'आश्रम' हैं ॥

---

* 'राजवीजी राजवंश्यो वीज्यस्तु' इति पाठान्तरम् ॥

† 'माहाकुलकुलीनार्य—' इति पाठान्तरम् ॥

‡ तदुक्तं याज्ञवल्क्येन—
'ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः'। इति याज्ञ० १।१० ॥

—१ द्विजात्यग्रजन्मभूदेववाडवाः ।
विप्रश्च ब्राह्मणोऽऽसौ षट्कर्मा यागादिभिर्वृतः ॥ ४ ॥
३ विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः ।
धीरो मनीषी * ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ॥ ५ ॥
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।
दूरदर्शी दीर्घदर्शी—

---

१ द्विजातिः (+द्विजः), † अग्रजन्मा (=अग्रजन्मन्), भूदेवः (+महीसुरः, भूसुरः,...), वाडवः, विप्रः, ब्राह्मणः (६ पु), 'ब्राह्मण' के ६ नाम हैं ॥

२ ‡ षट्कर्मा (=षट्कर्मन् , पु), 'यज्ञ करना, पढ़ना, दान देना, यज्ञ कराना, पढ़ाना और दान लेना; इन § ६ कर्मोंसे युक्त ब्राह्मण'का १ नाम है ॥

३ विद्वान् (=विद्वस्), विपश्चित्, दोषज्ञः, सन् (=सत्), सुधीः, कोविदः, बुधः, धीरः, मनीषी (=मनीषिन्), ज्ञः, प्राज्ञः (+प्रज्ञः), संख्यावान् (=संख्यावत्), पण्डितः, कविः, धीमान् (=धीमत्), सूरिः (+सूरी=सूरिन्), कृती (=कृतिन्), कृष्टिः, लब्धवर्णः, विचक्षणः, दूरदर्शी (=दूरदर्शिन् । +दूरदृक्=दूरदृश्), दीर्घदर्शी (=दीर्घदर्शिन् । २२ पु), 'विद्वान्' के २२ नाम हैं ॥

---

* 'ज्ञः प्रज्ञः' इति पाठान्तरम् ॥

† ब्राह्मणोऽस्य मुखमासीत्' इति श्रुतेरित्यवधेयम् ॥

‡ तदुक्तम्—'इज्याऽध्ययनदानानि याजनाध्यापनं तथा ।
प्रतिग्रहश्च तैर्युक्तः षट्कर्मा विप्र उच्यते' ॥ १ ॥ इति ॥

§ ब्राह्मणानां षट् कर्माण्याह मनुः—
'अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्' ॥ १ ॥ इति मनुः १।८८

—१ श्रोत्रियच्छान्दसौ समौ ॥ ६ ॥
२ * 'मीमांसको जैमिनीये ३ वेदान्ती ब्रह्मवादिनि (१६)
४ वैशेषिके स्यादौलूक्यः ५ सौगतः शून्यवादिनि (१७)
६ † नैयायिकस्त्वक्षपादः—

---

१ ‡ श्रोत्रियः, छान्दसः (२ पु), 'वेद पढ़नेवाले ब्राह्मण' के २ नाम हैं ॥

२ [मीमांसकः, जैमिनीयः (२ पु), 'मीमांसक' अर्थात् 'मीमांसा शास्त्रको जाननेवाले' के २ नाम हैं] ॥

३ [वेदान्ती (=वेदान्तिन्), ब्रह्मवादी (=ब्रह्मवादिन्। २ पु), 'वेदान्ती' अर्थात् 'वेदान्त शास्त्र जाननेवाले' के २ नाम हैं] ॥

४ [वैशेषिकः, औलूक्यः (२ पु), 'कणादिसम्मत द्रव्य आदि ('द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, अभाव') § 'सात पदार्थोंको माननेवाले' के २ नाम हैं] ॥

५ [सौगतः, शून्यवादी (=शून्यवादिन्। २ पु), 'संसारका कारण शून्य (कोई नहीं) है, इस सिद्धान्तको माननेवाले नास्तिक' के २ नाम हैं] ॥

६ [नैयायिकः, अक्षपादः (+आक्षपादः। २ पु), 'गौतमसम्मत प्रमाण आदि ('प्रमेय, संशय, प्रयोजन, दृष्टान्त, सिद्धान्त, अवयव, तर्क, निर्णय,

---

* 'मीमांसको.....साङ्ख्यकापिलौ' इत्येष क्षेपकांशः क्षी० स्वा० व्याख्याने समुपलभ्यत इत्यवधेयम् ॥

† 'नैयायिकस्त्वाक्षपादः' इति पाठः क्षी० स्वा० व्याख्योक्तः ॥

‡ तदुक्तं हेमाद्रिणा चतुर्वर्गचिन्तामणौ दानखण्डस्य तृतीयप्रकरणे—

'एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्' ॥ १ ॥

इति च० चिन्ता० पृ० २७ ॥

§ तथा चाह विश्वनाथः—

'द्रव्यं गुणस्तथा कर्म सामान्यं च विशेषकम्।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥ १ ॥

इति सिद्धा० मुक्ता० १।२ ॥

—१ स्यात्स्याद्वादिक आर्हकः (१८)
२ चार्वाकलौकायतिकौ ३ * सत्कार्ये साङ्ख्यकापिलौ (१९)
४ उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद् गुरुः।

वाद, जल्प, वितण्डा, हेत्वाभास, छल, जाति, निग्रहस्थान') † सोलह पदार्थोंको माननेवाले नैयायिक' के २ नाम हैं ॥

१ [स्याद्वादिकः, आर्हकः (+ आर्हतः । २ पु), 'मोक्ष है तो हो और नहीं है तो न हो इस सिद्धान्तको माननेवाले' के २ नाम हैं] ॥

२ [चार्वाकः, लौकायतिकः (२ पु), 'बौद्ध' अर्थात् 'बुद्धदेवके मतानुयायी' के २ नाम हैं] ॥

३ [साङ्ख्यः, कापिलः (२ पु), 'कपिलमुनिसम्मत सांख्यशास्त्रके सिद्धान्तको माननेवाले' के २ नाम हैं] ॥

४ ‡ उपाध्यायः, अध्यापकः (२ पु), 'उपाध्याय' अर्थात् 'वेदके एकदेशको या वेदाङ्गोंको वृत्तिके लिये पढ़ानेवाले' के २ नाम हैं ॥

५ § गुरुः (पु), 'गुरु' अर्थात् 'निषेकादि संस्कारको सविधि करके अन्नादिसे पालन करते हुए पढ़ानेवाले' का १ नाम है ॥

---

* 'सत्कार्यौ' इति पाठः क्षी० स्वा० व्याख्योक्तः ॥

† तदुक्तम्—'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति न्या० द० १ । १ ॥

‡ उपाध्यायलक्षणमुक्तं मनुना—

'एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते' ॥ १ ॥ इति मनुः २।१४१ ॥

गुरुलक्षणमुक्तं मनुना—

'निषेकादीनि कर्माणि यः करोति यथाविधि।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते' ॥ १ ॥ इति मनुः २।१४२ ॥

१ मन्त्रव्याख्याकृदाचार्य २ * आदेष्टा त्वध्वरे व्रती ॥ ७ ॥
यष्टा च यजमानश्च ३ स सोमवति दीक्षितः।
४ इज्याशीलो यायजूको ५ यज्वा तु विधिनेष्टवान् ॥ ८ ॥
६ † स गीर्पतीष्ट्या स्थपतिः ७ सोमपोथी तु सोमपाः।
८ सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ॥ ९ ॥

---

१ † आचार्यः (पु), 'आचार्य' अर्थात् 'मन्त्रोंकी व्याख्या करनेवाले या शिष्यका यज्ञोपवीत संस्कारकर कल्प और रहस्यके सहित वेदको पढ़ानेवाले ब्राह्मण' का १ नाम है ॥

२ व्रती (= व्रतिन्), यष्टा (यष्टृ), यजमानः (३ पु), 'यजमान' अर्थात् 'यज्ञ करनेवाले' के ३ नाम हैं ॥

३ दीक्षितः (पु), 'सोमवत्' (अग्निष्टोमादि) यज्ञमें ऋत्विजोंको आदेश देनेवाले यजमान' का १ नाम है ॥

४ इज्याशीलः (यायजूकः (२ पु), 'बारबार यज्ञ करनेवाले' के २ नाम है ॥

५ यज्वा (= यज्वन् पु), 'विधिपूर्वक यज्ञ किये हुए' का १ नाम है ॥

६ स्थपतिः (पु), 'बृहस्पतिके मन्त्रसे यज्ञ करनेवाले' का १ नाम है ॥

७ सोमपीथी (= सोमपीथिन् । + सोमपीती = सोमपीतिन्), सोमपाः (+ सोमपः । २ पु), 'सोमयज्ञ करनेवाले' के २ नाम हैं ॥

८ सर्ववेदाः (= सर्ववेदस् पु), 'यज्ञमें सर्वस्व दक्षिणा देनेवाले' का १ नाम है। ('विश्वजित् आदि यज्ञोंमें सर्वस्व दक्षिणा दी जाती है, जैसे—

---

* 'आदिष्टी इति पाठान्तरम् ॥

† 'स तु गीष्पतीष्ट्या स्थपतिः सोमपीती तु सोमपाः' इति पाठान्तरम् ॥

‡ आचार्यलक्षणमुक्तं मनुना—

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' ॥ १ ॥ इति मनुः २।१४० ॥

१ अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
लब्धानुज्ञः समावृत्तः ३ सुत्वा त्वभिषवे कृते ॥ १० ॥
४ छात्रान्तेवासिनौ शिष्ये ५ शैक्षाः प्राथमकल्पिकाः ।
६ एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥ ११ ॥
७ सतीर्थ्यास्त्वेकगुरव८श्चितवानग्निमग्निचित् ।

---

* रघुने विश्वजित् यज्ञकर सर्वस्व दक्षिणा दी थी। विश्वजित् आदि यज्ञका यह नाम है, यह भा० दी० का मत चिन्त्य है') ॥

१ † अनूचानः (पु), 'व्याकरण आदि ६ अङ्गोंके सहित वेदको पढ़नेवाले' का १ नाम है ॥

२ समावृत्तः (पु), 'गुरुकी आज्ञा पाकर गृहस्थाश्रममें रहनेके लिये गुरुकुलसे लौटे हुए ब्रह्मचारी' का १ नाम है ॥

३ सुत्वा (सुत्वन् पु), 'यज्ञके अन्तमें अवभृथनामक स्नान किये हुए' का १ नाम है ॥

४ छात्रः, अन्तेवासी (= अन्तेवासिन्), शिष्यः (३ पु), 'शिष्य, छात्र' के ३ नाम हैं ॥

५ शैक्षाः, प्राथमकल्पिकाः (२ पु । बहुवचन अविवक्षित होनेसे एकवचन भी होता है ।) 'अध्ययनको प्रथम आरम्भ किये हुए ब्रह्मचारी आदि' के २ नाम हैं ॥

६ सब्रह्मचारिणः (= सब्रह्मचारिन्, पु) 'आपसमें समान वेद, समान व्रत और समान आचारवाले ब्रह्मचारियों' का १ नाम है ॥

७ सतीर्थ्यः, एकगुरुः (भा० दी० । २), 'सहपाठी, एक गुरुसे पढ़नेवाले' के २ नाम हैं ॥

८ अग्निचित् (पु), 'अग्निहोत्री' का १ नाम है ॥

---

* यथाऽऽह रघुवंशे कविकुलकमलदिवाकरः कालिदासः—
'स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम्' इति रघुवंशः ४। ८६ ॥

† तदुक्तं हेमाद्रिणा चतुर्वर्गचिन्तामणौ दानखण्डस्य परिभाषाख्ये तृतीयप्रकरणे—
'वेदवेदाङ्गतत्त्वज्ञः शुद्धात्मा पापवर्जितः ।
शेषं श्रोत्रियवत्प्राप्तः सोऽनूचान इति स्मृतः' ॥ १ ॥
इति चतु० चिन्ता० दा० खं० पृ० २८ ॥

१ पारम्पर्योपदेशे स्यादैतिह्यमितिह्यव्ययम् ॥ १२ ॥
२ उपज्ञा ज्ञानमाद्यं स्यात् ३ ज्ञात्वारम्भ उपक्रमः ।
४ यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥
५ पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
६ एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ १४ ॥

---

१ ऐतिह्यम् (न), इतिह (अव्य०), परम्परागत उपदेश' के २ नाम हैं ॥

२ उपज्ञा (स्त्री), 'गुरूपदेशके विना उत्पन्न सर्वप्रथम ज्ञान' का १ नाम है । ('जैसे—वाल्मीकिकी उपज्ञा 'रामायण' है और पाणिनि की उपज्ञा 'अष्टाध्यायी सूत्रपाठ' है') ॥

३ उपक्रमः (पु), 'गुरु आदिसे ज्ञान प्राप्तकर आरम्भ करने'- का १ नाम है ॥

४ यज्ञः, सवः, अध्वरः, यागः, सप्ततन्तुः, मखः, क्रतुः (७ पु), 'यज्ञ' के ७ नाम हैं ॥

५ पाठः (पु), 'वेदादिपाठ करने'को 'ब्रह्मयज्ञः' (पु); होमः (पु), 'हवन करने'को देवयज्ञः (पु); अतिथीनां सपर्या (स्त्री),' अन्न, जलपान, शय्यादि देकर अतिथियोंके सत्कार करने'को नृयज्ञः' (पु); तर्पणम् (न), 'अन्न, जल, पिण्डदान, श्राद्ध, आदिसे पितरोंको सन्तुष्ट करने'को पितृयज्ञः (पु); बलिः (पु), 'बलिवैश्वदेव अर्थात् काकादिको बलि देने या बलिदान करने'को भूतयज्ञः (पु), कहते हैं ॥

६ ये (ब्रह्मयज्ञ, देवयज्ञ, अतिथियज्ञ, पितृयज्ञ और भूतयज्ञ) ५ महायज्ञः (पु), अर्थात् * 'पञ्चमहायज्ञ' हैं ॥

---

* तदुक्तं मनुना—अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ १ ॥
पञ्चैतान्यो महायज्ञान्—' इति मनुः ३।७०—७१ ॥

१ समज्या परिषद्गोष्ठी सभासमितिसंसदः।
आस्थानी क्लीवमास्थानं स्त्रीनपुंसकयोः सदः ॥ १५ ॥
२ प्राग्वंशः प्राग्घविर्गेहात् ३ सदस्यो विधिदर्शनः।
४ सभासदः सभास्तारः सभ्याः सामाजिकाश्च ते ॥ १६ ॥
५ अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात्।

---

१ समज्या, परिषत् (= परिषद्। + पर्षत् = पर्षद्), गोष्ठी, सभा, समितिः, संसत् (= संसद्), आस्थानी (७ स्त्री), आस्थानम् (न), सदः (= सदस् न स्त्री), * 'सभा' के ९ नाम हैं। ('सम्प्रति सभा शब्दका सामान्यतः व्यवहार किया जाता है') ॥

२ प्राग्वंशः (पु), 'हवनशालाके पूर्व तरफ यजमानको बैठनेके लिये बनाये हुए स्थान या गृह-विशेष'का १ नाम है ॥

३ सदस्यः (पु), 'यज्ञमें न्यूनाधिक विधिको देखनेवाले ऋत्विग्-विशेष' का १ नाम है ॥

४ सभासत् (= सभासद्), सभास्तारः, सभ्यः, सामाजिकः (४ पु), 'सभासद' के ४ नाम हैं ॥

५ अध्वर्युः, उद्गाता (= उद्गातृ), होता (= होतृ। ३ पु), 'यजुर्वेद, सामवेद और ऋग्वेद जाननेवाले' का क्रमशः १—१ नाम है ॥

महर्षियाज्ञवल्क्येनाप्युक्तम्—
'बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः। भूतपित्रमरब्रह्ममनुष्याणां महामखाः' ॥ १ ॥
इति याज्ञ० स्मृतिः १।१०२ ॥

यथा वा—'पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः' ॥ १ ॥ इति ॥

* यथाऽऽहुः सभालक्षणं मनुः—
'यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः।
राजश्चाधिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः' ॥ १ ॥ इति मनुः ८।११॥

१ आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥ १७ ॥
२ वेदिः परिष्कृता भूमिः ३ समे स्थण्डिलचत्वरे।
४ चषालो यूपकटकः ५ कुम्बा क्षुगहना वृतिः ॥ १८ ॥
६ यूपाग्रं तर्म ७ निर्मन्थ्यदारुणि त्वरणिर्द्वयोः।
८ * दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥

१ † आग्नीध्र, ऋत्विक् (= ऋत्विज्), याजकः (३ पु), यज्ञ करनेवाला यजमान धन आदिसे जिसका वरण करे उन आग्नीध्र आदि (ब्रह्मा, उद्गाता, होता, अध्वर्यु,.....१७ ‡) यज्ञ करानेवाले ब्राह्मणों' के ३ नाम हैं ॥

२ वेदिः (+ वेदी। स्त्री), 'यज्ञके लिये डमरु-तुल्याकार बनाई हुई या साफ की हुई भूमि' का १ नाम है ॥

३ स्थण्डिलम्, चत्वरम् (२ न), 'यज्ञके लिये साफ किये गये स्थान-विशेष' के २ नाम हैं। ('सम्प्रति चत्वर शब्दको चबूतरा के अर्थमें भी प्रयुक्त किया जाता है'

४ चषालः, यूपकटकः (भा० दी०। २), 'यज्ञ-स्तम्भके ऊपर चलयाकार (गोल) बनाये हुए काष्ठ-विशेष' के २ नाम हैं ॥

५ क्रुम्बा (स्त्री), 'चण्डाल, अन्त्यज आदि यज्ञको न देख सकें, इस निमित्तसे यज्ञभूमिके चारों तरफ बनाये हुए घेरे का १ नाम है ॥

६ यूपाग्रम्, तर्म (= तर्मन्। २ न) 'यज्ञ-स्तम्भके ऊपरी भाग' के २ नाम हैं ॥

७ अरणिः (पु स्त्री) 'जिसको परस्परमें रगड़कर यज्ञार्थ अग्नि निकाली जाय, उस काष्ठ-विशेष' का १ नाम है ॥

८ दक्षिणाग्निः, गार्हपत्यः, आहवनीयः (३ पु), ये ३ § 'अग्निके भेद' हैं॥

* 'क्वचित्तु त्रयाणां द्वन्द्वः पठ्यत' इति भा० दी० ॥

† तथा हि कात्यः-'वृताः कुर्वन्ति ये यज्ञमृत्विजस्ते—' इति ॥

‡ 'आदिशब्दात् 'पोतृप्रशास्तृग्रावणाच्छंस्यच्छावाग्नीध्रसुब्रह्ममैत्रावरुणप्रतिप्रस्थातृप्रतिहर्तृनेष्टृनेतृसुब्रह्मण्याः' इत्थं सप्तदशर्त्विजः' इति क्षी० स्वा० ॥

§ ब्राह्मणसर्वस्वे हलायुधेन पञ्चाग्नय उक्तास्तथा हि—

'आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च।
अन्वाहार्यो गार्हपत्य इत्येते पञ्च वह्नयः ॥ १ ॥ इति ॥

१ अग्नित्रयमिदं त्रेता २ प्रणीतः संस्कृतोऽनलः।
३ समूह्यः परिचाय्योपचाय्याग्नौ प्रयोगिणः ॥ २० ॥
४ यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते।
तस्मिन्नानाय्योऽथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥
६ ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने।
७ गायत्रीप्रमुखं छन्दो—

---

१ त्रेता (स्त्री), 'दक्षिणाग्नि, गार्हपत्याग्नि और आहवनीयाग्नि इन तीन अग्नियोंके समुदाय' का १ नाम है ॥

२ प्रणीतः (पु), 'मन्त्रसे संस्कृत अग्नि' का १ नाम है ॥

३ समूह्यः, परिचाय्यः, उपचाय्यः (३ पु), 'यज्ञ-सम्बन्धी अग्निका स्थान-विशेष, या स्थान-विशेषकी अग्नि' के ३ नाम हैं ॥

४ आनाय्यः (पु), 'गार्हपत्यनामक अग्निसे लाकर मन्त्रसे संस्कृत दक्षिणाग्नि' का १ नाम है ॥

५ अग्नायी, स्वाहा, हुतभुक्प्रिया (+अग्निप्रिया । ३ स्त्री), 'अग्निकी स्त्री, स्वाहा' के ३ नाम हैं ॥

६ सामिधेनी, धाय्या (२ स्त्री), 'अग्निमें समिधा (लकड़ी) छोड़कर अग्निको जलानेमें प्रयोग किये जानेवाले मन्त्र' के २ नाम हैं ॥

७ छन्दः (=छन्दस्, न), 'गायत्री आदि छन्द' का १ नाम है। वक्ष्यमाण १, अत्युक्ता २, मध्या ३, प्रतिष्ठा ४, सुप्रतिष्ठा ५, गायत्री ६, उष्णिक् ७, अनुष्टुप् ८, बृहती ९, पङ्क्ति १०, त्रिष्टुप् ११, जगती १२, अतिजगती १३, शक्करी १४, अतिशक्करी १५, अष्टि १६, अत्यष्टि १७, धृति १८, अतिधृति १९, कृति २०, प्रकृति २१, आकृति २२, विकृति २३, संस्कृति २४, अतिकृति २५, उत्कृति २६, ये छब्बीस * छन्द होते हैं। किसी २ ने 'गायत्री……उत्कृति' तक २१ ही छन्द माने हैं') ॥

---

* वृत्तरत्नाकरे केदारेण छन्दोलक्षणमुक्तम्। तथा हि—
'आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः।
पृथक् छन्दो भवेत्पादैर्यावत्षड्विंशतिं गतम्' ॥ १ ॥ इति वृ० र० १।१७

१ हव्यपाके चरुः पुमान् ॥ २२ ॥
२ आमिक्षा सा श्रृतोष्णे या क्षीरे स्याद्दधियोगतः।
३ * ध्रुवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा ॥ २३ ॥
४ पृषदाज्यं सदध्याज्ये ५ परमान्नं तु पायसम्।
६ हव्यऽकव्ये † दैवपित्र्ये अन्ने—

---

१ चरुः (पु), 'अग्निमें हवन किये जानेवाले अन्न' का १ नाम है ॥

२ आमिक्षा (+ आमीक्षा मु० । स्त्री), 'औंटे हुए गर्म दूधमें दही छोड़नेपर उत्पन्न विकार-विशेष या छाँछ' का १ नाम है ॥

३ ध्रुवित्रम् (+ धवित्रम् । न), 'यज्ञ में आग सुलगाने के वास्ते मृगचर्मके बने हुए पंखे' का १ नाम है ॥

४ पृषदाज्यम् (+ पृषातक्रम् । न), 'दही मिले हुए घी' का १ नाम है ॥

५ परमान्नम्, पायसम् (२ न), 'खीर, हविष्य' के २ नाम हैं ॥

६ हव्यम् (न), 'देवान्न' अर्थात् 'हवनके द्वारा देवताओंके उद्देश्यसे दिये जानेवाले अन्न-विशेष' का १ नाम है ॥

७ कव्यम् (न), 'पित्र्यान्न' अर्थात् 'ब्राह्मण-भोजनादिके द्वारा पितरोंके उद्देश्यसे दिये जानेवाले अन्न-विशेष' का १ नाम है ॥

तेषां नामानि च तैनैवोक्तानि। तथा हि—

'उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ १ ॥
त्रिष्टुप् च जगती चैव तथाऽतिजगती मता।
शक्करी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते ॥ २ ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिरात्कृतिः।
विकृतिः संस्कृतिश्चापि तथाऽतिकृतिरुत्कृतिः ॥ ३ ॥

इति वृत्तरत्नाकरः १।१९-२१ ॥

गङ्गादासश्छन्दोमञ्जर्यान्तु 'उक्ता-अत्युक्ता-शक्करी'णां स्थाने 'उक्था' अत्युक्था, शक्करी' इत्येवं नामान्याह ॥

* 'धवित्रं—' इति पाठान्तरम् ॥ † 'दैवपित्र' इति पाठान्तरम् ॥

—१ पात्रं स्रुवादिकम् ॥ २४ ॥

२ ध्रुवोपभृज्जुहूश्चर्ना तु स्रुवो भेदाः *स्रुचः स्त्रियः।
४ उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २५ ॥
५ परम्पराकं † शमनं प्रोक्षणं च वधार्थकम्।
६ याच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हते ॥ २६ ॥
७ साह्नाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतम्।
८ दीक्षान्तोऽवभृथो यज्ञे १० तत्कर्मार्हं तु यज्ञियम् ॥ २७ ॥

---

१ पात्रम् (न), 'स्रुवा आदि (चमस, प्रोक्षणी, प्रणीता, सूर्प, व्यजन, उलूखल, मुसल, ग्रह,·····) वर्तन' का १ नाम है ॥

२ ध्रुवा, उपभृत्, जुहूः (३ स्त्री), ये ३ 'स्रुवाके भेद' हैं ॥

३ +स्रुवः (पु), स्रुक् (= स्रुच्। +स्रुः। स्त्री), 'स्रुवा' अर्थात् 'अग्निमें घी डालनेवाले काष्ठनिर्मित यज्ञ-पात्र-विशेष' के २ नाम हैं ॥

४ उपाकृतः (पु), 'वेदमन्त्रसे अभिमन्त्रितकर यज्ञमें मारेहुए पशु' का १ नाम है ॥

५ परम्पराकम्, शमनम् (+शसनम्, ससनम्), प्रोक्षणम् (३ न), 'यज्ञमें पशुको मारने' के ३ नाम हैं ॥

६ प्रमीतः, उपसंपन्नः, प्रोक्षितः (३ त्रि), 'यज्ञमें मारे हुए पशु' के ३ नाम हैं ॥

७ साह्नाय्यम्, हविः (= हविष्, भा० दी०। २ न), 'हवन करने योग्य हविष्य आदि पदार्थ' के २ नाम हैं ॥

८ हुतम् (भा० दी०), वषट्कृतम् (२ त्रि), 'अग्निमें हवन किये हुए हविष्य आदि पदार्थ' के २ नाम हैं ॥

९ अवभृथः (पु), 'यज्ञके अन्तमें किये जानेवाले यज्ञ समाप्ति-सूचक स्नान-विशेष' का १ नाम हैं ॥

१० यज्ञियम् (त्रि), 'यज्ञके योग्य पदार्थ' का १ नाम है। ('जैसे—'ब्राह्मण, हविष्यादि अन्न, स्थान·····') ॥

---

* 'स्रुवः' इति पाठान्तरम् ॥

† 'शसनम्' इति युक्तः पाठः इति क्षी० स्वा०। 'ससनम्' इत्यन्य इति भा० दी०॥

त्रिष्वथ क्रतुकर्मेष्टं २ पूर्तं खातादि कर्म यत्।
३ अमृतं ४ विघसो यज्ञशेषभोजनशेषयोः ॥ २८ ॥
५ त्यागो विहापितं दानमुत्सर्जनविसर्जने।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥ २९ ॥
प्रादेशनं निर्वपणमपवर्जनमंहतिः।

---

१ * इष्टम् (न), 'यज्ञ कार्य, दान देने' का १ नाम है ॥

२ † पूर्तम् (न), 'बावली, कुआँ, तालाब आदि खुदवाने तथा औषधालय, देवालय आदि बनवाने' का १ नाम है ॥

३ ‡ अमृतम् (न), 'यज्ञसे बचे हुए हविष्य' का १ नाम है ॥

४ § विघसः (पु), 'ब्राह्मण, अतिथि आदिके भोजनके बाद बचे हुए अन्न' का १ नाम है ॥

५ त्यागः (पु), विहापितम्, दानम्, उत्सर्जनम् (+ उत्सर्गः, पु), विसर्जनम्, विश्राणनम्, वितरणम्, स्पर्शनम्, प्रतिपादनम्, प्रादेशनम्, निर्वपणम्, अपवर्जनम् (११ न) अंहतिः (स्त्री), 'दान देने' के १३ नाम हैं ॥

---

* हेमाद्रौ दानखण्डे शङ्खोक्तमिष्टलक्षणं यथा—
'अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम्। आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥ १ ॥
एकाग्निकादौ यत्कर्म त्रेतायां यच्च हूयते। अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते' ॥ २ ॥
इति हेमा० दा० खं० पृ० २१ ॥

† हेमाद्रौ दानखण्डे शङ्खोक्तं पूर्तलक्षणम्—
'रोगिणां परिचर्या च पूर्तमित्यभिधीयते'। इति
व्यासोक्तम्—'पुष्करिण्यस्तथा वाप्यो देवतायतनानि च।
अन्नदानमथारामाः पूर्तमित्यभिधीयते ॥ १ ॥ इति।
नारदोक्तम्—
'ग्रहोपरागे यद्दानं सूर्यसंक्रमणेषु च।
द्वादश्यादौ तु यद्दानं तदेतत्पूर्तमुच्यते' ॥१॥ इति हेमा० दा० खं० पृ० २१ ॥

‡ § अमृतविघसयोर्लक्षणं मनुराह। तथा—
'विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः।
विघसो भुक्तशेषं तु यज्ञशेषं तथामृतम्' ॥१॥ इति मनुः ३। २८५ ॥

१ मृतार्थं * तदहे दानं त्रिषु स्यादौर्ध्वदेहिकम् ॥ ३० ॥
२ पितृदानं निवापः स्यात् ३ श्राद्धं तत्कर्म शास्त्रतः ।
४ अन्वाहार्यं मासिकेऽह्नोऽष्टमोद्भः कुतपोऽस्त्रियाम् ॥ ३१ ॥
६ पर्येषणा परीष्टिश्चाऽन्वेषणा च गवेषणा ।

---

१ और्ध्वदेहिकम् (+ और्ध्वदैहिकम् । न) 'मरे हुएके उद्देश्यसे मरनेके दिनसे एकादशाह तक दिये हुए पिण्ड-दान आदि' का १ नाम है ॥

२ पितृदानम् (न), निवापः (पु), 'सपिण्डीकरणके बाद पितरोंके उद्देश्यसे दिये हुए पिण्ड-दान' का १ नाम है ॥

३ श्राद्धम् (न), 'श्राद्ध' अर्थात् 'पितरोंके उद्देश्यसे शास्त्रानुसार किये जानेवाले पिण्डदान आदि कार्य' का १ नाम है ॥

४ † अन्वाहार्यम् (न), मासिकः (पु, भा० दी०); 'अमावस्याको किये जानेवाले मासिक श्राद्ध' के २ नाम हैं ॥

५ ‡ कुतपः (+ कुतुपः । पु न), 'दिनका आठवाँ हिस्सा, संगम मुहूर्त (१४ घटी) के उपरान्त तथा नवम मुहूर्त (१७–१८ घटी) के मध्यका श्राद्ध योग्य समय-विशेष' का १ नाम है ॥

६ पर्येषणा, परीष्टिः (२ स्त्री), मह० मतसे 'श्राद्धमें ब्राह्मणोंकी सेवा करने' के २ नाम हैं ॥

७ अन्वेषणा, गवेषणा (२ स्त्री), मह० मतसे 'धर्मान्वेषण करने' के २ नाम हैं । ('भा० दी० मतसे 'पर्येषणा;·····' ४ नाम 'धर्मादिके खोज करने' के हैं') ॥

---

* 'तदहर्दानं त्रिषु स्यादौर्ध्वदेहिकम्' इति पाठान्तरम् ॥

† आह मनुः—'पितृयज्ञं तु निर्वर्त्य विप्रश्चेन्दुक्षयेऽग्निमान् ।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥ १ ॥
पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः ।
तच्चामिषेण कर्तव्यं प्रशस्तेन प्रयत्नतः' ॥ २॥ इति मनुः २।१२२–१२३ ॥

‡ कुतपलक्षणं यथा—
'मुहूर्त्तात्सप्तमादूर्ध्वं मुहूर्त्तान्नवमादधः । स कालः कुतपो ज्ञेयः·····' इति ॥
'दिवसस्याष्टमे भागे मन्दीभवति भास्करे ।
स कालः कुतपो यत्र पितृभ्यो दत्तमक्षयम्' ॥ १ ॥ इति स्मृतिरिति । क्षी०स्वा०॥

१ सनिस्त्वध्येषणा २*याच्ञाऽभिशस्तिर्याचनाऽर्थना ॥ ३२ ॥
३ षट् तु त्रिष्वष्टर्घ्यमर्घार्थे ५ पाद्यं पादाय वारिणि ।
६ क्रमादातिथ्याऽतिथेये अतिथ्यर्थेऽथ साधुनि ॥ ३३ ॥
८ स्युरावेशिक आगन्तुरतिथिर्नो गृहागते ।
९ † 'प्राघूर्णिकः प्राघुणकश्च—

---

१ सनिः, अध्येषणा (२ स्त्री), 'गुरु, पिता, माता आदि श्रेष्ठ जनोंकी सेवा करने और प्रार्थनापूर्वक गुरु आदि श्रेष्ठ जनोंको किसी काममें प्रवृत्त करने' के २ नाम हैं ॥

२ याच्ञा, अभिशस्तिः (+ अभिषस्तिः), याचना, अर्थना (४ स्त्री), 'याचना करने, माँगने' के ४ नाम हैं ॥

३ यहां से ६ शब्द त्रिलिङ्ग हैं ॥

४ अर्घ्यम् (त्रि), 'अर्घ (अर्घ्य देने) के लिये जल' का १ नाम है ॥

५ पाद्यम् (त्रि), 'पाद्य (पैर धोने) के लिये जल' का १ नाम है ॥

६ आतिथ्यम् (त्रि), 'अतिथियों के निमित्त वस्तु' का १ नाम है ॥

७ आतिथेयम् (त्रि), 'अतिथियोंके विषयमें सज्जन (अच्छा व्यवहार करनेवाले)' का १ नाम है ॥

८ आवेशिकः, आगन्तुः (२ त्रि), ‡ अतिथिः (+ अतिथिः पु; अतिथा स्त्री), 'अतिथि' के ३ नाम हैं ॥

९ [प्राघूर्णिकः, प्राघुणकः (+ आवेशिकः । २ पु), 'अभ्यागत' के २ नाम हैं] ॥

---

* 'याच्ञाऽभिषस्ति—' इति पाठान्तरम् ॥

† 'प्राघूर्णिकः.....गौरवम्' इत्यंशः क्षी० स्वा० व्याख्यायामुपलभ्यत इत्यवधेयम् ॥

‡ अतिथिलक्षणान्युच्यन्ते—

'तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना ।
सोऽतिथिः सर्वभूतानां शेषानभ्यागतान्विदुः' ॥ १ ॥ इति यमः ॥

क्वचित्तु—'शेषः प्राघुणिकः स्मृतः' इति तुरीयपादः ॥

'दूराच्चोपगतं श्रान्तं वैश्वदेव उपस्थितम् ।
अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः' ॥ १ ॥ इति व्यासश्च ॥

'अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः' इति याज्ञ० १।१११ ॥

—१ अभ्युत्थानं तु गौरवम्' (२०)
२ पूजा नमस्याऽपचितिः सपर्याऽर्चार्हणाः समाः ॥ ३४ ॥
३ परिचर्यास्या तु शुश्रूषा * परिचर्याप्युपासना।
४ व्रज्याऽटाट्या पर्यटनं ५ चर्या त्वीर्यापथे स्थितिः ॥ ३५ ॥
६ उपस्पर्शस्त्वाचमनऽमथ मौनमभाषणम्।
८ † 'प्राचेतसश्चादिकविः स्यान्मैत्रावरुणिश्च सः (२१)
‡ वाल्मीकश्चाऽथ गाधेयो विश्वामित्रश्च कौशिकः (२२)

---

१ [अभ्युत्थानम् , गौरवम् (२ न), 'अभ्युत्थान' अर्थात् 'बड़े लोगोंके आनेपर उठकर अगवानी करने' के २ नाम हैं] ॥

२ पूजा, नमस्या, अपचितिः, सपर्या, अर्चा, अर्हणा (६ स्त्री), 'पूजा' के ६ नाम हैं ॥

३ परिचर्या, शुश्रूषा, परिचर्या (+ उपचर्या, परेष्टिः), उपासना (+ न। ४ स्त्री), 'शुश्रूषा करने' के ४ नाम हैं ॥

४ व्रज्या, अटाट्या (+ अटा, अट्या, महे० । २ स्त्री), पर्यटनम् (+ भ्रमणम् । न), 'घूमने' के ३ नाम हैं ॥

५ चर्या (+ ईर्या मुनि० । स्त्री), 'ध्यान, मौन इत्यादि योगमार्गोंमें स्थित होने' का १ नाम है ॥

६ उपस्पर्शः (पु), आचमनम् (न), 'आचमन करने' के २ नाम हैं ॥

७ मौनम् , अभाषणम् (२ न), 'मौन या चुप रहने' के २ नाम हैं ॥

८ [प्राचेतसः, आदिकविः, मैत्रावरुणिः (+ मैत्रावरुणः), वाल्मीकः (+ वाल्मीकिः, वल्मीकः, वल्मिकः । ४ पु), 'वाल्मीकि मुनि' के ४ नाम हैं] ॥

९ [गाधेयः, विश्वामित्रः, कौशिकः (+ कौषिकः । ३ पु), 'विश्वामित्र मुनि' के ३ नाम हैं] ॥

---

* 'परिचर्याप्युपासनम्' इति पाठान्तरम्।

† 'प्राचेतसः.....सुतः' अयं क्षेपकांशः क्षी० स्वा० व्याख्याने समुपलभ्यते ॥

‡ 'वाल्मीकिश्चाथ' इति पाठान्तरम् ॥

१ व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः' (२३)
२ आनुपूर्वी स्त्रियां * वावृत्परिपाटी अनुक्रमः ॥ ३६ ॥
पर्यायश्चाऽतिपातस्तु स्यात्पर्यय उपात्ययः ।
४ नियमो व्रतमस्त्री ५ तच्चोपवासादि पुण्यकम् ॥ ३७ ॥
६ † औपवस्तं तूपवासो ७ विवेकः पृथगात्मता ।
८ स्याद् ब्रह्मवर्चसं वृत्ताध्ययनर्धिः ९ रथाञ्जलिः ॥ ३८ ॥
पाठे ब्रह्माञ्जलिः—

---

१ [व्यासः, द्वैपायनः, पाराशर्यः, सत्यवतीसुतः (४ पु), 'व्यास मुनि' के ४ नाम हैं ॥

२ आनुपूर्वी (स्त्री । + आनुपूर्व्यम्), आवृत्, परिपाटी (+ परिपाटिः । २ स्त्री), अनुक्रमः, पर्यायः (२ पु), 'क्रम' अर्थात् 'सिलसिला' के ५ नाम हैं ॥

३ अतिपातः, पर्ययः, उपात्ययः (३ पु), 'बिना क्रम' अर्थात् 'बेसिलसिला' के ३ नाम हैं ॥

४ नियमः (पु) व्रतम् (न पु), नियम या व्रत' के २ नाम हैं ॥

५ पुण्यकम् (न), 'उपवासादि (सान्तपन, कृच्छ्र, अतिकृच्छ्र, प्राजापत्य, चान्द्रायण आदि) शास्त्र-विहित व्रत' का १ नाम है ॥

६ औपवस्तम् (+ औपवस्त्रम्, उपवस्तम् । न), उपवासः (+ उपोषितम्, उपोषणम् । पु), 'उपवास, उपास' के २ नाम हैं ॥

७ विवेकः (पु), पृथगात्मता (भा० दी०, स्त्री), 'प्रकृति और पुरुषके भेद-ज्ञान या भावोंके पृथक् स्वरूप-ज्ञान' के २ नाम हैं ॥

८ ब्रह्मवर्चसम् (न), वृत्ताध्ययनर्द्धिः (भा० दी०, स्त्री), 'ब्रह्मवर्चस' अर्थात् 'सदाचार और वेदाभ्यासकी वृद्धि या सम्पत्ति' के २ नाम हैं ॥

९ ‡ ब्रह्माञ्जलिः (पु), 'वेदादि पढ़नेके पहले और अन्तमें

---

* 'वावृत्परिपाटिरनुक्रमः' इति पाठान्तरम् ॥ † 'औपवस्त्रम्' इति पाठान्तरम् ॥

‡ यथाऽऽह मनुः—'ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥ १ ॥
व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः' ॥ २ ॥ इति मनुः २।७१–७२ ।

—१ पाठे * विप्रुषो ब्रह्मविन्दवः ।
२ ध्यानयोगासने ब्रह्मासनं ३ कल्पे विधिक्रमौ ॥ ३९ ॥
४ मुख्यः स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः ।
६ संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ॥ ४० ॥
७ समे तु पादग्रहणमभिवादनमित्युभे ।

उत्तर हाथसे (दहने हाथसे दहिना और बायें हाथसे बायाँ) गुरुके पैरको छूकर प्रणाम करने' का १ नाम है ॥

१ ब्रह्मविन्दुः (पु), 'वेदादि पढ़नेके समय मुखसे निकले हुए जल-कण (थूकमिश्रित जलकी छोटी २ बूँद)' का १ नाम है ॥

२ ब्रह्मासनम् (न), 'ध्यान और योगके आसन' का १ नाम है ॥

३ कल्पः, विधिः, क्रमः (३ पु), 'शास्त्रोक्त विधि' के ३ नाम हैं ॥

४ † मुख्यः (पु), 'शास्त्रोक्त प्रधान विधि' का १ नाम है ॥

५ ‡ अनुकल्पः (पु), 'शास्त्रोक्त गौण (अप्रधान, अभाव-पक्षीय) विधि' का १ नाम है ॥

६ उपाकरणम् (न), 'संस्कारके साथ २ वेदको ग्रहण करने' का १ नाम है ॥

७ पादग्रहणम्, अभिवादनम् (२ न), § 'अपने नामको कहते हुए प्रणाम करने' के २ नाम हैं ॥

---

* 'विप्लुषो ब्रह्मविन्दवः' इति पाठान्तरम् ॥

† यथा 'व्रीहिभिर्यजेत' इति श्रुतौ व्रीहिश्रवणात् 'व्रीहिभिरेव यजेत नान्येन द्रव्येण' इति श्रुत्यर्थात् व्रीहिकरणमुपादानं प्रधानमतो व्रीहिभिर्यागकरणं मुख्यः कल्पः ॥

‡ व्रीहिलाभाभावे नित्यनैमित्तिकादिविधिक्षयो मा भूदित्यतो '
इति श्रुत्या नीवारेणापि यागो विधीयत इति नीवारकरणकमुपादानमप्रधानमतो 'नीवारेण यागकरणमनुकल्पः ॥

§ तदाह मनुः—

'अभिवादात्परं विप्रो ज्यायांसमभिवादयेत् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्' ॥ १ ॥ इति मनुः २।१२२ ॥

१ भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥ ४१ ॥
२ तपस्वी तापसः पारिकाङ्क्षी ३ वाचंयमो मुनिः।
४ तपः क्लेशसहो दान्तो ५ वर्णिनो ब्रह्मचारिणः ॥ ४२ ॥
६ ऋषयः सत्यवचसः—

---

१ भिक्षुः, परिव्राट् (= परिव्राज् । + परिव्राजकः), कर्मन्दी (= कर्मन्दिन्), पाराशरी (= पाराशरिन्), मस्करी (= मस्करिन् । ५ पु), 'संन्यासी' के ५ नाम हैं ॥

२ तपस्वी (= तपस्विन्), तापसः, पारिकाङ्क्षी (= पारिकाङ्क्षिन् । ३ पु), 'तपस्वी' के ३ नाम हैं ॥

३ वाचंयमः, मुनिः (२ पु), 'मुनि' के २ नाम हैं। ('किसी किसी के मतसे ये २ नाम भी 'संन्यासी' के ही पर्याय हैं) ॥

४ तपःक्लेशसहः (भा० दी०), दान्तः (२ पु), 'तपस्या के क्लेशको सहनेवाले' के २ नाम हैं ॥

५ वर्णी (= वर्णिन्), * ब्रह्मचारी (= ब्रह्मचारिन्), 'ब्रह्मचारी' के २ नाम हैं ॥

६ ऋषिः, सत्यवचाः (= सत्यवचस् । २ पु), 'ऋषि-सामान्य' के २ नाम हैं। (श्रुतर्षि १, काण्डर्षि २, परमर्षि ३, महर्षि ४, राजर्षि ५, ब्रह्मर्षि ६ और देवर्षि ७; ये † सात 'ऋषियोंके भेद' हैं ॥

'आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः' ॥१॥ इति वचनेन यद्यपि श्रेयस्कामुकस्यात्मनामग्रहणं निषिद्धन्तथापि जन्मद्वादशे दिने तत्पित्रादिकृतनाक्षत्रनामपरम्। विस्तरतस्तु वैयाकरणलघुमञ्जूषायां स्मृत्यन्तरे वा प्रपञ्चितमत्र विस्तरभयान्न लिखितमिति तत एवावधार्यम् ॥

* तदुक्तम्—'कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा।
सर्वथा मैथुनत्यागः ब्रह्मचर्यं तदुच्यते' ॥ १ ॥
एतत्कर्मसम्पन्नो 'ब्रह्मचारी' भवति।

† ऋषयः सप्तविधाः। ते यथा—श्रुतर्षिः पवित्रकथादिश्रवणकर्त्ता १, काण्डर्षिः वेदानां प्रधानकाण्डस्योपदेष्टा २, परमर्षिः मुनिमेलप्रभृतयः ३, महर्षिः व्यासादयः ४, राजर्षिः विश्वामित्रादयः ५, ब्रह्मर्षिः वसिष्ठादयः ६, देवर्षिः नारदादयः ७ इति ॥

—१ * स्नातकस्त्वाप्लुतो व्रती ।
२ ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ ४३ ॥
३ यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ।
स्थाण्डिलश्च ४ थ विरजस्तमसः स्युर्द्व्यातिगाः ॥ ४४ ॥
५ पवित्रः प्रयतः पूतः ६ † पाखण्डाः सर्वलिङ्गिनः ।

---

१ स्नातकः, आप्लुतः, (+ आप्लवव्रती = आप्लवव्रतिन्, आप्लुतव्रती = आप्लुतव्रतिन् । पु), 'स्नातक' अर्थात् 'वेदव्रतको समाप्त होनेपर गुरुकी आज्ञासे समाप्ति-सूचक स्नान-विशेष (समावर्तन) किये हुए ब्रह्मचारी' के २ नाम हैं। ('स्नातकके ३ भेद हैं—वेदको समाप्तकर और व्रतको विना समाप्त किये समावर्तन संस्कारवाला विद्यास्नातक १, व्रतको समाप्तकर और वेदको विना समाप्त किये समावर्तन संस्कारवाला व्रतस्नातक २, तथा वेद और विद्या दोनों को समाप्तकर समावर्तन संस्कारवाला विद्याव्रतस्नातक ३ ‡) ॥

२ निर्जितेन्द्रियग्रामः (भा० दी०), यती (= यतिन्), यतिः (२ पु), 'जितेन्द्रिय' के ३ नाम हैं ॥

३ स्थण्डिलशायी (= स्थण्डिलशायिन्), स्थाण्डिलः (२ पु), 'स्थण्डिल (विना साफ सुथरा की हुई अकृत्रिम भूमि) पर सोनेवाले व्रती' के २ नाम हैं ॥

४ विरजस्तमाः (= विरजस्तमस्), द्व्यातिगः (२ पु), 'सत्त्वगुणी' के २ नाम हैं ॥

५ पवित्रः, प्रयतः, पूतः (३ पु), 'पवित्र' के ३ नाम हैं ॥

६ § पाखण्डः (+ पाषण्डः), सर्वलिङ्गी (= सर्वलिङ्गिन् । २ पु), 'पाखण्डी' अर्थात् 'दुष्ट शास्त्रमे स्थित बौद्ध आदि २ पणक (संन्यासी)' के २ नाम हैं ॥

---

* 'स्नातकस्त्वाप्लवव्रती' इति 'स्नातकस्त्वाप्लुतव्रती' इति च पाठान्तरे ॥

+ 'पाषण्डाः' इति पाठान्तरम् ॥

‡ एतत्सर्वं याज्ञवल्क्यस्मृतावाचाराध्याये (१।१३०) मिताक्षरायां सुस्पष्टम् ॥

§ तदुक्तम्—'पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते ।
तं खण्डयन्ति ते यस्मात्पाखण्डास्तेन हेतुना' ॥ १ ॥ इति ॥

१ पालाशो दण्ड आषाढो व्रते २ राम्मस्तु वैणवः ॥ ४५ ॥
३ अस्त्री कमण्डलुः कुण्डी ४ व्रतिनामासनं * वृषी।
५ अजिनं चर्म कृत्तिः स्त्री ६ भैक्षं भिक्षाकदम्बकम् ॥ ४६ ॥
७ स्वाध्यायः स्याज्जपः—

---

१ † आषाढः (आपाढकः, आपाडः। पु), 'ब्रह्मचर्यावस्थामें ब्राह्मणसे धारण किये हुए पलाशके दण्ड' का १ नाम है ॥

२ राम्मः (पु), 'ब्रह्मचर्यावस्थामें धारण किये हुए बाँसके दण्ड' का १ नाम है ॥

३ कमण्डलुः (पु न), कुण्डी (स्त्री), 'कमण्डलु' के २ नाम हैं ॥

४ वृषी (+ वृसी। स्त्री), 'ब्रह्मचारी आदि व्रतियोंके आसन' का १ नाम है ॥

५ अजिनम्, चर्म (= चर्मन्। २ न), कृत्तिः (स्त्री), 'मृगादिके चमड़े' के ३ नाम हैं ॥

६ भैक्षम् (त्रि), 'भिक्षामें मिले हुए पदार्थ' का १ नाम है ॥

७ स्वाध्यायः, जपः (२ पु), 'नियमसे वेदादिके अभ्यास करने' के २ नाम हैं। 'जप ३ प्रकारका होता है—वाचिक १, उपांशु २ और मानस ३। इनको उत्तरोत्तर श्रेष्ठ ‡ कहा गया है') ॥

---

* 'वृसी' इति पाठान्तरम् ॥

† 'ब्राह्मणो बैल्वपालाशौ क्षत्रियो वटखादिरौ।
पैलवौदुम्बरौ वैश्या दण्डानर्हन्ति धर्मतः' ॥ १ ॥
इति मनुः २।४५॥

‡ हारीतोक्ता जपभेदास्तेषां लक्षणानि चात्र प्रदर्श्यन्ते—
'.....त्रिविधो जपयज्ञः स्यात्तस्य तत्त्वं निबोधत ॥
वाचिकश्चाप्युपांशुश्च मानसश्च त्रिधाकृतिः। त्रयाणामपि यज्ञानां श्रेष्ठः स्यादुत्तरोत्तरः ॥
यदुच्चनीचोच्चरितैः शब्दैः स्पष्टपदाक्षरैः। मन्त्रमुच्चारयेद्वाचा जपयज्ञस्तु वाचिकः ॥

—१ सुत्याऽभिषवः सवनं च सा।
२ सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् ॥ ४७ ॥
३ दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक्।
४ शरीरसाधनापेक्षं नित्यं यत् कर्म तद्यमः ॥ ४८ ॥
५ नियमस्तु स तत् कर्म नित्यमागन्तुसाधनम्।

---

१ सुत्या (स्त्री), अभिषवः (पु), सवनम् (न), 'सोमलता (यज्ञौषधि) को कूटने' के ३ नाम हैं ॥

२ अघमर्षणम् (त्रि), 'सब पापोंको नाश करनेवाले जप' (ऋचा आदि)' का १ नाम है ॥

३ दर्शः, पौर्णमासः (२ पु), 'अमावास्या और पूर्णमाको होनेवाले यज्ञ' का क्रमशः १—१ नाम है ॥

४ यमः (पु), जीवनभर शरीरसे करने योग्य संयम' का १ नाम है। ('अहिंसा १, सत्य २, अस्तेय (किसीकी कोई वस्तु विना दिये या पूछे न लेना) ३, ब्रह्मचर्य (*आठ प्रकारके मैथुनका त्याग) ४ और अपरिग्रह (हिंसादि अनेक दोषोंको देखकर दान नहीं लेना ५) ये पाँच यम † हैं') ॥

५ नियमः (पु), 'नियम' अर्थात् 'जो कार्य जीवन पर्यन्त नहीं हो सके किन्तु विशेष २ समयपर किया जाय उस कार्य' का १ नाम है। ('शौच अर्थात्

शनैरुच्चारयेन्मन्त्रं किञ्चिदोष्ठौ प्रचालयेत्। किञ्चिच्छ्रवणयोग्यः स्यात्स उपांशुर्जपः स्मृतः ॥ धिया पदाक्षरश्रेण्या अवर्णमपदाक्षरम्। शब्दार्थचिन्तनाभ्यां तु तदुक्तं मानसं स्मृतम्' ॥
इति हारीतस्मृतिः ४।४०-४४

* अष्टाङ्गमैथुनलक्षणं यथा—
'स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ १ ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः'। इति ॥

† 'तदुक्तं भगवत्पतञ्जलिना—'तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' इति यो० सू० २।३० ॥

१ 'क्षौरं तु भद्राकरणं मुण्डनं वपनं त्रिषु' (२४)
२ उपवीतं ब्रह्मसूत्रं प्रोच्यते दक्षिणे करे ॥ ४६ ॥
३ प्राचीनावीतमन्यस्मिन् ४ निवीतं कण्ठलम्बितम् ।

मिट्टी जल आदिसे बाहरी और पञ्चगव्य-पान आदिसे भीतरी पवित्रता १, सन्तोष २, तप (चान्द्रायण, कृच्छ्र, सान्तपन आदि व्रत) ३, स्वाध्याय (वेदादिका अध्ययन) ४, ईश्वरप्रणिधान (परमेश्वरकी पूजा आदि) ५, 'ये पाँच नियम' * हैं') ॥

३ [क्षौरम्, भद्राकरणम्, मुण्डनम् (३ न), वपनम् (त्रि), 'मुण्डन कराने' के ४ नाम हैं] ॥

२ उपवीतम्, ब्रह्मसूत्रम् (मा० दी० । × यज्ञसूत्रम् २ न) 'बायें कन्धेके ऊपरसे दाहिने तरफ नीचेकी ओर लटकते हुए जनेऊ' के २ नाम हैं । ('उपवीत जनेऊको धारण करनेवालेका † उपवीती (= उपवीतिन् पु), यह १ नाम है') ॥

३ प्राचीनावीतम् (न), 'दाहिने कन्धेके ऊपरसे बायीं तरफ नीचेको लटकते हुए जनेऊ' का १ नाम है । ('प्राचीनावीत जनेऊको धारण करने वालेका ‡ प्राचीनावीती (= प्राचीनावीतिन् पु) यह १ नाम है') ॥

४ निवीतम् (न) 'मालाकी तरह गर्दनसे सीधे नीचेकी ओर लटकते हुए जनेऊ' का १ नाम है । ('निवीत जनेऊको धारण करनेवाले का § निवीती (= निवीतिन् पु) यह १ नाम है') ॥

---

* तदुक्तं भगवत्पतञ्जलिना—'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' इति यो० सू० २। ३२ ॥

† ‡ § उपवीति-प्राचीनावीति-निवीतिनां लक्षणमाह मनुस्तथथा—

'उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने' ॥ १ ॥ मनुः २।६३ ॥

छन्दोगपरिशिष्टे च—

'ब्रह्मसूत्रेऽत्र सव्येंऽसे स्थिते यज्ञोपवीतिता ।
प्राचीनावीतिताऽसव्ये कण्ठस्थे तु निवीतिता' ॥ १ ॥ इति ॥

१ अङ्गुल्यग्रे तीर्थं दैवं २ स्वल्पाङ्गुल्योर्मूले कायम् ॥ ५० ॥
३ मध्येऽङ्गुष्ठाङ्गुल्योः * पित्र्यं ४ मूले त्वङ्गुष्ठस्य ब्राह्मम् ।
५ स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ॥ ५१ ॥
६ देवभूयादिकं तद्वत् ७ कृच्छ्रं सान्तपनादिकम् ।
८ संन्यासवत्यनशने पुमान् प्रायोऽथ वीरहा ॥ ५२ ॥

नष्टाग्निः—

---

१ दैवम् (न), † 'देवतीर्थ' अर्थात् 'हाथकी अङ्गुलियोंके आगेवाले भाग'का १ नाम है ॥

२ कायम् (न), ‡ 'कायतीर्थ' अर्थात् 'हाथकी कनिष्ठा अङ्गुलीके नीचेवाले भाग' का १ नाम है ॥

३ पित्र्यम् (+ पैत्र्यम्, पैत्रम् । न), § 'पितृतीर्थ' अर्थात् 'हाथके अँगूठे और तर्जनी अङ्गुलीके बीचवाले भाग' का १ नाम है ॥

४ ब्राह्मम् (न), ‖ 'ब्रह्मतीर्थ' अर्थात् 'हाथके अँगूठेके मूलभाग' का १ नाम है ॥

५ ब्रह्मभूयम्, ब्रह्मत्वम्, ब्रह्मसायुज्यम् (न), 'मोक्ष' अर्थात् 'ब्रह्ममें लीन हो जाने' के ३ नाम हैं ॥

६ देवभूयम् (न), आदि (देवत्वम्, देवसायुज्यम् ; २ न), 'देवतामें लीन हो जाने' के २ नाम हैं ॥

७ ¶ कृच्छ्रम् (न) 'सान्तपन आदि (चान्द्रायण, पराक और प्राजापत्य आदि) व्रत' का १ नाम है ॥

८ प्रायः (पु), 'संन्यास-पूर्वक भोजनको छोड़ने' का १ नाम है ॥

९ वीरहा (=वीरहन् । + विरहा=विरहन्), नष्टाग्निः (२ पु), 'प्रमादसे जिस अग्निहोत्रीकी आग बुझ गयी हो उस अग्निहोत्री' के २ नाम हैं

---

* 'पैत्र्यम्' इति पाठान्तरम् ॥

† ‡ § ‖ ब्राह्म-काय-दैव-पित्र्य-तीर्थानां लक्षणान्याह मनुः । तथा हि—

'अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते ।
कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः' ॥ १ ॥ इति मनुः २।५९॥

¶ भेदपुरःसरकृच्छ्रभेदास्तद्विधिश्च याज्ञवल्क्यस्मृतौ (३।३१५—३२५), मनुस्मृतौ ११।२११—२२५) च द्रष्टव्याः ॥

—१ कुहना लोभान्मिथ्येर्यापथकल्पना ।
२ व्रात्यः संस्कारहीनः स्याद्दस्वाध्यायो निराकृतिः ॥ ५३ ॥
४ धर्मध्वजी लिङ्गवृत्तिरवकीर्णो क्षतव्रतः ।
६ सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ ५४ ॥
अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ।
७ परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ॥ ५५ ॥

---

१ कुहना (स्त्री), 'दम्भसे ध्यान-मौनादि धारण करने, धनलाभसे मिथ्या धर्माचरण करने' का १ नाम है ॥

२ * व्रात्यः, संस्कारहीनः (भा० दी० । २ पु), 'यथोचित समयपर यज्ञोपवीत संस्कारसे हीन द्विजाति (ब्राह्मण, क्षत्रिय और वैश्य)' के २ नाम हैं ॥ ब्राह्मण, क्षत्रिय तथा वैश्यका गर्भाधानसे क्रमशः १६, २२ और २४ वर्षकी अवस्थातक यज्ञोपवीत नहीं होने पर उन्हें 'व्रात्य' कहते हैं) ॥

३ अस्वाध्यायः (भा० दी०), निराकृतिः (२ पु), 'वेदको नहीं पढ़नेवाले' के २ नाम हैं । ('व्रात्यः,.....' ४ नाम एकार्थक हैं, यह भी कई एक आचार्योंका मत है") ॥

४ धर्मध्वजी (= धर्मध्वजिन्), लिङ्गवृत्तिः (२ पु), 'भिक्षा आदि मिलनेके लिये जटा-भस्मादि धारणकर झूठा साधु बनने' के २ नाम हैं ॥

५ अवकीर्णी (= अवकीर्णिन्), क्षतव्रतः (भा० दी० । २ पु), 'नियमसे चलनेवाला ब्रह्मचर्यादि व्रत जिसका बीच ही में भङ्ग हो गया हो उस ब्रह्मचारी आदि व्रती' के २ नाम हैं ॥

६ अभिनिर्मुक्तः, अभ्युदितः (२ पु), 'जिसके सोते रहनेपर सूर्योदय हो और जिसके सोते रहने पर सूर्यास्त हो उस'का क्रमशः १-१ नाम है ॥

७ परिवेत्ता (=परिवेत्तृ, पु), 'बड़े भाईके अविवाहित (बिना ब्याह किये हुए) रहनेपर विवाहित (ब्याह किये हुए) छोटे भाई' का १ नाम है ॥

---

* व्रात्यलक्षणमाह मनुस्तद्यथा—
'आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते ।
आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥ १ ॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥ २ ॥ इति मनुः २।३८—३९

१ परिवित्तिस्तु तज्ज्यायान् २ विवाहोपयमौ समौ।
तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ ५६ ॥
३ * व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम्।
४ त्रिवर्गो धर्मकामार्थैः५श्चतुर्वर्गः समोक्षकैः ॥ ५७ ॥
६ सबलैस्तैश्चतुर्भद्रं ७ जन्याः स्निग्धा वरस्य ये।

इति ब्रह्मवर्गः ॥ ७ ॥

---

१ † परिवित्तिः (पु), 'जिसका छोटा भाई विवाहित हो उस अविवाहित बड़े भाई' का १ नाम है ॥

विवाहः, उपयमः, परिणयः, उद्वाहः, उपयामः (५ पु), पणिपीडनम् (+ पाणिग्रहणम्, करपीडनम्, ... । न), 'विवाह' के ६ नाम हैं ॥

३ व्यवायः, ग्राम्यधर्मः (२ पु), मैथुनम्, निधुवनम्, रतम् (३ न), 'मैथुन' अर्थात् 'स्त्रीके साथ सम्भोग करने'के ५ नाम हैं ॥

४ त्रिवर्गः (पु), 'अर्थ, धर्म और कामके समुदाय' का १ नाम है ॥

५ चतुर्वर्गः (पु), 'अर्थ, धर्म, काम और मोक्षके समुदाय' का १ नाम है ॥

६ चतुर्भद्रम् (न), 'सुदृढ़ अर्थ, धर्म, काम और मोक्षके समुदाय' का १ नाम है ॥

७ जन्यः (पु), 'समान अवस्थावाले वर (दुल्हा) के प्रेमी या वधूकी पालकी ढोनेवाले' का १ नाम है ॥

इति ब्रह्मवर्गः ॥ ७ ॥

---

* 'व्यवायो ग्राम्यधर्मश्च रतं निधुवनं च सा' इति केचित्पठन्ति इति महेश्वरः ॥

† परिवेत्तृपरिवित्त्योर्लक्षणं यथा—
'येऽग्रजेष्वकृतश्रेषु कुर्वते दारसंग्रहम्। ईदारते परिवेत्तारः परिवित्तिस्तु पूर्वजः ॥१॥ इति ॥

८. अथ क्षत्रियवर्गः ।

१ मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।
२ राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ १ ॥
३ राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ।
४ चक्रवर्ती सार्वभौमो नृपः—

---

८ अथ क्षत्रियवर्गः ।

१ मूर्द्धाभिषिक्तः (+ मूर्द्धावसिक्तः), राजन्यः, * बाहुजः, क्षत्रियः, विराट (= विराज् । ५ पु), 'क्षत्रिय' के ५ नाम हैं ॥

२ राजा (=राजन्), राट् (= राज्), पार्थिवः, क्ष्माभृत् (+ क्ष्माभुक् = क्ष्माभुज्, महीभुक् = महीभुज्, ·····), नृपः, भूपः (+ महीपः, भूपतिः, भूपालः, महीपतिः, महीपालः·····), महीक्षित् (+ अधिपः, नराधिपः, नरेशः, ····· । ७ पु), 'राजा' के ७ नाम हैं ॥

३ अधीश्वरः (+ अप्रतिरथः । पु), 'सब तरफके राजाओंको वशमें करनेवाले राजा'का १ नाम है ॥

४ चक्रवर्ती (= चक्रवर्तिन्), सार्वभौमः (२ पु), 'चक्रवर्ती राजा' अर्थात् 'समुद्र-पर्यन्त पृथ्वीकी रक्षा करनेवाले राजा' के २ नाम हैं । ('१ भरत, २ सगर, ३ मघवा, ४ सनत्कुमार, ५ शान्ति, ६ कुन्थु, ७ अर (ये तीनों जिन थे), ८ कार्तवीर्य, ९ पद्म, १० हरिषेण, ११ जय और १२ ब्रह्मदत्त, ये † बारह राजा भारतवर्षमें चक्रवर्ती हुए हैं, वे सब इक्ष्वाकु वंशमें उत्पन्न थे') ॥

---

* 'ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः—' इति श्रुतेः ॥

† तदुक्तं हेमचन्द्राचार्यैः—

'चक्रवर्ती सार्वभौमस्ते तु द्वादश भारते ॥
आर्षभिर्भरतस्तत्र सगरस्तु सुमित्रभूः । मघवा विजयिरथाश्वसेननृपनन्दनः ॥
सनत्कुमारोऽथ शान्तिः कुन्थुररो जिना अपि । सुभूमस्तु कार्तवीर्यः पद्मः पद्मोत्तरात्मजः ॥
हरिषेणो हरिसुतो जयो विजयनन्दनः । ब्रह्मसूनुर्ब्रह्मदत्तः सर्वेऽप्येक्ष्वाकुवंशजाः' ॥
[अभि० चिन्ता० ३।३५५–३५८ ॥

—१ अन्यो मण्डलेश्वरः ॥ २ ॥

२ येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः।
शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकम् ॥ ३ ॥

४ राजन्यकं च नृपतित्वत्रियाणां गणे क्रमात्।

५ मन्त्री धीसचिवोऽमात्यो६ऽन्ये कर्मसचिवास्ततः ॥ ४ ॥

---

१ मण्डलेश्वरः (पु), 'मण्डल (इसके * बारह प्रकृति अर्थात् भेद होते हैं) या देशको शासन करनेवाले राजा' का १ नाम है ॥

२ सम्राट् (= सम्राज्, पु) भा० दी० मतसे 'जिसने राजसूय यज्ञ किया हो, मण्डल (इसकी बारह प्रकृतियां होती हैं) का स्वामी हो और सब राजाओंको जीतकर अपने वशमें कर लिया हो उस राजा' का और किसी २ के मतसे पूर्वोक्त १-१ गुणोंसे भी युक्त राजा'का १ नाम है ॥

३ राजकम् (न), 'राजसमूह' का १ नाम है ॥

४ राजन्यकम् (न), 'क्षत्रियोंके समुदाय' का १ नाम है ॥

५ मन्त्री (= मन्त्रिन्), धीसचिवः, अमात्यः (+ सामवायिकः। ३ पु) 'मन्त्री' अर्थात् 'बुद्धिविषयक सहायता देनेवाले मन्त्री' के ३ नाम हैं ॥

६ कर्मसचिवः (पु) 'प्रत्येक काममें सहायता देनेवाले मन्त्री' का १ नाम है ॥

---

* मण्डलस्य द्वादश प्रकृतयो भवन्ति। ता यथा—१ विजेतुमभ्युद्यतो विजिगीषुः २ सहज-कृत्रिम-स्वभूम्यनन्तरक्षिविधोऽरिः, ३ असंहतयोरविजिगीष्वोर्निग्रहे समर्थो मध्यमः, ४ अरिविजिगीषुमध्यमानामसंहतानां निग्रहे समर्थ उदासीनः, ५ विजिगीषुमित्रम्, ६ अरिमित्रम्, ७ विजिगीषुमित्रमित्रम्, ८ अरिमित्रमित्रम्, ९ पार्ष्णिग्राहः, १० आक्रन्दः, ११ पार्ष्णिग्राहासारः, १२ आक्रन्दासार इति। सविस्तरमेतद्विवरणं वीरमित्रोदयस्य राजनीतिप्रकाशे द्वादशराजमण्डलप्रकरणस्य ३२० तमे पृष्ठे द्रष्टव्यम् ॥

एत एव द्वादश राजमण्डलभेदाः क्षीरस्वामिभिरुक्तास्तथा हि—

'अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम्।
तथाऽरिमित्रमित्रञ्च विजिगीषोः पुरः स्मृताः ॥ १ ॥
पार्ष्णिग्राहस्तथाऽऽक्रन्द आसारश्च तयोः पृथक्।
मध्यमोऽप्युदासीन इति द्वादश राजकम्' ॥ २ ॥ इति ॥

१ महामात्राः प्रधानानि २ पुरोधास्तु पुरोहितः ।
३ द्रष्टरि व्यवहाराणां प्राड्विपाकात्तदर्शकौ ॥ ५ ॥

---

१ महामात्रः (पु), प्रधानम् (न । + पु), 'प्रधान मन्त्री, राजाके खास सलाहकार' के २ नाम हैं । ('किसी २ के मतसे 'कर्मसचिवः' आदि ३ नाम 'काममें सहायता देनेवाले मन्त्री' के ही हैं') ॥

२ पुरोधाः (= पुरोधस्), पुरोहितः (+ सौवस्तिकः । २ पु) 'पुरोहित' के २ नाम हैं ॥

३ * प्राड्विपाकः, अक्षदर्शकः (+ आक्षदर्शकः, अक्षपटलिकः । २ पु), 'व्यवहार (मुकदमे) को देखनेवाले' अर्थात् 'न्यायाधीश' के २ नाम हैं । ('व्यवहारके † प्रधान अट्ठारह भेद होते हैं')

---

* नानामतेन प्राड्विपाकलक्षणान्युच्यन्ते—

'विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः ।
विचारयति येनासौ प्राड्विपाकस्ततः स्मृतः' ॥ १ ॥ इति ॥

क्वचित्—'ससभ्यस्तत्प्रयत्नतः' इत्येवं द्वितीयः पादः ॥

अन्यच्च—'विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
नयपूर्वं प्रभाषते प्राड्विपाकस्ततः स्मृतः' ॥ २ ॥ इति ॥

† मनुरष्टादश व्यवहारानाह—

'तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म च ॥ १ ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥ २ ॥
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके ।
स्तेयं च साहसं चैव स्त्रीसङ्ग्रहणमेव च ॥ ३ ॥
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च ।
पदान्यष्टादशैतानि व्यवहारस्थितौ विदुः' ॥ ४ ॥

इति मनुः ८।४–७ ॥

'एषामेव प्रभेदोऽन्यः शतमष्टोत्तरं भवेत् ।
क्रियाभेदान्मनुष्याणां शतशाखं निगद्यते' ॥ १ ॥

इति नारदोक्त्याऽस्यानेकधा भेदास्ते इह विस्तरभयान्नोच्यन्ते ॥

१ * प्रतीहारो द्वारपालद्वास्थद्वास्थितदर्शकाः।
२ रक्षिवर्गस्त्वनीकस्थो३ऽध्यक्षाधिकृतौ समौ ॥ ६ ॥
४ स्थायुकोऽधिकृतो ग्रामे ५ गोपो ग्रामेषु भूरिषु।
६ †भौरिकः कनकाध्यक्षो ७ रूप्याध्यक्षस्तु नैष्किकः ॥ ७ ॥
८ अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः।
९ सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ८ ॥
१० ‡ शण्डो घर्षवरस्तुल्यौ—

---

१ प्रतीहारः (+ प्रतिहारः), द्वारपालः, द्वास्थः (+ द्वाःस्थः), द्वास्थितः (+ द्वाःस्थितः), दर्शकः (+ द्वास्थितदर्शकः, द्वास्थोपस्थितदर्शकः, दौवारिकः। ५ पु), 'द्वारपाल, ड्योढ़ीदार' के ५ नाम हैं ॥

२ रक्षिवर्गः, अनीकस्थः (२ पु), 'राज आदिके अङ्गरक्षक' के २ नाम हैं ॥

३ अध्यक्षः, अधिकृतः (२ पु), 'अध्यक्ष' के २ नाम हैं ॥

४ स्थायुकः (पु), 'एक ग्रामके अध्यक्ष' का १ नाम है ॥

५ गोपः (पु), 'बहुत ग्रामोंके अध्यक्ष' का १ नाम है ॥

६ भौरिकः (+ हैरिकः), कनकाध्यक्षः (२ पु), 'सुवर्णके अध्यक्ष' के २ नाम हैं ॥

७ रूप्याध्यक्षः, नैष्किकः (२ पु), 'टकसाल' (रुपया आदि सिक्का ढालनेके कारखाने) के अध्यक्ष' के २ नाम हैं ॥

८ अन्तर्वंशिकः (+ अन्तर्वंशिकः। पु), 'रनिवासमें नियुक्त पुरुष' का १ नाम है ॥

९ सौविदल्ल, कञ्चुकी (= कञ्चुकिन्), स्थापत्यः, सौविदः (४ पु), कञ्चुकी' अर्थात् 'राजाओंके पासमें या रनिवासमें बाहरी रक्षाके लिये बेंतकी पतली छड़ी लिये हुए आने-जानेवाले वृद्ध पुरुष'के ४ नाम हैं ॥

१० शण्डः (+ षण्ढः), § वर्षवरः (२ पु) 'नपुंसक, जनखा' के २ नाम हैं ॥

---

* प्रतिहारो द्वारपालो द्वास्थो (स्थितदर्शकः' इति पाठान्तरम् ॥
† 'हैरिकः' इति पाठान्तरम् ॥ 'षण्ढो' इति पाठान्तरम् ॥
§ वर्षवरलक्षणं यथा—

—१ सेवकार्थ्यनुजोविनः ।
२ विषयानन्तरो राजा शत्रुश्चेर्मित्रमतः परम् ॥ ९ ॥
४ उदासीनः परतरः ५ पार्ष्णिग्राहस्तु पृष्ठतः ।
६ रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥ १० ॥
द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः ।
अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ ११ ॥
७ वयस्यः स्निग्धः सवया ८ अथ मित्रं सखा सुहृत् ।

---

१ सेवकः, अर्थी (= अर्थिन्), अनुजीवी (= अनुजीविन् । + अनुचरः । ३ पु), 'सेवक, नौकर' के ३ नाम हैं ॥

२ शत्रुः (पु), 'अपने देश (राज्य) के समीपवाले देशके राजा' का १ नाम है ॥

३ मित्रम् (न), 'पूर्वोक्तसे भिन्न राजा' का १ नाम है ॥

४ उदासीनः (पु), 'उदासीन' अर्थात् 'पूर्वोक्त शत्रु और मित्रके लक्षणसे भिन्न राजा' का १ नाम है ॥

५ पार्ष्णिग्राहः (पु), 'राजाके युद्धादि-यात्रामें पीछेसे किलेपर चढ़ाई करनेवाले या योद्धाके पीछेसे रक्षा करनेवाले राजा' का १ नाम है ॥

६ रिपुः, वैरी (=वैरिन् ,) सपत्नः, अरिः, द्विषन् (= द्विषत्), द्वेषणः, दुर्हृद्, द्विट् (= द्विष्), विपक्षः, अहितः, अमित्रः, दस्युः, शात्रवः, शत्रुः, अभिघाती (= अभिघातिन् । + अभियातिः), परः, अरातिः, प्रत्यर्थी (= प्रत्यर्थिन्), (परिपन्थी (= परिपन्थिन् । १९ पु), 'वैरी' के १९ नाम हैं ॥

७ वयस्यः, स्निग्धः, सवयाः (= सवयस् । ३ पु), 'समान अवस्थावाले मित्र' के ३ नाम हैं ॥

८ * मित्रम् (न), † सखा (=सखि), ‡ सुहृत् (= सुहृद् । + सापदीनः । २ पु), 'मित्र, दोस्त' के ३ नाम हैं ॥

'ये त्वल्पसत्त्वाः प्रथमाः स्त्रीशाश्च स्त्रीस्वभाविनः ।
जात्या न दुष्टाः कार्येषु ते वै वर्षवराः स्मृताः' ॥ १ ॥ इति ॥

* † ‡ अत्यागसहनो बन्धुः सदैवानुगतः सुहृत् ।
एकक्रियं भवेन्मित्रं समप्राणः सखा स्मृतः' ॥ १ ॥ इति ॥

१ सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनम् ॥ १२ ॥
३ यथार्हवर्णः * प्रणिधिरपसर्पश्चरः स्पशः ।
चारश्च गूढपुरुषश्चाप्तप्रत्ययितौ समौ ॥ १३ ॥
५ सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि ।
स्युर्मौहूर्त्तिकमौहूर्त्तज्ञानिकार्तान्तिका अपि ॥ १४ ॥
६ तान्त्रिको ज्ञातसिद्धान्तः ७ सत्री गृहपतिः समौ ।
८ † लिपिकारोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके ॥ १५ ॥
९ ‡ लिखिताक्षरविन्यासे लिपिर्लिविरुभे स्त्रियौ ।

---

१ सख्यम्, साप्तपदीनम् (+ सौहृदम्, सौहार्दम्, सौहृदीयम्, अजर्यम्, मैत्री । २ न), 'दोस्ती, मित्रता' के २ नाम हैं ॥

२ अनुरोधः (पु), अनुवर्तनम् (न), 'अनुकूल रहने' के २ नाम हैं ॥

३ यथार्हवर्णः, प्रणिधिः, अपसर्पः (+ अवसर्पः), चरः, स्पशः, चारः, गूढपुरुषः (७ पु), 'गुप्तचर, खौफिया' के ७ नाम हैं ॥

४ आप्तः, प्रत्ययितः (२ त्रि), 'विश्वासपात्र पुरुषादि' के २ नाम हैं ॥

५ सांवत्सरः, ज्यौतिषिकः (+ ज्योतिषिकः), दैवज्ञः, गणकः, मौहूर्त्तिकः, मौहूर्त्तः, ज्ञानी (= ज्ञानिन्), कार्तान्तिकः (८ पु), 'ज्यौतिषी' के ८ नाम हैं ॥

६ तान्त्रिकः, ज्ञातसिद्धान्तः (२ पु), 'सिद्धान्तको ठीक २ जाननेवाले' के २ नाम हैं ॥

७ सत्री (= सत्रिन्), गृहपतिः (२ पु), 'अन्नादिको सर्वदा दान करनेवाले गृहस्थ' के २ नाम हैं ॥

८ लिपिकारः (+ लिपिकरः, लिबिकरः, लिपिङ्करः, लिबिङ्करः), अक्षरचणः, अक्षरचुञ्चुः, लेखकः (४ पु), 'लेखक, कातिब' के ४ नाम हैं ॥

९ लिपिः (+ लिपी), लिबिः (२ स्त्री), 'लिखे हुए अक्षर चित्रादि' के २ नाम हैं । ('महे०' के मतसे 'लिखितम्, अक्षरसंस्थानम् (+ लिखिताक्षरसंस्थानम्, अक्षरविन्यासः । २ न), इन शब्दोंके भी पर्याय होने से ४ नाम उक्तार्थक हैं') ॥

---

* 'प्रणिधिरवसर्पश्चरः' इति पाठान्तरम् ॥ † 'लिपिकरः' इति 'लिपिङ्करः' इति पाठान्तरे ॥
‡ 'लिखिताक्षरसंस्थाने' इति पाठान्तरम् ॥

१ स्यात्संदेशहरो दूतो २ दूत्यं तद्भावकर्मणी ॥ १६ ॥
३ अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ।
४ * स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ॥ १७ ॥
राज्याङ्गानि प्रकृतयः ५ पौराणां श्रेणयोऽपि च ।
६ सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ॥ १८ ॥
षड्गुणाः—

---

१ संदेशहरः, दूतः (२ पु), 'दूत, सन्देश पहुंचानेवाले' के २ नाम हैं ॥

२ दूत्यम् (+ दौत्यम् । न), 'दूतके काम या भाव' का १ नाम है ॥

३ अध्वनीनः, अध्वगः, अध्वन्यः, पान्थः, पथिकः (५ पु), 'पथिक, राही, मुसाफ़िर' के ५ नाम हैं ॥

४ स्वामी (=स्वामिन्), अमात्यः, सुहृत् (=सुहृद्), कोशः (+ कोषः । ४ पु), राष्ट्रम्, दुर्गम्, बलम् (३ न), 'राजा, मन्त्री, मित्र, ख़ज़ाना, राज्य, किला और सेना' का वाचक क्रमशः १–१ शब्द है, इन सातोंके 'राज्याङ्गम् (न), प्रकृतिः (स्त्री)' ये २ नाम हैं अर्थात् राजा आदि,…७ † 'राज्याङ्ग और प्रकृति' कहलाते हैं ॥

५ पौराणां श्रेणयः (स्त्री), अर्थात् 'नगरवासियोंको भी राज्याङ्ग और प्रकृति' कहते हैं; इस तरह 'राज्याङ्ग या प्रकृति' के ‡ ८ भेद हैं ॥

६ सन्धिः, विग्रहः, यानम् , आसनम् , द्वैधम् (३ न), आश्रयः (शेष ३ पु), ये ६ § 'नीति जाननेवालोंके गुण' हैं । ('प्रसङ्गवश इनके

---

* अयमेव श्लोको हेमचन्द्राचार्यरचितेऽभिधानचिन्तामणौ (३।३७८) समुपलभ्यते ॥

† राज्याङ्गस्य सप्ताङ्गत्वं कामन्दक उक्तम् । तथा हि—

'स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोषो बलं सुहृत् ।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते' ॥ १ ॥ इति ॥

‡ 'अमात्याद्याश्च पौराश्च सङ्घिः प्रकृतयः स्मृताः' । इति कात्यात् राज्यस्याष्टाङ्गत्वमपि सिध्यति ॥

§ षड्गुणा मनुना उक्तास्तथा हि—

'सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा' ॥ १ ॥ इति मनुः ७।१६०॥

* लक्षण कहते हैं—सुवर्णादि, धन, हाथी, घोड़ा आदि देकर वैरीसे मेल करनेको सन्धि १, शत्रुके राज्यादिको लूटने या अग्नि आदि लगाकर वैर या युद्ध करनेको विग्रह २, जीतनेकी इच्छासे चढ़ाई या युद्धयात्रा करनेको यान ३, अपने पक्षके दुर्बल होनेसे किला आदिको पुष्ट तथा सुरक्षितकर चुप-चाप बैठ जानेको आसन ४, बलवान्‌के साथ मित्रता और दुर्बलके साथ वैर करनेको या आधी सेनाके साथ चढ़ाई करनेको द्वैध ५, तथा शत्रुसे पीड़ित होकर अपनी रक्षाके लिये उदासीन या मध्यम राजाके शरणमें जानेको आश्रय ६ कहते हैं; इनके भी † अनेक भेद होते हैं') ॥

---

* एतेषां लक्षणान्‌ वीरमित्रोदयस्य राजनीतिप्रकाश उक्तानि। तथा हि—

'पणबन्धः स्मृतः' सन्धिरपकारस्तु विग्रहः।
जिगीषोः शत्रुविषये यानं यात्राऽभिधीयते ॥ १ ॥
विग्रहेऽपि स्वके देशे स्थितिरासनमुच्यते।
बलार्द्धेन प्रयाणं तु द्वैधीभावः स उच्यते ॥ २ ॥
उदासीने मध्यमे वा संश्रयात्संश्रयः स्मृतः'।

इति वीरमित्रोदयः पृ० ३२४ ॥

† सन्ध्यादीनां भेदानाह मनुस्तथा हि—

'सन्धिं तु द्विविधं विद्याद्राजा विग्रहमेव च।
उभे यानासने चैव द्विविधः संश्रयः स्मृतः ॥ १ ॥
समानयानकर्मा च विपरीतस्तथैव च।
तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः ॥ २ ॥
स्वयंकृतश्च कार्यार्थमकाले काल एव वा।
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ॥ ३ ॥
एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया।
संहतस्य च मित्रेण द्विविधं यानमुच्यते ॥ ४ ॥
क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा।
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम् ॥ ५ ॥
बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥ ६ ॥
अर्थसम्पादनार्थं च पीड्यमानस्य शत्रुभिः।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥ ७ ॥

इति मनुः ७।१६२–१६८ ॥

विस्तरभियाऽन्यत्रोक्ता एतेषां भेदोपभेदा नोच्यन्त इति तेऽन्यतो द्रष्टव्याः ॥

—१ शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः।
२ क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ॥ १९ ॥
३ स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजम्।
४ भेदो दण्डः साम दानमित्युपायचतुष्टयम् ॥ २० ॥

---

१ शक्तिः (स्त्री), 'शक्ति' अर्थात् 'सामर्थ्य' 'प्रभाव, उत्साह और मन्त्र (गुप्त सलाह)' से होती है अर्थात् 'प्रभावज, उत्साहज और मन्त्रज' ये ३ शक्तियाँ हैं। ('कोष और दण्ड-बल प्रभावज शक्ति १, विक्रम-बल उत्साहज शक्ति २, और सन्धि आदि षड्गुण तथा सामादि उपायका यथावत् प्रयोग मन्त्रज शक्ति ३, है') ॥

२ क्षयः (पु), स्थानम् (न), वृद्धिः (स्त्री), क्रमशः कृषि आदि * अष्टवर्गकी कमी होनेको क्षय, सामान्य रहने (कमी-बेसी नहीं होने) को स्थान और बढ़नेको वृद्धि कहते हैं। ये ही तीनों (क्षयः, स्थानम्, वृद्धिः), नीति जाननेवालोंका त्रिवर्ग है; त्रिवर्गः (पु), है ॥

३ प्रभावजः, प्रतापः (२ पु), 'प्रताप' अर्थात् 'खजाने तथा शासनसे उत्पन्न तेज' के २ नाम हैं ॥

४ भेदः, दण्डः (पु), साम (= सामन्), दानम् (२ न), क्रमशः वैरीके मन्त्री आदिको गुप्तचर आदिके द्वारा फोड़कर अपने पक्षमें लाकर शत्रुको वशमें करनेको भेद १, अपराधियोंके शासन करनेको दण्ड २, मीठे वचन या अन्यान्य उपायोंसे क्रोध दूर करनेको साम ३ और किसी वस्तुके देनेको दान ४ कहते हैं। ये ही चारो (भेदः, दण्डः, साम, दानम्), नीति जाननेवालों के उपाय † हैं, उपायः (पु) है। ('१ भेदके तीन, २ दण्डके दो या चार,

---

* अष्टवर्गो यथा—कृषिर्वणिक्पथो दुर्गः सेतुः कुञ्जरबन्धनम्।
खन्याकरबलादानं शून्यानां च निवेचनम्' ॥ १ ॥ इति ॥

† तदुक्तं याज्ञवल्क्येन—
'उपायाः साम दानं च भेदो दण्डस्तथैव च ॥ इति याज्ञ० स्मृ० १।३४६।
मनुं प्रति मत्स्येनोपायस्य सप्तविधत्वमुक्तं तथा हि—
'साम भेदस्तथा दानं दण्डश्च मनुजेश्वर। उपेक्षा च तथा माया इन्द्रजालं च पार्थिव ॥१॥
प्रयोगाः कथिताः सप्त तान्मे निगदतः शृणु'। वीर० राज० प्रक० पृ० २८० ॥

१ साहसं तु दमो दण्डः २ साम सान्त्व३मथो समौ।
भेदोपजापा४वुपधा धर्माद्यैर्यत्परीक्षणम् ॥ २१ ॥

३सामके चार और ४ दानके पाँच भेद होते हैं *')

१ साहसम् (न), दण्डः, दमः (२ पु), 'दण्ड' के ३ नाम हैं ॥

२ साम (= सामन्), सान्त्वम् (२ न), 'साम, शान्त करने' के २ नाम हैं ॥

३ भेदः, उपजापः (२ पु), 'भेद' के २ नाम हैं ॥

४ उपधा (स्त्री), 'मन्त्री आदिके धर्म, धन, काम और भयादिको जाननेके लिये उनको राजाद्वारा परीक्षा करने' का १ नाम है ॥

---

* भेदस्त्रिधा तथा हि—

स्नेहरागापनयनं संहर्षोत्पादनं तथा।
संतर्जनं च भेदज्ञैर्भेदस्तु त्रिविधो मतः' ॥ १ ॥ इति ॥

नारदेन दण्डस्य द्वैविध्यं मनुना च चतुर्विधत्वमुक्तम्। तत् क्रमशः प्रदर्श्यते—

'शारीरश्चार्थदण्डश्च दण्डश्च द्विविधो मतः।
शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्तितः ॥ १ ॥
काकिन्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च'। इति नारदोक्तम्।
'वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डं तु वधदण्डमतः परम्' ॥ १ ॥ इति मनुः ८।१२९ ॥

अग्निपुराणे साम्नश्चतुर्विधत्वमुक्तन्तथा हि—

'चतुर्विधं स्मृतं साम उपकारानुकीर्तनम्।
मिथः सम्बन्धकथनं मृदुपूर्वं च भाषणम् ॥ १ ॥
आयतेर्दर्शनं वाचा तत्रा (वा) हमिति चार्पणम्'। इति ॥

दानस्य पञ्चविधमुक्तमग्निपुराणे, तथा हि—

'यः संप्राप्तधनोत्सर्ग उत्तमाधममध्यमः।
प्रतिदानं तदा तस्य गृहीतस्यानुमोदनम् ॥ १ ॥
द्रव्यदानमपूर्वं च तथैवेष्टप्रवर्त्तनम्।
देयं च प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम्' ॥ २ ॥ इति ॥

एतेषामुपायानां प्रयोगकालादिकं विविधसम्मतभेदप्रकाराश्चात्र ग्रन्थविस्तरभिया नोल्लिखिताः। ते वीरमित्रोदयस्य राजनीतिप्रकाशे पृ० २७८ तमे द्रष्टव्याः ॥

१ पञ्च त्रिष्वरषडङ्गीणो यस्तृतीयाद्यगोचरः।
३ विविक्तविजनच्छन्ननिःशलाकास्तथा रहः॥ २२॥
रहश्चोपांशु चालिङ्गे ४ रहस्यं तद्भवे त्रिषु।
५ * समौ विस्रम्भविश्वासौ ६ भ्रेषो भ्रंशो यथोचितात्॥ २३॥
७ अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्।
८ युक्तमौपयिकं लभ्यं भजमानमभिनीतवत्॥ २४॥
न्याय्यं च त्रिषु षट् ९ संप्रधारणा तु समर्थनम्।
१० अपवादस्तु निर्देशो निदेशः शासनं च सः॥ २५॥
शिष्टिश्चाज्ञा च—

---

१ यहाँसे ५ शब्द त्रिलिङ्ग हैं॥

२ अषडङ्गीणः (त्रि), 'केवल दो आदमियोंकी की हुई गुप्त सलाह' का १ नाम है॥

३ विविक्तः, विजनः, छन्नः, निःशलाकः (४ त्रि), रहः (= रहस् न), रहः (= रहः), उपांशु (२ अव्य०), 'एकान्त' के ७ नाम हैं॥

४ रहस्यम् (त्रि), 'रहस्य, छिपाने योग्य, सलाह आदि' का १ नाम है॥

५ विस्रम्भः (+ विश्रम्भः), विश्वासः (२ पु), 'विश्वास' के २ नाम हैं॥

६ भ्रेषः (पु), 'अनुचित' का १ नाम है॥

७ अभ्रेषः, न्यायः, कल्पः (३ पु), देशरूपम्, समञ्जसम् (२ न), 'न्याय' के ५ नाम हैं॥

८ युक्तम्, औपयिकम्, लभ्यम्, भजमानम्, अभिनीतम्, न्याय्यम् (६ त्रि), 'न्याययुक्त कार्य या द्रव्यादि' के ६ नाम हैं॥

९ संप्रधारणा (स्त्री), समर्थनम् (न), 'उचित और अनुचितका विचारकर निश्चय करने' के २ नाम हैं॥

१० अपवादः, निदेशः निर्देशः, (३ पु), शासनम् (न), शिष्टिः, आज्ञा (२ स्त्री), 'आज्ञा, हुक्म' के ६ नाम हैं॥

---

* 'समौ विस्रम्भविश्वासौ' इति पाठान्तरम्॥

—१ संस्था तु मर्यादा धारणा स्थितिः।
२ आगोऽपराधो मन्तुश्च ३ समे तूद्दानबन्धने ॥ २६ ॥
४ द्विपाद्यो द्विगुणा दण्डो ५ भागधेयः करो बलिः।
६ घट्टादिदेयं शुल्कोऽस्त्री ७ प्राभृतं तु प्रदेशनम् ॥ २७ ॥
८ उपायनमुपग्राह्यमुपहारस्तथोपदा।
९* यौतकादि तु यद्देयं सुदायो हरणं च तत् ॥ २८ ॥
१० तत्कालस्तु तदात्वं स्या११दुत्तरः काल आयतिः।

---

१ संस्था, मर्यादा, धारणा, स्थितिः (४ स्त्री), 'उचित मार्गपर रहने' के ४ नाम हैं ॥

२ आगः (= आगस् न), अपराधः, मन्तुः (२ पु), 'अपराध, कसूर' के ३ नाम हैं ॥

३ उद्दानम्, बन्धनम् (२ न), 'बाँधने या कैद करने' के २ नाम हैं ॥

४ द्विपाद्यः (पु), 'दुगुने दण्ड' का १ नाम है ॥

५ भागधेयः, करः, बलिः (३ पु), 'कर, मालगुजारी' के २ नाम हैं ॥

६ शुल्कः (पु न), 'घाट, जङ्गल और नदी आदिकी आमदनीसे दिये जानेवाले राज-भाग (टेक्स)' का १ नाम है ॥

७ प्राभृतम्, प्रदेशनम् (२ न), 'मित्रादिको खुश करनेके लिये दिये जानेवाले पदार्थ' के २ नाम हैं ॥

८ उपायनम्, उपग्राह्यम् (२ न), उपहारः (पु), उपदा (स्त्री), भा० दी० मतसे 'राजाको दिये जानेवाले भेंट, नजराना' के ४ नाम हैं। प्राभृतम्,.....'देवता, राजा, मित्रादिको खुश करनेके लिये दिये जानेवाले भेंट' के ६ नाम हैं ॥

९ यौतकम् (+ यौतुकम् । न), सुदायः (पु), हरणम् (न), 'यज्ञोपवीत आदिमें दी हुई भिक्षा या दामादको दिये जानेवाले दहेज' के ३ नाम हैं ॥

१० तत्कालः (पु), तदात्वम् (न), 'वर्तमान काल, बीतते हुए समय' के २ नाम हैं ॥

११ आयतिः (स्त्री), 'आनेवाले समय, भविष्यत्काल' का १ नाम है ॥

---

*'यौतुकादि' इति पाठान्तरम् ॥

१ सांदृष्टिकं फलं सद्य २ उदर्कः फलमुत्तरम् ॥ २९ ॥
३ अदृष्टं वह्नितोयादि ४ दृष्टं स्वपरचक्रजम् ।
५ महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥ ३० ॥
६ प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकम् ।
८ नृपासनं भद्रासनं ९ सिंहासनं तु तत् ॥ ३१ ॥
हैमं १० छत्रं त्वातपत्रं—

---

१ सांदृष्टिकम् (न), 'व्यापार आदिके बाद शीघ्र मिलनेवाले फल' का १ नाम है ॥

२ उदर्कः (पु), 'भविष्यमें होनेवाले फल' का १ नाम है ॥

३ अदृष्टम् (न), 'आगसे जलने, पानीसे बह जाने आदि (आदि पदसे 'व्याधि, दुर्भिक्ष, मरण, बहुत वर्षा, सूखा, मृग, मूषक' का संग्रह है) के भय' का १ नाम है ॥

४ दृष्टम् (न), 'अपने राज्यमें चोर, जङ्गल आदिका भय तथा दूसरे राज्यसे दाह और चढ़ाई आदिके भय' का १ नाम है ॥

५ अहिभयम् (न), 'अपने पक्ष (मन्त्री आदि) से होनेवाले राजा आदिके भय' का १ नाम है । (* 'पक्षके ७ भेद हैं') ॥

६ प्रक्रिया (स्त्री), अधिकारः (पु), 'व्यवस्थाको ठीक करने' के २ नाम हैं ॥

७ चामरम् (+ चमरम् ; चमरः पु, चामरा स्त्री), प्रकीर्णकम् (२ न), 'चँवर' के २ नाम हैं ॥

८ नृपासनम्, भद्रासनम् (२ न), 'मणि आदिके बने हुए राजाके आसन' के २ नाम हैं ॥

९ सिंहासनम् (न), 'सुवर्णके बने हुए राजाके सिंहासन' का १ नाम है ॥

१० छत्रम्, आतपत्रम् (२ न), 'छाता' के २ नाम हैं ॥

---

*पक्षः सप्तधा, तथा हि—

'निजोऽथ मैत्रश्च समाश्रितश्च सम्बन्धतः कायसमुद्भवश्च ।
भृत्यागृहीतो विविधोपचारैः पक्षं बुधाः सप्तविधं वदन्ति' ॥ १ ॥ इति ॥

—१ राज्ञस्तु नृपलघ्नं तत्।
२ भद्रकुम्भः पूर्णकुम्भो ३ भृङ्गारः कनकालुका ॥ ३२ ॥
४ निवेशः शिविरं षण्ढे ५ सज्जनं तूपरक्षणम्।
६ हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ॥ ३३ ॥
७ दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥
इभः स्तम्बेरमः पद्मी ८ यूथनाथस्तु यूथपः।

---

१ नृपलघ्नम् (= नृपलक्षमन् , न), 'राजाके छाते' का १ नाम है ॥

२ भद्रकुम्भः, पूर्णकुम्भः (२ पु), 'मङ्गलके लिये जलसे भरे हुए घड़े' के २ नाम हैं ॥

३ भृङ्गारः (पु), कनकालुका (स्त्री), 'झारी, हथहर (स्वर्णके पात्र-विशेष), के २ नाम हैं ॥

४ निवेशः (पु), शिविरम् (+ शिविरम् । न), 'सेनाके ठहरनेकी जगह' के २ नाम हैं ॥

५ सज्जनम् , उपरक्षणम् (२ न), 'सेनाकी रक्षाके वास्ते नियम किये हुए पहरे' के २ नाम हैं ॥

६ सेनाङ्गम् (न), 'हाथी, रथ, घोड़ा और पैदल ये ४ सेनाके * अङ्ग' हैं। ('नाव जहाज आदिका रथमें, किरात, मल्लाह आदिका पैदलमें और भैंसा आदिका हाथीमें अन्तर्भाव होनेसे उनका पृथक् ग्रहण नहीं किया गया है')

७ दन्ती (= दन्तिन्), दन्तावलः, हस्ती (= हस्तिन्), द्विरदः, अनेकपः, द्विपः, मतङ्गजः, गजः, नागः, कुञ्जरः, वारणः, करी (= करिन्), इभः, स्तम्बेरमः, पद्मी (= पद्मिन् । + सामजः, सिन्धुरः, कुम्भी = कुम्भिन् । १५ पु), 'हाथी' के १५ नाम हैं। ('यहांसे श्लो० ४३ तक गजप्रकरण है') ॥

८ यूथनाथः, यूथपः (२ पु), 'झुण्डके स्वामी' के २ नाम हैं ॥

---

* तदुक्तं हेमचन्द्राचार्यैः—

'गजो वाजी रथः पत्तिः सेनाङ्गं स्याच्चतुर्विधम्' ॥

इति अभि० चिन्ता० ३।४१५ ॥

१ मदोत्कटो मदकलः २ कलभः करिशावकः ॥ ३५ ॥
३ प्रभिन्नो गर्जितो मत्तः ४ समाविद्धान्तनिर्मदौ।
५ * 'राजवाह्यस्त्वौपवाह्यः ६ सन्नाह्यः समरोचितः' (२५)
७ हास्तिकं गजता वृन्दे ८ करिणी धेनुका वशा ॥ ३६ ॥
९ गण्डः कटो १० मदो दानं ११ वमथुः करशीकरः।
१२ कुम्भौ तु पिण्डौ शिरसः—

---

१ मदोत्कटः, मदकलः (२ पु), 'मतवाले हाथी' के २ नाम हैं ॥

२ कलभः (+ करभः), करिशावकः (२ पु), 'तीस वर्षसे कम उम्रवाले हाथीके बच्चे' के २ नाम हैं ॥

३ प्रभिन्नः, गर्जितः, मत्तः (३ पु), 'जिसका मद गिर रहा हो उस हाथी' के ३ नाम हैं ॥

४ उद्धान्तः, निर्मदः (२ पु), 'जिसका मद गिरकर समाप्त हो गया हो उस हाथी' के २ नाम हैं ॥

५ [राजवाह्यः, औपवाह्यः (+ उपवाह्यः। २ पु), 'राजाके चढ़ने योग्य हाथी' के २ नाम हैं] ॥

६ [सन्नाह्यः, समरोचितः (२ पु), 'लड़ाईके योग्य हाथी' के २ नाम हैं] ॥

७ हास्तिकम् (न), गजता (स्त्री), 'हाथियोंके झुण्ड' के २ नाम हैं ॥

८ करिणी, धेनुका, वशा (३ स्त्री), 'हथिनी' के ३ नाम हैं ॥

९ गण्डः (भा० दी०), कटः (२ पु), 'हाथीके गाल' के २ नाम हैं ॥ ('उपलक्षण होनेसे प्राणिमात्रके गालके भी ये दो नाम हैं') ॥

१० मदः (पु), दानम् (न), 'हाथीके मद' के २ नाम हैं ॥

११ वमथुः, करशीकरः (२ पु), 'हाथीके सूंड़से निकले हुए पानीके छींटे' के २ नाम हैं ॥

१२ कुम्भः (पु), 'हाथीके मस्तकके ऊपरवाले दोनों मांस-पिण्डों' का १ नाम है ॥

---

* अयं क्षेपकांशः क्षीरस्वाभिव्याख्याने दृश्यते ॥

—१ तयोर्मध्ये विदुः पुमान् ॥ ३७ ॥
२ अवग्रहो ललाटं * स्या३दीषिका त्वक्षिकूटकम् ।
४ अपाङ्गदेशो निर्याणं ५ कर्णमूलं तु चूलिका ॥ ३८ ॥
६ अधः कुम्भस्य वाहित्थं ७ प्रतिमानमधोऽस्य यत् ।
८ आसनं स्कन्धदेशः स्यात् ९ पद्मकं बिन्दुजालकम् ॥ ३९ ॥

---

१ † विदुः (पु), 'हाथीके मस्तकके ऊपरवाले दोनों मांसपिण्डोंके बीचवाले भाग' का १ नाम है ॥

२ अवग्रहः (+ अवग्राहः । पु), 'हाथीके ललाट' का १ नाम है ॥

३ ईषिका (+ ईषीका, इषिका, इषीका । स्त्री), अक्षिकूटकम् (न) 'हाथीकी आँखके गोलाकार भाग' के २ नाम है ॥

४ निर्याणम् (न), 'हाथीकी आँखके किनारेवाले भाग' का १ नाम है ॥

५ चूलिका (स्त्री), 'हाथीकी कनपट्टी' (कानकी जड़वाले भाग)' का १ नाम है ॥

६ वाहित्थम् (न), 'हाथीके शिरके ऊपरवाले दोनों मांस-पिण्डके नीचेवाले भाग' का १ नाम है ॥

७ प्रतिमानम् (न), 'हाथीके दोनों दाँतोंके बीचवाले भाग' का १ नाम है ॥

८ आसनम् (न), 'हाथीका कन्धा' अर्थात् 'हाथीवानके बैठनेकी जगह' का १ नाम है ॥

९ पद्मकम्, बिन्दुजालकम् (भा० दी० । + बिन्दुजालकम् । २ न), 'हाथियोंके मुखमें कमलाकार छोटे २ लाल चिह्न-विशेष' के २ नाम हैं ॥

---

* 'स्यादिषीकाः' इति पाठान्तरम् ॥

† यदाह पालकाप्यः—

'तत्र रक्षाविताने द्वे विदू द्वौ श्रवणे गतौ ।
प्राक्च प्रश्चाच्च तिर्यक्च षड्भेदाद्वृक्षवारणा' ॥ १ ॥

'तत्रारक्षविताने' इत्येवं पाठभेदः अभि० चिन्ता० (४।२९२) व्याख्याने समुपलभ्यते ॥

१ पक्षभागः पार्श्वभागो २ दन्तभागस्तु योऽग्रतः।
३ द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात् ॥ ४० ॥
४ * तोत्रं वेणुक५मालानं बन्धस्तम्भे६ऽथ शृङ्खले।
अन्दुको निगडोऽस्त्री स्याऽदङ्कुशोऽस्त्री सृणिः स्त्रियाम् ॥ ४१ ॥
८ दूष्या कक्ष्या वरत्रा स्यात् ९ कल्पना सज्जना समे।
१० प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ॥ ४२ ॥

---

१ पक्षभागः पार्श्वभागः (भा० दी० । २ पु), 'हाथीके पार्श्वभाग (बगल)' के २ नाम हैं ॥

२ दन्तभागः (पु), 'हाथीके आगेवाले भाग'का १ नाम है ॥

३ गात्रम्, अवरम्, (+ अवरम्, अपरम् । २ न), 'हाथीके आगेवाले जङ्घा आदि पूर्वार्द्ध शरीर और पीछेवाले जङ्घा आदि परार्द्ध शरीर' १—१ नाम है ॥

४ तोत्रम्, वेणुकम् (+ वैणुकम् । २ न), 'हाथीको मारनेवाले डण्डे या चाबुक आदि' के २ नाम हैं ॥

५ आलानम् (न), 'हाथीको बाँधनेवाले खूंटे' का १ नाम है ॥

६ शृङ्खलम् (त्रि †), अन्दुकः (+ अन्दूः स्त्री । पु), निगडः (पु न), 'हाथीकी बेड़ी' (बाँधनेवाली सिकड़ी)' के ३ नाम हैं ॥

७ अङ्कुशः (पु न), सृणिः (+ शृणिः । स्त्री), 'अङ्कुश' के २ नाम हैं ॥

८ दूष्या (+ चूष्या, चूषा मुकु०), कक्ष्या, वरत्रा (३ स्त्री), 'हाथीके कसनेवाले रस्से' के ३ नाम हैं ॥

९ कल्पना, सज्जना (स्त्री), 'गेरू आदिसे हाथीकी सजावट करने' के २ नाम हैं ॥

१० प्रवेणी (+ प्रवेणः । स्त्री), आस्तरणम् (न), वर्णः, परिस्तोमः (+ वर्णपरिस्तोमः । २ पु), कुथः (पु स्त्री), 'हाथीके झूले' के ५ नाम हैं ॥

---

* 'तोत्रं वैणुकमालानं बन्धस्तम्भेऽथ शृङ्खला' इति पाठान्तरम् ॥

† तथा च मेदिनी—'शृङ्खला पुंस्कटीबन्धे च निगडे त्रिषु' इति मे० पृ० १६८ ॥

१ वीतं त्वसारं हस्त्यश्वं २ वारो तु गजबन्धनी ।
३ घोटके * वीतितुरगतुरङ्गाश्वतुरङ्गमाः ॥ ४३ ॥
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।
४ आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः ॥ ४४ ॥
६ †वनायुजाः पारसीकाः काम्बोजा वाह्लिका हयाः ।
७ ययुरश्वोऽश्वमेधीयो ८ जवनस्तु जवाधिकः ॥ ४५ ॥

---

१ वीतम् (न) 'लड़नेमें असमर्थ हाथी-घोड़े' का १ नाम है ॥

२ वारी, गजबन्धनी (भा० दी० । २ स्त्री), 'हाथीखाना' अर्थात् 'हाथी बाँधनेकी जगह' के २ नाम हैं ॥

३ घोटकः (+ घोटः), वीतिः (+ पीतिः), तुरगः, तुरङ्गः, अश्वः, तुरङ्गमः, वाजी (= वाजिन्), वाहः, अर्वा (= अर्वन्), गन्धर्वः, हयः, सैन्धवः, सप्तिः (१३ पु), 'घोड़े'के १३ नाम हैं । ('यहाँसे श्लो० ५० तक 'अश्वप्रकरण है') ॥

४ ‡ आजानेयः (पु), 'अच्छे घोड़े' का १ नाम है ॥

५ विनीतः, साधुवाही (= साधुवाहिन् भा० दी० । २ पु); 'अच्छी २ चालसे शिक्षित घोड़े' के २ नाम हैं ॥

६ वनायुजः (+ वानायुजः), पारसीकः, काम्बोजः, वाह्लिकः (+ वाह्निकः, वाह्लीकः, वाह्लीकः । ४ पु) 'वनायु, पारस, काम्बोज और वाह्लिक देशोंमें पैदा होनेवाले घोड़े' के क्रमशः १-१ नाम हैं । (किसी-किसी के मतसे प्रथम दो नाम 'पारसी घोड़े' के और अन्तवाले दो नाम उक्तार्थक हैं') ॥

७ ययुः, अश्वमेधीयः (भा० दी० । २ पु), 'अश्वमेध यज्ञमें छोड़े जानेवाले घोड़े' के २ नाम हैं ॥

८ जवनः (+ प्रजवी = प्रजविन्), जवाधिकः (भा० दी० । २ पु), 'बहुत तेज चलनेवाले घोड़े' के २ नाम हैं ॥

---

* 'पीतितुरग—' इति पाठान्तरम् ॥ † 'वानायुजः' इति पाठान्तरम् ॥

‡ अश्वशास्त्रे आजानेयलक्षणमुक्तन्तथा हि—

'शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदे-पदे ।
आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः' ॥ १ ॥ इति ॥

१ पृष्ठ्यः स्थौरी २ सितः कर्कौ ३ रथ्यो वोढा रथस्य यः।
४ बालः किशोरो ५ वाम्यश्वा वडवा ६ वाडवं गणे ॥ ४६ ॥
७ त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते।
८ कश्यं तु मध्यमश्वानां ९ हेषा हेषा च निस्वनः ॥ ४७ ॥
१० निगालस्तु गलोद्देशो ११ वृन्दे त्वश्वोयमाश्ववत्।
१२ आस्कन्दितं *धौरितकं रेचितं वल्गितं प्लुतम् ॥ ४८ ॥

---

१ पृष्ठ्यः, स्थौरी (= स्थौरिन्। २ पु), 'अन्न आदि जिसपर लादा जाय उस घोड़े' के २ नाम हैं ॥

२ कर्कः (पु), 'सफेद घोड़े' का १ नाम है ॥

३ रथ्यः (पु), 'रथमें चलनेवाले घोड़े' का १ नाम है ॥

४ किशोरः (पु), 'बछेड़ा' अर्थात् 'बच्चे घोड़े' का १ नाम है। ('उपलक्षणतया 'किशोर' शब्द मनुष्यादिके बालकका भी वाचक है') ॥

५ वाजी, अश्वा, वडवा (३ स्त्री), 'घोड़ी' के ३ नाम हैं ॥

६ वाडवम् (न), 'घोड़ियोंके झुण्ड' का १ नाम है ॥

७ आश्वीनम् (त्रि), 'एक दिनमें घोड़ेसे चलने योग्य रास्ता या देशादि' का १ नाम है ॥

८ कश्यम् (न), 'घोड़ेके मध्य भाग' का १ नाम है ॥

९ हेषा, हेषा (२ स्त्री), 'हिनहिनाहट, घोड़ेकी बोली' के २ नाम हैं ॥

१० †निगालः, गलोद्देशः (भा० दी०। २ पु), 'घोड़ेकी गर्दनके पीछेवाले भाग' के २ नाम हैं ॥

११ अश्वीयम् (+ आश्वीयम्), आश्वम् (२ न), 'घोड़ोंके झुण्ड' के २ नाम हैं ॥

१२ आस्कन्दितम् (+ उत्तेरितम्, उपकण्ठम्), धौरितकम् (+ धोरितकम्, धोरितम्, धौर्यम्, धारणम्), रेचितम् (+ उत्तेजितम्). वल्गितम्,

---

* 'धोरितकं' इति पाठान्तरम् ॥

† अश्वशास्त्रे निगाललक्षणमुक्तन्तथा—

'घण्टाबन्धसमीपस्थो निगालः कथ्यते बुधैः' इति ॥

गतयोऽमूः पञ्च धारा १ घोणा तु प्रोथमस्त्रियाम्।
२ कविका तु खलीनोऽस्त्री ३ शफं क्लीबे खुरः पुमान् ॥ ४९ ॥
४ पुच्छोऽस्त्री लूमलाङ्गूले ५ वालहस्तश्च वालधिः।
६ त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ॥ ५० ॥

प्लुतम् (५ न), 'घोड़ोंके सरपट दौड़ने, दुलकी चलने, पोइया चलने, उछाल मारकर चलने और चौकड़ी मारकर चलने' का क्रमशः १–१ नाम है। 'धारा' (स्त्री) 'घोड़ोंके पूर्वोक्त पांच *चालों' का १ नाम है ॥

१ घोणा (स्त्री), प्रोथम् (पु न), भा० दी० मतसे 'घोड़ेके चक्कर लगाने' के २ नाम हैं और महे० मतसे 'घोड़ेकी नाक' का 'प्रोथम्' यह १ नाम है ॥

२ कविका (+ कवी, कवियम् न। स्त्री), खलीनः (पु न), 'घोड़की लगाम' के २ नाम हैं ॥

३ शफम् (न), खुरः (+ क्षुरः। पु), 'घोड़ेकी सूम' (खुर)' के २ नाम हैं ॥

४ पुच्छः (पु न), लूमम्, लाङ्गूलम् (+ लाङ्गुलम्। २ न), 'घोड़ेकी दुम (पूंछ)' के ३ नाम हैं ॥

५ वालहस्तः, वालधिः (२ पु), 'घोड़ेकी पूंछके वालवाले अगले भाग' के २ नाम हैं ॥ (यद्यपि 'शफ आदि शब्द अश्वप्रकरणमें कथित है, तथापि इन (शफम्,·····वालधिः) शब्दों का प्रयोग गौ आदि पशुओंके भी खुर आदि अर्थत्रयमें होता है) ॥

६ उपावृत्तः, लुठितः (२ त्रि), 'थकावट दूर करनेके लिए जमीनपर लोटे हुए घोड़े' के २ नाम हैं ॥

---

* अत्र क्षी० स्वा० 'क्रमस्त्वन्यथा। यदाहुः—
'घोरितं वल्गितं धारा प्लुतमुत्तेजितं क्रमात्। उत्तेरितं चेति पञ्च शिक्षयेत्तुरगं गतम् ॥ १ ॥
घोरितं गतिमात्रे यद्योजितं वल्गितं पुरः। अग्रकायसमुछ्रासात्कुञ्चितास्यं नतत्रिकम् ॥ २ ॥
पूर्वापरोन्नमनतः क्रमादारोपणं प्लुतम्। उत्तेजितं मध्यवेगं योजनं श्लथवल्गया ॥ ३ ॥
उत्तेरितेति वेगान्धो न शृणोति न पश्यति' इति' ॥

इत्याह 'हेमचन्द्राचार्यैरप्यन्यथैव क्रमो लिखितः' सोऽभिधानचिन्तामणौ (४।३११–३१५) द्रष्टव्यः ॥

'शिशुपालवध'स्य व्याख्यायां 'सर्वङ्कषा'ख्यां मल्लिनाथेन–'अश्वशास्त्रे तु संज्ञान्तरेणोक्ताः–'गतिः पुला चतुष्का च तद्वन्मध्यजवा परा। पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्तिताः' एकैका त्रिविधा धारा इयशिक्षाविधौ मता। लघ्वी मध्या तथा दीर्घा ज्ञात्वैता योजयेत् क्रमात्' इति। 'अव्याकुलं'—(५।६०) श्लोकस्य व्याख्यानेऽश्वगतीनां भिन्नानि नामानि।

१ याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः ।
२ असौ *पुष्यरथश्चक्रयानं न समराय यत् ॥ ५१ ॥
३ कर्णीरथः प्रवहणं डयनं च समं त्रयम् ।
४ क्लीवेऽनः शकटोऽस्त्री स्याद् ५ गन्त्री कम्बलिवाह्यकम् ॥ ५२ ॥
६ शिबिका याप्ययानं स्याद् ७ दोला प्रेङ्खादिका स्त्रियाम् ।
८ उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥ ५३ ॥
९ पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ।
१० रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते ॥ ५४ ॥

---

१ शताङ्गः, स्यन्दनः, रथः (३ पु), 'लड़ाईके रथ' के ३ नाम हैं । ('यहांसे आगे श्लोक ६१ तक 'रथ-प्रकरण' है') ॥

२ पुष्यरथः (+ पुष्परथः । पु), 'यात्रा, उत्सव आदिमें चढ़नेके लिये बनाये हुए रथ' का १ नाम है ॥

३ कर्णीरथः (पु), प्रवहणम्, डयनम् (+ हयनम् । २ न), 'स्त्रियोंके चढ़नेके लिये पर्दा आदिसे आवृत किये हुए रथ' के ३ नाम हैं ॥

४ अनः (= अनस्, न), शकटः (पु न), 'गाड़ी' के २ नाम हैं ॥

५ गन्त्री (स्त्री), कम्बलिवाह्यकम् (भा० दी० । + गन्त्रीकम्, बलिवाह्यकम् । न), 'छोटी गाड़ी' के २ नाम हैं ॥

६ शिबिका (+ शीविका । स्त्री), याप्ययानम् (न), 'पालकी' के २ नाम हैं ॥

७ दोला (+ दोली), प्रेङ्खा, आदि ('शयनखट्वा,·····' । २ स्त्री), 'झूला, हिंडोला' के २ नाम हैं ॥

८ द्वैपः, वैयाघ्रः (२ त्रि), 'बाघके चमड़ेसे मढ़े हुए रथ' के २ नाम हैं ॥

९ पाण्डुकम्बली (= पाण्डुकम्बलिन्, त्रि), 'पाण्डु (धूसर) 'कम्बल-से मढ़े या ढके हुए रथ' का १ नाम है ॥

१० काम्बलः, वास्त्रः (२ त्रि), आदि 'कम्बल और कपड़े आदिसे ढके हुए रथ' का क्रमशः १-१ नाम है ॥

---

* 'पुष्परथश्चक्रयानं' इति पाठान्तरम् ॥

१ त्रिषु द्वैपादयो २ रथ्या रथकट्या रथव्रजे।
३ धूः स्त्री क्लीवे यानमुखं ४ स्याद्रथाङ्गमपस्करः ॥ ५५ ॥
५ चक्रं रथाङ्गं ६ तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्।
७ पिण्डिका नाभिदरुह्याग्रकीलके तु द्वयोरणिः ॥ ५६ ॥
९ रथगुप्तिर्वरूथो ना १० कूबरस्तु युगन्धरः।
११ अनुकर्षो दारवधःस्थं—

---

१ 'द्वैप' (२।८।५३) आदि शब्द त्रिलिङ्ग हैं ॥

२ रथ्या, रथकट्या (२ स्त्री), रथव्रजम् (भा० दी०, पु न), 'रथोंके समूह' के ३ नाम हैं ॥

३ धूः (= धुर्, स्त्री), यानमुखम् (न), 'रथके धूरा' के २ नाम है ॥

४ रथाङ्गम् (न), अपस्करः (पु), 'रथके *अवयव' के २ नाम हैं ॥

५ चक्रम्, रथाङ्गम्, (२ न), 'रथ, गाड़ी आदिके पहिये' के २ नाम हैं॥

६ नेमिः (+ नेमी । स्त्री), प्रधिः (पु), 'हाल, रथके पहियेके ऊपर वाले परिधि' के २ नाम हैं ॥

७ पिण्डिका (+ पिण्डी), नाभिः (+ नाभी । २ स्त्री), 'पहियेके बीचवाले भाग (जिसमें चारों तरफसे काठ जुड़े रहते हैं)' के २ नाम हैं ॥

८ अणिः (पु स्त्री), 'धूरामें लगानेवाली किल्ली' का १ नाम है ॥

९ रथगुप्तिः (स्त्री), वरूथः (पु), 'लड़ाईमें शत्रुके प्रहारसे बचनेके लिये रथमें लगाये हुए लोहा आदिके पर्दे' के २ नाम हैं ॥

१० कूबरः, युगन्धरः (२ पु), 'जुआ, फड़, रथमें घोड़ा आदि जोते जानेवाले काष्ठ या जुएके काठको बांधे जानेवाले स्थान'के २ नाम हैं ॥

११ अनुकर्षः (+ अनुकर्षा = अनुकर्षन् । पु), 'रथके नीचेवाले काष्ठ' के २ नाम हैं ॥

---

* इयं महेश्वरोक्तिर्मुकुटानुरोधेन। सामान्येन रथाङ्गस्याक्षयुगचक्रादिकमपस्करः इति। अग्रे रथाङ्गत्वेन गतार्थस्यापि 'चक्रम्' इति विशेषतो नामान्तरप्रतिपादनाय 'तस्यान्ते नेमिः' इत्युक्तये च रथाङ्गस्यानुवादः' इति चोक्तवान्। भानुजिदीक्षितस्तु 'रथारम्भकं चक्रादन्यत्' इति क्षीरस्वामिग्रन्थानुरोधात् 'चक्राभिन्नस्य रथारम्भकचक्रस्य' इमे द्वे नामनी'त्युक्तवान् ॥

—१ प्रासङ्गो ना * युगाद्युगः ॥ ५७ ॥
२ सर्वं स्याद्वाहनं यानं युग्यं पत्त्रं च धोरणम्।
३ परम्परावाहनं यत्तद्वैनीतकमस्त्रियम् ॥ ५८ ॥
४ आधोरणा हस्तिपका हस्त्यारोहा निषादिनः।
५ नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ॥ ५९ ॥
†सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः।
६ रथिनः स्यन्दनारोहा—

---

१ प्रासङ्गः (+ प्रसङ्गयः पु), महे० मतसे 'रथ आदिके जुआठ, फड़' का और ‡ भा० दी० मतसे 'नये बछवाको पहले पहल शिक्षा देनेके लिये उसके कन्धेपर रक्खे जानेवाले काष्ठ' का १ नाम है ॥

२ वाहनम्, यानम्, युग्यम्, पत्त्रम्, धोरणम् (५ न), 'वाहनमात्र' अर्थात् 'हाथी, घोड़ा इत्यादि (श्लो० ३३) से लेकर दोला (श्लो० ५३) तक सब' के ये ५ नाम हैं ॥

३ वैनीतकम् (+ प्रावन्धिकम्। न पु), 'परम्परावाली सवारी, कहाँर आदिके द्वारा बारी २ से ढोई जानेवाली पालकी, डोली आदि' का १ नाम है ॥

४ आधोरणः, हस्तिपकः, हस्त्यारोहः, निषादी (= निषादिन्। ४ पु) 'हाथीवान' के ४ नाम हैं। ('किसी २ के मत से २–२ शब्द एकार्थक हैं') ॥

५ नियन्ता (= नियन्तृ), प्राजिता (प्राजितृ), यन्ता (= यन्तृ), सूतः, क्षत्ता (= क्षत्तृ) सारथिः, सव्येष्ठः (सव्येष्ठा = सव्येष्ठृ), दक्षिणस्थः (८ पु), 'रथके परिवार' अर्थात् 'रथ हाँकनेवाला ड्राइवर, कोचवान, गाड़ीवान, वग्गीवान, पक्षावान और पीछे चढ़नेवाले-जो दौड़कर आगेकी भीड़को हटाकर फिर पीछे चढ़ जाते हैं, इत्यादि' के ८ नाम हैं ॥

६ रथी (= रथिन्), स्यन्दनारोहः (२ पु), 'रथपर चढ़कर लड़नेवाले' के २ नाम हैं ॥

---

* 'युगान्तरम्' इति पाठान्तरम् ॥ † 'सव्येष्ठदक्षिणस्थौ' इति पाठान्तरम् ॥
‡ इयं भानुजिदीक्षितोक्तिः 'युगान्तरम्' इतिपाठमङ्गीकृत्येत्यवधेयम् ॥

—१ अश्वारोहास्तु सादिनः ॥ ६० ॥
२ भटा योधाश्च योद्धारः ३ सेनारक्षास्तु सैनिकाः।
४ सेनायां समवेता ये सेन्यास्ते सैनिकाश्च ते ॥ ६१ ॥
५ बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः।
६ परिधिस्थः परिचरः ७ सेनानीर्वाहिनीपतिः ॥ ६२ ॥
८ कञ्चुको वारवाणोऽस्त्रीऽथ तु मध्ये सकञ्चुकाः।
बध्नन्ति * तत्सारसनमधिकाङ्गो१०ऽथ शीर्षकम् ॥ ६३ ॥
शीर्षण्यं च शिरस्त्रं—

---

१ अश्वारोहः, सादी (= सादिन् । २ पु) 'घुड़सवार' के २ नाम हैं ॥

२ भटः, योधः, योद्धा (= योद्धृ । ३ पु), 'लड़नेवाले वीर' के ३ नाम है ॥

३ सेनारक्षः, सैनिकः (२ पु), 'सेनाके पहरेदार' के २ नाम हैं ॥

४ सैन्यः, सैनिकः (२ पु), 'सैनिक' अर्थात् 'सेनामे रहनेवाले' के २ नाम हैं ॥

५ साहस्रः, सहस्री (= सहस्रिन् । २ पु), 'एक हजार योद्धाओंवाले सूबेदार आदि' के २ नाम हैं ॥

६ परिधिस्थः, परिचरः (२ त्रि), 'अपराधी सैनिकोंको दण्ड देनेके लिये राजासे नियुक्त पुरुष' के २ नाम हैं ॥

७ सेनानीः, वाहिनीपतिः (२ पु), 'सेनापति' के २ नाम हैं ॥

८ कञ्चुकः (पु), वारवाणः (पु न), 'शत्रुके प्रहारसे बचनेके लिये लोहे आदिके बनाये हुए सन्नाह, झूल' के दो नाम हैं ॥

९ सारसनम् (न), अधिकाङ्गः (+ अधिपाङ्गः, धिपाङ्ग । पु), 'झूल (कवच) को स्थिर रहनेके लिये कमरमें कसनेकी पट्टी आदि' के २ नाम हैं ॥

१० शीर्षकम्, शीर्षण्यम्, शिरस्त्रम् (३), 'लड़ाईके समय पहने जानेवाले टोप, या टोपीमात्र' के ३ नाम हैं ॥

---

* 'तत्सारसनमधिपाङ्गोऽथ' इति पाठान्तरम् ॥

—१ अथ तनुत्रं वर्म दंशनम् ।
उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ॥ ६४ ॥
२ आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ।
३ सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६५ ॥
४ त्रिष्वामुक्तादयो ५ वर्मभृतां कावचिकं गणे ।
६ * पदातिपत्तिपदगपादातिकपदाजयः ॥ ६६ ॥
पद्मश्च पदिकश्चाऽथ पादातं पत्तिसंहतिः ।
८ शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ॥ ६७ ॥

---

१ तनुत्रम्, वर्म (= वर्मन्), दंशनम् (३ न), उरश्छदः, कङ्कटकः, जगरः (+ जागरः । ३ पु), कवचः (पु न), 'कवच' के ७ नाम हैं ॥

२ आमुक्तः, प्रतिमुक्तः, पिनद्धः, अपिनद्धः, (४ त्रि), भा० दी० मेदि० आदिके मतसे 'पहने हुए कवच' के और मु० मतसे 'पहनेहुए वस्त्रादि' के ४ नाम हैं ॥

३ सन्नद्धः, वर्मितः, सज्जः, दंशितः, व्यूढकङ्कटः (५ त्रि), 'कवच आदिको पहनकर लड़ाईके लिये तैयार मनुष्य' के ५ नाम हैं ॥

४ 'आमुक्त' आदि शब्द त्रिलिङ्ग हैं ॥

५ कावचिकम् (न), 'कवच पहने हुए पुरुषादिके झुण्ड' का १ नाम है ॥

६ पदातिः (+ पदातः, पादातिः, पादातः), पत्तिः, पदगः, पादातिकः (+ पादातिगः, पादातिकः), पदाजिः, पद्मः, पदिकः (७ पु), 'पैदल' के ७ नाम हैं ॥

७ पादातम् (न), पत्तिसंहतिः (भा० दी०, स्त्री), 'पैदलके झुण्ड' के २ नाम हैं ॥

८ शस्त्राजीवः, काण्डपृष्ठः (+ काण्डस्पृष्टः मु०), आयुधीयः, आयुधिकः (४ त्रि), 'हथियारकी नौकरीसे जीविका चलानेवाले' के ४ नाम हैं ॥

---

* पदातिपत्तिपदगपादातिकपदाजयः' इति पाठान्तरम् ॥

१ कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत् ।
२ अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः ॥ ६८ ॥
३ धन्वी धनुष्मान्धानुष्को निषङ्गथस्त्री धनुर्धरः ।
४ स्यात्काण्डवांस्तु काण्डीरः ५ शाक्तीकः शक्तिहेतिकः ॥ ६९ ॥
६ याष्टीकपारश्वधिकौ * यष्टिपर्श्वधहेतिकौ ।
७ नैस्त्रिंशिकोऽसिहेतिः स्यात् ८ समौ प्रासिककौन्तिकौ ॥ ७० ॥
९ चर्मी फलकपाणिः स्यात्—

---

१ कृतहस्तः, सुप्रयोगविशिखः, कृतपुङ्खः (३ त्रि), 'बाण चलानेमें निपुण' के ३ नाम हैं ॥

२ अपराद्धपृषत्कः (त्रि), 'निशाना चुके हुए' का १ नाम है ॥

३ धन्वी (= धन्विन्), धनुष्मान् (= धनुष्मत्), धानुष्कः, निषङ्गी (= निषङ्गिन्), अस्त्री (=अस्त्रिन् । + शस्त्री=शस्त्रिन्), धनुर्धरः (६ त्रि), 'धनुष धारण करनेवाले' के ६ नाम हैं ॥

४ काण्डवान् (=काण्डवत्), काण्डीरः (२ त्रि), 'बाण धारण करनेवाले' के २ नाम हैं ॥

५ शाक्तीकः, शक्तिहेतिकः (२ त्रि), 'शक्तिनामक शस्त्र धारण करनेवाले' के २ नाम हैं ॥

६ याष्टीकः, पारश्वधिकः (२ त्रि), 'लाठी और फरसा धारण करनेवाले' का क्रमशः १–१ नाम है ॥

७ नैस्त्रिंशिकः, असिहेतिः (भा० दी० । २ त्रि), 'तलवार धारण करनेवाले' के २ नाम हैं ॥

८ प्रासिकः, कौन्तिकः (२ त्रि), 'प्रास और कुन्त (भाला) धारण करनेवाले' का क्रमशः १–१ नाम है । ('किसीके मतसे दोनों शब्द एकार्थक हैं') ॥

९ चर्मी (=चर्मिन्), फलकपाणिः (२ त्रि), 'चर्मनामक हथियार (ढाल) धारण करनेवाले' के २ नाम हैं ॥

---

* 'पर्श्वधः परशौ न दृष्टः, अतः 'यष्टिस्वधितिहेतिकौ' इति काश्मीराः पठन्ति' इति क्षी० स्वा० । किन्तु '—कुठारस्तु परशुः पर्शुपर्श्वधौ । परश्वधः स्वधितिश्च' (अभि० चिन्ता० ३ ४५०) इति हेमचन्द्राचार्योक्तेरुक्तहेतुदानमकिञ्चित्करम् ॥

—१ पताकी वैजयन्तिकः।
२ अनुप्लवः * सहायश्चानुचरोऽभिसरः समाः ॥ ७१ ॥
३ पुरोगाग्रेसर-प्रष्ठा-अग्रतःसर-पुरःसरा ।
पुरोगमः पुरोगामी ४ मन्दगामी तु मन्थरः ॥ ७२ ॥
५ जङ्घालोऽतिजवस्तुल्यौ ६ जङ्घाकरिकजाङ्घिकौ।
७ तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥ ७३ ॥
८ जय्यो यः शक्यते जेतुं ९ जेयो जेतव्यमात्रके।

---

१ पताकी (= पताकिन्), वैजयन्तिकः (२ त्रि), 'पताका धारण करनेवाले' के २ नाम हैं ॥

३ अनुप्लवः, सहायः, अनुचरः, अभिसरः (+ अभिचरः। ४ त्रि), 'अनुचर' के ४ नाम हैं ॥

३ पुरोगः, अग्रेसरः (+ अग्रसरः), प्रष्ठः, अग्रतःसरः, पुरःसरः, पुरोगमः, पुरोगामी (= पुरोगामिन् । ७ त्रि), 'आगे चलनेवाले' के ७ नाम हैं ॥

४ मन्दगामी (= मन्दगामिन्), मन्थरः (२ त्रि), 'धीरे २ चलनेवाले' के २ नाम हैं ॥

५ जङ्घालः (+ जङ्घिलः), अतिजवः (+ अतिबलः। २ त्रि), 'बहुत तेज चलनेवाले' के २ नाम हैं ॥

६ जङ्घाकरिकः, जाङ्घिकः (२ त्रि), 'दौड़हा, डाँक ढोनेवाले' के २ नाम हैं ॥

७ तरस्वी (= तरस्विन्), त्वरितः, वेगी (= वेगिन्), प्रजवी (= प्रजविन्), जवनः, जवः (६ त्रि), 'शीघ्रता करनेवाले' के ६ नाम हैं ॥

८ जय्यः (त्रि), 'जीते जा सकनेवाले' का १ नाम है। ('जैसे-रामेण रावणो जय्यः' अर्थात् 'राम रावणको जीत सकते हैं' इस वाक्यमें रामका रावण जय्य हुआ,.....') ॥

